ॐ गोपीजनवल्लभाय नमः

# *शाण्डिल्यभक्तिसूत्रे* तथा *नारदभक्तिसूत्रे*
# भक्तिलक्षणं तत्स्वरूपं च


[*ŚĀṆḌILYA-BHAKTI-SŪTRE* TATHĀ *NĀRĀDĀ-BHAKTI-SŪTRE*
BHAKTILAKṢAṆAṂ TATSVARŪPAṂ CA]

पि एइच्. डि. गवेषणामूलकः निबन्धः (आर्ट्स्)

गवेषिका
मौमिता घोष

तत्त्वावधायिका
ड. काकली घोष
अध्यापिका, संस्कृत-विभागः, यादवपूर-विश्वविद्यालयः

२०२४



ॐ कृष्णाय वासुदेवाय हरये परमात्मने।।

प्रणतक्लेशनाशाय गोविन्दाय नमो नमः।।



त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च त्वमेव सखा।

त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव।।

कायेन वाचा मनसैन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात्।

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि।।

अच्युतं केशवं रामनारायणं वासुदेवं हरिं श्रीधरं माधवम्।

कृष्णदामोदरं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे।।

हरे राम हरे राम राम राम हरे हरे।

हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।।



# Certificate

Certified that the Thesis entitled, शाण्डिल्यभक्तिसूत्रे तथा नारदभक्तिसूत्रे भक्तिलक्षणं तत्स्वरूपं च submitted by me for the award of the Degree of Doctor of Philosophy in Arts at Jadavpur University is based upon my work carried out under the Supervision of Dr. Kakali Ghosh, Professor, Department of Sanskrit, Jadavpur University And that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere/elsewhere.

Countersigned by the

Supervisor
Dated:

Candidate
Dated:

# कृतज्ञताप्रकाशः

ईश्वरस्य इच्छा कृपा च कस्यापि कार्यस्य कारणं भवति। लौकिकं प्रेम न प्रेम भवितुम् अर्हति, लौकिकं प्रेम आसक्तिवशात् स्वार्थसमन्वितं भवति। केवलम् ईश्वरं प्रति प्रेम स्वार्थरहितं भवति यतोहि प्रेम्णो मुख्यम् उद्देश्यं न स्वस्य सुखेच्छा, अपि च परमप्रियस्य सुखेच्छा तत्र वर्तते। भक्तिः एव सा शक्तिः या आत्मोत्सर्गं शिक्षयति। तदर्थं गोपिकाः श्रेष्ठभक्तत्वेन परिगण्यते कारणं तासां स्वसुखेच्छा लेशतः अपि नास्ति। बाल्यकालाद् एव मम भक्तिमूलकपुस्तकानां प्रति अतीव रुचिः आसीत्। आध्यात्मिकपुस्तकानां पठन-पाठनेन प्रवचनानां च श्रवणेन च अहं मानसिकीं शान्तिं प्राप्तवती।

'*शाण्डिल्यभक्तिसूत्रे* तथा *नारदभक्तिसूत्रे* भक्तिलक्षणं तत्स्वरूपं च' अयं गवेषणानिबन्धः अद्यः समाप्तेः अन्तिमशुभलग्नम् आगतः। मम गवेषणानिबन्धः संस्कृतभाषया एव प्रस्तुयते। अतः येषां महोदयानां प्रत्यक्षपरोक्षसाहाय्येन गवेषणाकार्यं मया सुसंपन्नं जातं तेषां कृते कृतज्ञतां निवेदनाय इदानीं योग्यः अवसरः अस्ति।

प्रथमतः मम कृते एतद् अतीव सौभाग्यं यत् यादवपुरविश्वविद्यालये संस्कृतविभागस्य अध्यापिकां ड. काकली-घोष-महाशयाम् अहं मम गवेषणाकार्यस्य तत्त्वावधायिकारूपेण प्राप्तवती। अतः सर्वप्रथमं अध्यापिकां ड. काकलीघोषमहोदयां मम हार्दिकीं श्रद्धांजलिम् अर्पयामि। मम तत्त्वावधायिकायै श्रद्धेयायै ड. काकली-घोष-महोदयायै हार्दिकं प्रणामं निवेदयामि यत् सा महोदया मां मम प्रियक्षेत्रे भक्तिक्षेत्रे अनुसन्धानकार्याय अनुमतिं प्रदत्तवती। एतत् भक्तिमूलकशोधकार्यं कर्तुं यादृशया प्रेरणया आत्मनिवेदनेन उद्योमेन च प्रयोजनम् आसीत्, तत् श्रेष्ठगुरुव्यतिरेकेण तदनुग्रहं विना न संभवेत्। अतः एतयोः पुस्तकयोः *शाण्डिल्यभक्तिसूत्रस्य नारदभक्तिसूत्रस्य* च आधारेण भक्तिसिद्धान्तस्य उपरि गवेषणानिबन्धस्य प्रस्तुत्यर्थं माननीयाया अध्यापिकाया ड. काकली-घोष-महोदयायाः ऐकान्तिकर्या संगतिपूर्णया सहयोगितया तथा प्रेम्णा वात्सल्य-आशीर्वादयोः साहाय्येन संभवं जातम्। तदर्थं अहं तां ड. काकली-घोष-महोदयां हार्दिकीं कृतज्ञतां निवेदयामि चिरऋणी भविष्यामि च।

मम गवेषणाकार्ये डिजिटलमाध्यमस्य अतीव गुरुत्वम् अस्ति। Internet Archive, National digital library of India, internet encyclopaedia, Scribd, Sanskrit documents, Shodhganga: a reservoir of Indian theses , N-LIST --National library and information services infrastructure for scholarly content, Central Sanskrit University—E-Content, ePustakalay etc._एतादृशाः डिजिटलपुस्तकालयाः संसाधनाः च विविधतथ्यमूलक-पुस्तक-अडिओ-अभिलेखसामग्र्यादीनां शीघ्रप्रवेशसाधनत्वेन महत्त्वपूर्णां

भुमिकां निर्वहन्ति मम शोधकार्यस्य कृते। डिजिटलपुस्तकालयं व्यतिरेकेणापि विविधाः संसाधनाः सन्ति ये गवेषणाकार्यं विशेषतः आनलाइनसन्दर्भाः तथा आनलाइनपत्रिकादयः मम गवेषणाकार्ये साहाय्यं कृतवन्तः। अतः अहम् एतानि डिजिटलमाध्यमानि प्रति धन्यवादं निवेदयामि।

यादवपुरविश्वविद्यालये संस्कृतविभागस्य विभागीयप्रधानम् अध्यापकं ड. अशोक-कुमार-माहाता-महाशयं प्रति हार्दिकीं कृतज्ञतां निवेदयामि। हार्दिकीं कृतज्ञतां निवेदयामि कलिकाता-विश्वविद्यालयस्य अवसरप्राप्ताम् अध्यापिकां ड. रत्ना-वसु-महाशयां प्रति, यस्याः ऐकान्तिकया सहयोगितया अहं शोधकार्ये प्रेरणां प्राप्तवती। अपि च संस्कृत कलेज तथा विश्वविद्यालयस्य सहयोगी-अध्यापकं ड. लोकनाथ-चक्रवर्ती-महाशयं प्रति हार्दिकीं कृतज्ञतां निवेदयामि।

यादवपुरविश्वविद्यालये संस्कृतविभागस्य विभागीय-ग्रन्थागारम् धन्यवादं ज्ञापयामि, यत्र मम गवेषणाविषये विविधप्रयोजनार्थं प्राप्तानां पुस्तकानां संभारः मम अनुसन्धानकार्ये बहुमूल्यतथ्यम् अन्वेष्टुं साहाय्यं करोति, अतः तत्रस्थानां ग्रन्थगारिकाणाम् अहं कृतज्ञतां ज्ञापयामि। अपि च यादवपुरविश्वविद्यालये संस्कृतविभागं प्रति कृतज्ञा अस्मि।

स्नेहधन्यायाः यस्याः ममता स्निग्धता च जीवनस्य प्रगतये मां सदा प्रेषितवती, प्रेषयति, प्रेषयिष्यति च, तां स्नेहशीलां मातरं विजयलक्ष्मी-घोष-महोदयां गवेषणाकार्यसमाप्तिकारणात् आन्तरिकम् आभारं प्रकटयामि, तथा कृतज्ञा अस्मि मम स्वर्गीयपितरं सत्यरञ्जन-घोष-महोदयं प्रति, यस्य स्नेहेन आशीर्वादेन च अहम् एतादृशं कार्यं कर्तुं समर्था अस्मि।

कृतज्ञतां ज्ञापयामि ड. बि. आर. अम्बेडकर शतवार्षिकी महाविद्यालयस्य कर्तृपक्षं ड. चित्तरञ्जन-दास-महाशयम् प्रति, यः महोदयः महाविद्यालये कार्यरतां मां पि-एइच-डि गवेषणाकार्यं कर्तुम् अनुमतिं प्रदत्तवान्। अपि च, ड. बि. आर. अम्बेडकर शतवार्षिकी महाविद्यालयस्य ग्रन्थागारम् प्रति कृतज्ञतां ज्ञापयामि।

********

## विषयानुक्रमः


| | | पृष्ठाङ्काः |
|---|---|---|
| कृतज्ञताप्रकाशः | | i-ii |
| शब्दसंकेतः | | vii |
| प्रथमोऽध्यायः | शोधविषयः शोधकर्मपद्धतिश्च | 1-21 |
| १. | भूमिका | |
| २. | *शाण्डिल्यभक्तिसूत्र*-ग्रन्थस्य तथा *नारदभक्तिसूत्र*-ग्रन्थस्य परिचयः | |
| २.१. | *शाण्डिल्यभक्तिसूत्र*-ग्रन्थस्य परिचयः | |
| २.२. | *नारदभक्तिसूत्र*-ग्रन्थस्य परिचयः | |
| ३. | *शाण्डिल्यभक्तिसूत्रं* कथं *नारदभक्तिसूत्रस्य* पूर्ववर्ती? | |
| ४. | शोधोद्देश्यं शोधपरिधिश्च | |
| ४.१. | शोधोद्देश्यम् | |
| ४.२. | शोधपरिधिः | |
| ५. | *शाण्डिल्यभक्तिसूत्रे* शाण्डिल्यस्य भक्तिलक्षणेन सह *नारदभक्तिसूत्रे* शाण्डिल्यकृत-भक्तिलक्षणस्य प्रासङ्गिकता। | |

| | | |
|---|---|---|
| द्वितीयोऽध्यायः | भक्तिशास्त्रम् | 22-53 |
| १. | भक्तिशब्दस्य व्युत्पत्तिः | |
| १.१. | वैदिकी भक्तिः | |
| १.२. | उपनिषत्सु भक्तिः | |
| १.३. | *श्रीमद्भागवते* भक्तिः | |
| १.४. | *दैवीमीमांसादर्शने* भक्तिः | |
| १.५. | *भक्तिरसायने* भक्तिः | |
| २. | नवधा भक्तिविमर्शः | |
| २.१. | श्रवणम् | |
| २.२. | कीर्तनम् | |
| २.३. | स्मरणम् | |
| २.४. | पादसवेनम् | |
| २.५. | अर्चनम् | |
| २.६. | वन्दनम् | |
| २.७. | दास्यम् | |
| २.८. | सख्यम् | |
| २.९. | आत्मनिवदेनम् | |
| तृतीयोऽध्यायः | *शाण्डिल्यभक्तिसूत्र*-समीक्षणम् | 54-83 |
| १. | *शाण्डिल्यभक्तिसूत्रे* भक्तिलक्षणविमर्शः | |
| १.१. | महर्षिणा शाण्डिल्येन भक्तिलक्षणम् | |
| १.२. | काश्यपमते भक्तिलक्षणम् | |
| १.३. | बादरायणमते भक्तिलक्षणम् | |

| | | |
|---|---|---|
| १.४. | जैमिनिमते भक्तिलक्षणम् | |
| २. | भक्त्याः परिपक्वता | |
| २.१. | भक्त्याः भेदविवेचनम् | |
| २.२. | *शाण्डिल्यभक्तिसूत्रे*षु दार्शनिकालोचना | |
| ३. | भक्त्या महिमा | |
| ३.१. | गोपिकानां महिमा | |
| ३.२. | भक्तिः सार्वजनीना | |
| ३.३. | मुख्यसाध्यं भक्तिः | |
| चतुर्थोऽध्यायः | *नारदभक्तिसूत्र*-विमर्शः | 84-108 |
| १. | भक्तिलक्षणम् | |
| १.१. | *नारदभक्तिसूत्रे* भक्तिलक्षणम् | |
| १.२. | पाराशर्यस्य भक्तिलक्षणम् | |
| १.३. | गर्गाचार्यस्य भक्तिलक्षणम् | |
| १.४. | देवर्षेः नारदस्य भक्तिलक्षणम् | |
| २. | पराभक्तिस्वरूपम् | |
| २.१. | गौणभक्तिस्वरूपम् | |
| २.२. | प्रेमस्वरूपम् | |
| २.३. | भक्तस्वरूपम् | |
| ३. | *नारदभक्तिसूत्रस्य* उपादेयता | |
| पञ्चमोऽध्यायः | सर्वसाधनश्रेष्ठा भक्तिः | 109-134 |
| १. | भक्तियोगस्य महत्त्वम् | |

| | | |
|---|---|---|
| १.१. | आध्यात्मिकतायां भक्तियोगः | |
| १.२. | विविधसाधनमार्गेषु भक्तिमार्गः | |
| १.३. | भक्तिसूत्रेषु भक्तियोगः सर्वोत्तमः | |
| २. | दार्शनिकनयेन वैष्णवभक्तिः | |
| २.१. | शंकराचार्यस्य नये भक्तिः | |
| २.२. | रामानुजाचार्यस्य नये भक्तिः | |
| २.३. | निम्बार्काचार्यस्य नये भक्तिः | |
| २.४. | मध्वाचार्यस्य नये भक्तिः | |
| २.५. | गौडीयवैष्णवमते भक्तिः | |
| षष्ठोऽध्यायः | सिद्धान्तितः निर्णयः | 135-141 |
| Bibliography | | 142-149 |

- विश्वविद्यालय-गवेषणा-समितेः सानुग्रहेण अनुमतिसापेक्षेण च मया शोधनिबन्धः संस्कृतभाषया इत्यत्र प्रस्तूयते परंतु ग्रन्थपञ्जिः इत्यंशः पूर्णतया रोमकलिप्या इत्यत्र उपन्यस्यते। अपि च उल्लेखपञ्जिः इत्यंशे ग्रन्थानां नामानि रोमकलिप्या अपि उपलभ्यते।

# शब्दसंकेतः

बृ.उ.—बृहदारण्यकोपनिषद्

छा.उ.—छान्दोग्योपनिषद्

मु.उ.—मुण्डकोपनिषद्

वि.पु.—विष्णुपुराणम्

ग.पु.—गरुडपुराणम्

अष्टा.—अष्टाध्यायी

ऋ—ऋग्वेदः

श्वे.उ.—श्वेताश्वतरोपनिषद्

श्री.भ.मा.–श्रीमद्भगवद्माहात्म्यम्

नृ.पु. –नृसिंहपुराणम्

शि.पु.—शिवपुराणम्

प.पु.—पद्मपुराणम्

अ.रा.—अध्यात्मरामायणम्

क.उ.—कठोपनिषद्

तन्त्रा.—तन्त्रालोकः

र.वं—रघुवंशः

शा.भ.सू.--शाण्डिल्यभक्तिसूत्रम्

कै.उ.—कैवल्योपनिषद्

ना.भ.सू.—नारदभक्तिसूत्रम्

ब्र.वै.पु.—ब्रह्मवैवर्तपुराणम्

ई.उ.—ईशोपनिषद्

उ.मी.—उत्तरमीमांसा

भ.र.सि.—भक्तिरसामृतसिन्धुः

कु.तं.— कुब्जिकामतन्त्रम्

ह.भ.वि.—हरिभक्तिविलासः

अ.सू.—अनुभवसूत्रम्

मनु.—मनुसंहिता

पू.मी.—पूर्वमीमांसा

पा.गी.—पाण्डवगीता

अ.पु.—अग्निपुराणम्

तै.आ.—तैत्तिरीय आरण्यकः

तै.उ.—तैत्तिरीय उपनिषद्

चै.भा.—चैतन्यभागवतम्

ह.भ.सु.—हरिभक्तिसुधोदयः

श्री.भाग.—श्रीमद्भागवतम्

श्री.भ.गी.—श्रीमद्भगवद्गीता

श्री.चै.च.--श्रीचैतन्यचरितामृतम्

रा.भा.—रामानुजभाष्यम्

ब्र.सं.—ब्रह्मसंहिता

दै.मी.द.—दैवीमीमांसादर्शनम्

भ.द.—भक्तिदर्शनम्

भ.रसा.—भक्तिरसायनम्

वै.श.—वैराग्यशतकम्

शा.सं.—शाण्डिल्यसंहिता

वि.चू.—विवेकचूडामणिः

श.भा.—शङ्करभाष्यम्

स्क.पु – स्कण्डपुराणम्

ना.पञ्च.—नारदपञ्चरात्रम्

यो.सू.—योगसूत्रम्

ई.पू.—ईसापूर्वः

# प्रथमोऽध्यायः

## शोधविषयः शोधकर्मपद्धतिश्च

यस्यास्ति भक्तिर्भगवत्यकिञ्चन सर्वैर्गुणैस्तत्र समासते सुराः।
हरावभक्तस्य कुतो महद्गुणा मनोरथेनासति धावतो बहिः।।
*श्रीमद्भागवतम्* ५.१८.१२

# प्रथमोऽध्यायः
## शोधविषयः शोधकर्मपद्धतिश्च

### १. भूमिका

वेद-उपनिषद-महाकाव्य-गीता-प्रबन्ध-भागवतादिषु वैष्णवभक्तिभावनाया विकासो दरीदृश्यते। ततो रामायण-महाभारत-गीतादिषु भक्तिभावनाया विकासः परिलक्ष्यते। ब्राह्मणकालीनेन याज्ञिक-कर्मकाण्डेन उत्पन्न-आर्थिक-सामाजिक-समस्यासमाधानार्थं नवोदित-सामाजिक-परिस्थितौ आलवारमहोदयः पराभक्तिं प्रति सुलभाकर्षकरूपेण वैष्णवभक्त्याः सदृढाधारभूमिं प्रदत्तवान्। भारतीयवैष्णव-भक्त्यान्दोलनस्य प्रारंभदशायाम् आलवारभक्तानाम् अस्तित्वं प्राप्यते। यज्ञादि बाह्यकर्म उपासना च मानसकर्म परंतु भक्तिः प्रेमलक्षणरूपा भवति। आर्याणाम् अधिकतमः विस्तारः ८००-५५० ईसापूर्वः आसीत्। यदा रामायण-महाभारताभ्यां पौराणिकपरम्परां स्थायित्वं प्राप्तं तदा भारतीयसमाजे चतुर्णां वर्णानां स्थायित्वम् आपद्यते। भारते कालान्तरे कर्मकाण्डस्य महत्त्वं सर्वोच्चं जातम्। वैदिकयुगः प्रधानतः यज्ञीयकर्मकाण्डपरकः[1] अस्ति, द्रव्ययज्ञे द्रव्यसंग्रहशुध्याह्वानमन्त्राः सूक्ष्मतया तादृशे विचारे निहिताः सन्ति यद् भक्तस्य दृष्टिः क्रमेण स्वयमेव सूक्ष्मं प्रति आकृष्यते। साधनरहस्यं शनैः शनैः विवृत्य साधकः भावनात्मकयज्ञाद् ज्ञानात्मकयज्ञं प्रति[2] आकृष्यते।

नैतिकचेतनायाः उद्भवः विकासश्च भारते चीनदेशे च परिलक्ष्यते। प्राचीनबाइबिलस्य अन्ये च प्रारंभिकधर्मशास्त्राणां धार्मिकादेशानां नैतिकमहत्त्वं सुस्पष्टरूपेण चित्रितम् अस्ति। हिब्रुमते परमेश्वरस्य अभिधानं रोमकलिप्या 'Jehovah' इति तद् विश्रुतम्। ख्रिस्टियमते परमेश्वरस्य अभिधानं 'गड्' (God)[3]।

उपनिषदः माङ्गलिकवचनेषु एकः ईश्वरः बहूनां देवानां कृते विश्वहिताय वा संबोधितः अस्ति। कविः गृहस्थः पुरोहितः भक्तश्च स्वस्य पार्थिवकामानाम् आध्यात्मिकवासनानां च कृतार्थं स्त्रोत्रमन्त्रादीनां स्तुतिं नमस्कारं प्रार्थनां च कृतवन्तः। इसलामधर्मस्य पवित्र: ग्रन्थ: 'कोरानम्' आरविभाषायां विरच्यते। प्रार्थनायाम् ईश्वरस्य माहात्म्यवर्णना तथा आत्मसमर्पणस्य शक्तिः ईश्वरस्य इच्छा भक्तानाम् इच्छारूपेण व्यज्यते। प्रकृते: सर्वत्र प्राणानाम् अस्तित्वे विश्वास: आवश्यकः अस्ति। ईश्वरस्य अन्तर्वर्तिता सर्वभूतेषु विराजते, चिन्तनम् अनुभूतिः इच्छा च मनसः प्रकाशार्थं[4] व्यवह्रियते। लोकज्ञाने विश्वासे च भारतवर्षस्य अखिलभूखण्डे व्यावहारिकरूपेण वेदाः अतिक्रान्तवन्तः। पाचकडि-वन्दोपाध्यायस्य रचनायाम्—

ब्रह्माण्डे ये गुणा: सन्ति ते तिष्ठन्ति कलेवरे।

वैदिकध्यानधारणादिकं पुरूषप्रधानम् अस्ति। *ऋग्वेदे* दशममण्डलस्य *पुरुषसूक्ते*—

पुरुषं एवेदं सर्वं यद्भूतं यच्च भव्यम् उतामृतत्वस्येशानो यदन्नेनातिरोहति।

*मानवगृह्यसूत्रे बौधायनधर्मसूत्रे* च गणपत्या: प्राधान्यं गोचरीभूयते। *वाजसनेयीसंहितायाम्*—

गणानां त्वां गणपतिं हवामहे।[5]

आदौ तन्त्र-साङ्ख्ययो: प्राक् अध्यात्मवादिचिन्तनस्य अवचेतनकारणतावादस्य अस्तित्वं परिलक्ष्यते:, शंकराचार्यस्य दर्शनं भाववादिदर्शनम् अस्ति। वेदान्तः भाववादी साङ्ख्यं च वस्तुवादी। *ब्रह्मसूत्रभाष्ये* प्राप्यते— शंकरमते ज्ञानं वस्तुतन्त्रं कर्म च पुरुषतन्त्रं भवति। तन्त्रे[6] नारी आद्याशक्ति:। सप्तदश-शताब्द्याः सुफि-लेखकः शाक्तस्य वर्णनायां कथितवान्— शाक्तमते मायातः जगतः सृष्टिर्भवति, अतः सा माया[7] जगदम्बा इति प्रोच्यते।[8] गुप्तप्रथासु महत्त्वपूर्णं यौनसुखस्य नियन्त्रणं योगेन भवति, येन सः आनन्दः पारमार्थिकानन्दरूपेण परिवर्तयितुं शक्यते यत् शरीरस्य मनसः च स्वास्थ्याय एकस्मिन् समये आनुकूल्यं प्रददाति। साङ्ख्यसूत्रे—आवृत्तिरसकृदुपदेशात्।। यदि सकृत् श्रवणेन विवेकज्ञानं न उदेति तर्हि वारं वारं श्रवणीयम्। श्वेतकेतुः सप्तवारं श्रवणात् परं विवेकज्ञानं प्राप्तवान्।[9]

*उपनिषदि* स्पष्टरूपेण भक्तिभावनायाः प्राकट्यं सूच्यते। वैदिकभक्तेः अङ्गत्रयं वर्तते— स्तुतिः प्रार्थना उपासना च। यज्ञे आहुतिः प्रदीयते, आहुतिमाध्यमेन दिव्यशक्तिं ऋत्विक् आह्वयति। यत् आह्वानम् भक्तान् दिव्यतां प्रति नयति। भक्तिः एव मनुष्यान् दिव्यतां प्रति नयति, अत एव यज्ञः भक्तिविरोधी नास्ति। *तैत्तिरीयोपनिषदि छान्दोग्योपनिषदि बृहदारण्यकोपनिषदि* च आत्मसाक्षात्कारस्य मार्गे भक्तिः अस्ति। वासनारहितो मनुष्यः शोकरहितो भूत्वा वैराग्यात्संसारात् विमुच्यते, अपि च ईश्वरं प्रति श्रद्धा भक्त्या अनिवार्यः अङ्गः अस्ति। आत्मसाक्षात्काराय श्रद्धाया मुख्यं स्थानं वर्तते। योगसूत्रानुसारं ॐ ईश्वरस्य वाचकः अस्ति। ध्यानाय ॐकारेण प्रयोजनम् अस्ति, तत्सहितं साकारवासुदेवस्य ध्यानम् अतीव सुकरं भवति। ध्यानेन शरणागतिं व्यतिरिच्य आत्मनः परमतत्वे विलीनं न संभवपरं भवति। पुरुषोत्तमसंहितायाम्—

भगवद्भक्तिरेव स्यात् भक्तानां मुक्तिसाधनम्।
तद्भक्तिबोधकं शास्त्रं पाञ्चरात्रागमस्थितम्।। इति।

भक्त्याः तटस्थलक्षणं—भक्तिः भक्तं भगवतः निवासस्थानं प्रति नेति, भक्तिः भक्तं भगवद्दर्शनं कारयति, भक्तिः भगवन्तं वशीकर्तुं समर्था भवति, चित्तशुद्ध्या चित्तं द्रवीभूयते। मूण्डकश्रुतिः प्रोक्तवान्—पराविद्या एव भक्तिः—

सा परा यया अक्षरमधिगम्यते। (मु.उ. १.१.५)

*श्रीमद्भगवद्गीतायां* शुद्धभक्तस्य लक्षणप्रसङ्गेन द्वादशाध्याये कतिपयानि लक्षणानि दर्शितानि सन्ति, शुद्धो भक्तः कीदृशो भविष्यति प्रसङ्गे अस्मिन् त्यागशब्दः पुनः पुनः आगच्छति। भक्तो सर्वत्यागी[10] भवेत्। त्यागः वस्तुतः मायायाः त्यागः अनिवार्यः। का सा भगवतः माया—एषा गुणमयी भगवत: दैवी माया[11] हि दुरत्यया ये मामेव प्रपद्यन्ते ते एतां मायां तरन्ति। भगवदेकशरणतया तत्त्वज्ञानद्वारेण मायायाः अतिक्रम: संभवति। गुणमयी सत्त्वरजस्तमोगुणात्मिका त्रिगुणरज्जुः इव अतिदृढत्वेन बन्धनहेतु: भवति माया, मायाविन: परमेश्वरस्य सर्वजगत्कारणस्य सर्वज्ञस्य सर्वशक्ते: स्वभूता सा माया भवति। ज्ञानयज्ञे संकल्पविकल्पात्मकस्य अन्तःकरणस्य कामः एव यज्ञीयजन्तुः। कर्म ज्ञानप्रधानम्, तत् कर्म बन्धनकारणं भवति, तत् कर्म नित्यं नित्यसहचरम्, तेन कर्मणा कौशलेन मुक्तिः संभवति। वस्तुत: आत्मौपम्यबुद्धिद्वारेण अनासक्तफलाकांक्षावर्जितो भूत्वा सर्वेषां प्राणिनां हिताय भगवदाराधना एव *श्रीमद्भगवद्गीताया महाभारतस्य* च वास्तविको यज्ञः। कर्ममात्रो भगवत्प्राप्त्यनुकूलकार्यं स्वधर्मपालनं जीवसेवनं त्यागात्मकं कर्म च यज्ञः—त्यागेनैकेन अमृतत्वमानशुः। एवमेव रामानन्द-कबीर-तुलसी-सुरदास-मीरा-दादुदयालादयः संसारस्य असत्यतां गहनतया अनुभूय जीवनस्य शाश्वतम् आनन्दं ते स्थापितवन्तः।

*श्रीमद्भगवद्गीतायाम्*— यज्ञानां जपयज्ञोऽस्मि। जपने मन्त्रार्थज्ञानम् आवश्यकम् अस्ति, अर्थज्ञान-श्रद्धा-विश्वाससमन्वयेन जपनं सुक्रियापदं भवति, जपनाय संयमदेहशुध्यादिकम् अपरिहार्यम् अस्ति। गायत्रीसाधना यद्यपि उपासना तथापि इत्यत्र एकाधारेण कर्म-ज्ञान-भक्ति-योगानां समवायः अपि भवति। गायत्रीमन्त्रा वैदिकमन्त्रत्वाद् वैदिकजपनियमानुसारेण गायत्री जप्यते। *श्रीमद्भागवते*—

कर्मणा कर्मनिहारो न ह्यात्यन्तिक इष्यते।
अविद्वदधिकारित्वात्प्रायश्चित्तं विमर्शनम्।। (श्री.भाग. ३.१.११)

यज्ञमन्त्रेषु अस्य रहस्यस्य रमणीयः संकेतः अस्ति। मुख्यतन्त्रसिद्धान्तद्वारा भागवतप्राप्तिसाधनं ज्ञास्यामः, यान्त्रिकसाहाय्येन वयं शरीरस्य विभिन्नेषु केन्द्रेषु भक्तिं जागृयामः, कर्म वै यज्ञः आनन्दप्राचुर्यात्। कर्मान्तर्गतानां सर्वविकृतीनां परिहारेण अभावात्मकं कर्म स्वभावात्मके कर्मणि,

बन्धनात्मकं कर्म मुक्तेः अनुकूलानन्दप्राचुर्यात्मके कर्मणि यथाशक्ति प्रयतस्व, तत्परिवर्तयितुं यावद्विचारः तावत्क्रिया एवं यज्ञ इत्यभिधीयते। विषयं इन्द्रियानि प्रति, इन्द्रियानि आत्मानं प्रति, आत्मानं मनसि, मनो विज्ञानं प्रति, विज्ञानम् आनन्दं प्रति, आत्मानन्द इति यज्ञव्यवस्था उपनिषत्सु द्रष्टुं शक्यते। एकाग्रतया भक्तः स्वात्मविज्ञः सामर्थ्यकारको भवति, तस्य कर्म वै यज्ञः अस्ति। यज्ञेन प्रयोजनं एकत्वप्राप्तिः अद्वैततत्त्वप्राप्तिः ब्रह्मानुभूतिप्राप्तिः सिद्धिप्राप्तिः भागवत्प्राप्तिः इत्यादीनि च। *श्रीमद्भगवद्गीतायाः* कर्मयोग-भक्तियोग-ज्ञानयोगाः यथाक्रमं वेदानां द्रव्यात्मक-भावनात्मक-केवलात्मकयज्ञैः अवगम्यते।

यज्ञः फलाभिसन्धिरहितं भगवदाराधनम्। (रा.भा. १६.१)
यज्ञः परमेश्वराराधनम्-यज्-देवपूजायाम्—नीलकण्ठः
इज्यते पूज्यते परमेश्वरः अनेन इति यज्ञः—गिरिः

उपासना-संध्या-पूजा-जपादि साधना सर्वमेव यज्ञनाम्ना व्यपदिश्यते। कर्मयोग-ज्ञानयोग-भक्तियोगाः इत्यादयः यज्ञशब्दे अन्तर्भवन्ति। ईश्वरस्य सामर्थ्यात् अधिकारम् अनुभवन् स्वाधिकरणस्य गौरवपरित्यागेन आत्मत्यागस्य नाम यज्ञ इति।

अस्माकं तनु-आत्मा-मनांसि भगवल्लीलाभूमौ प्रकृतवृन्दावनधाम्नि परिणमते। मानसपूजा-अष्टकालीय-लीलाचिन्तनादिकं भावात्मकयज्ञस्य सहायकं भवति। वृन्दावनस्य अधिष्ठात्री देवी भावात्मकयज्ञस्य सम्यग् उदाहरणम् अस्ति। प्रेमिकरसिकजनाः रागमार्गे हरिभजनं कृत्वा तस्य रूपमाधुर्य्यम् आस्वाद्य वेणुध्वनिम् आकर्ण्य, तस्य दिव्याङ्गगन्धं समाघ्राय लीलाशुकवद् उपलब्धवन्तः।

मधुरं मधुरं वपुरस्य विभो मधुरं मधुरं मदनं मधुरम्।
मधुगन्धि मृदुस्मितमेतदहो मधुरं मधुरं मधुरं मधुरम्।। इति।

अस्माकं कृते लीलामयो श्रीभगवान् स्वसुखार्थं मायावेषेण गुप्तक्रीडां कर्तुम् आरब्धवान्, दार्शनिकभाषायां निर्गुण-निष्क्रिय-अविभक्त-अव्यक्त-अनन्त-निराकार-परमात्मा सगुण-सक्रिय-अभिव्यक्त-विभक्त-ससीम-साकाररूपेण परिणमते। भगवतः सगुणसाकारप्रतिमा द्वैतभावं सूचयति।

वेदान्तसिद्धान्तानुसारं निरतिशयानन्दरूपं पूर्णसुखस्वरूपं च सगुणब्रह्म ईश्वरं साक्षात्कृत्यैव जीवः सर्वदुःखविनिर्मुक्तो भूत्वा परमानन्दं विन्दते। पुराणानाम् अनुसारं भेदोपासनया परमात्मनः साक्षात्कारं संपाद्य जन्ममृत्युबन्धनक्लेशरहितो जीवः सगुणस्य भगवतो नित्यलीलाधाम्नि अप्राकृतेन शरीरेण

निवसन् भगवत्सान्निध्यसुखम् अनुभवति। अतो भगवत्स्वरूपसाक्षात्कारम् अन्तरा न किमपि वास्तविकं सुखम् अस्ति। श्रुत्यनुसारं रसो वै सः, रसं लब्धा हि आनन्दीभवति। भगवतो रसरूपत्वाद् ब्रह्मानन्दप्रदायिनं भक्तिरसमेव द्वारीकृत्य रसरूपस्य भगवतः सान्निध्यम् अवाप्तुं शक्यते। भगवत्सान्निध्योपलब्धिहेतुभूतं *भक्तिदर्शनं* भगवत्तत्त्वसाक्षात्कारद्वारा अपवर्गद्वारम् उद्घाट्य परमं पदं प्रापयति भक्तप्रवरान्। अतः दुःखदूरीकर्तुं आनन्दप्राप्त्यर्थं भक्त्या गुरुत्वं स्वीक्रियते कारणं परमेश्वरः श्रीकृष्णः एव रसमयः।

पौराणिकी उद्धृतिः— प्रज्ञप्तिरूपो हि हरिः, प्रज्ञा च स्वानन्दलक्षणा, प्रज्ञाया अर्थः निरन्तरं स्वतः आनन्दप्राप्तिः। यथा बिम्बस्थानीयं मुखमेव दर्पणाद्युपाधिसंबन्धात् प्रतिबिम्बरूपं धत्ते तथैव ईश्वरो देहोपाधिसंयोगाद् जीवरूपं गृह्णाति। अत एव जीवः ईश्वरवत् पूर्णरसरूपः, तयोः भेदो नास्ति। दृश्यदर्शकयोः अभेदानुभव एव रसस्य परमं प्रयोजनम् अस्ति। कान्तादि-लौकिकविषयेषु अपि रसप्रतीतिकारणात् सुखस्वरूपं चैतन्यघनमेव अस्ति, किंतु मायाया आवरणशक्त्या आवृतत्वात् न विशुद्धं भगवतः तत्त्वं प्रतीयते। अतो द्रवीभूतचित्तवृत्तौ आविर्भूतः चिदानन्द एव रसत्वं प्रतिपाद्यते। अत एव भर्तृहरिणा *वैराग्यशतके*—

यदासीदज्ञानं स्मरतिमिरसञ्चारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदिति।
इदानीमस्माकं पटुतमविवेकाञ्जनदृशां
शमीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते।। इति।

भक्तितत्त्वस्य निर्वचनावसरेण *शाण्डिल्यभक्तिसूत्रं नारदभक्तिसूत्रं* च इति ग्रन्थद्वये भक्तितत्त्वानाम् आलोचना अतीव महत्त्वपूर्णा अस्ति। सूत्रसाहित्यकालः ख्रिस्टपूर्वाब्दत्रयशतकात् ख्रिस्टाब्दत्रयशतकपर्यन्तम् अस्ति। *नारदभक्तिसूत्रस्य* रचनाकालः सप्तमशताब्देः पूर्वम् अस्ति। तत्र देवर्षिणा नारदेन भक्तिविषयकानि चतुरशीति-सङ्ख्यकानि सूत्राणि प्रणीतानि, महर्षिणा शाण्डिल्येन च द्व्यधिकशतानि शतानि वा मतभिन्नत्वेन सूत्राणि निर्मितानि। तत्र *नारदभक्तिसूत्रात् शाण्डिल्यभक्तिसूत्रस्य* भक्तिसंप्रदाये विशिष्टं स्थानं स्वातन्त्र्यं च अस्ति। *शाण्डिल्यभक्तिसूत्रस्य* भक्तसमाजे विपुलोऽस्ति प्रचारः प्रसारः समादरश्च।

शाण्डिल्यमुनिः *शाण्डिल्यभक्तिसूत्रम्* त्रिदिनानि यावत् रचितवान्, तत्र षड्वारं विश्रामं कृतवान् अतः षट् आह्निकाः सन्ति। स्वप्नेश्वरकृता व्याख्या प्राचीना स्वल्पाक्षरा, अपि च सा व्याख्या परिमितैः शब्दैः सूत्राणां रहस्यार्थं स्पष्टं बोधयति, इयं व्याख्या भाष्यनाम्ना प्रख्याता वर्तते। द्वितीया व्याख्या

नारायणतीर्थविरचिता भक्तिचन्द्रिका इत्यभिधया उपलभ्यते। स्वप्नेश्वरस्य भाष्यं स्वल्पाक्षरसमन्वितं सरलतया उपन्यस्यते। परंतु विपुलाक्षरमण्डितायाः भक्तिचन्द्रिकायाः अर्थः काठिन्यतया अवगम्यते। स्वप्नेश्वरस्य भाष्ये यथा भक्तिसूत्राणि प्राप्यन्ते मम गवेषणाकार्ये तथैव क्रमेण संपत्स्यते। भक्तिचन्द्रिकायाम् उपस्थापितानां भक्तिसूत्राणां तथा स्वप्नेश्वरस्य भाष्ये उपस्थापितैः भक्तिसूत्रैः किंचित् परिवर्तनं परिलक्ष्यते, तदेव इत्यत्र प्रदीयते।

| **स्वप्नेश्वरस्य भाष्यम्** | **भक्तिचन्द्रिका** |
|---|---|
| अत एव फलानन्त्यम् | अत एव च फलानन्त्यम् |
| प्रकरणाच्च | प्रकरणात् |
| अत एव तदभावाद्बल्लवीनाम् | अत एव तद्भावाद्बल्लवीनाम् |
| भक्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात् | भक्त्या जानातीति चेन्नाभिज्ञया साहाय्यात् |
| योगस्तुभयार्थमपेक्षणात् प्रयाजवत् | योगस्तुभयार्थमपेक्षणात् प्रयाजादिवत् |
| तामैश्वर्यपरां काश्यपः परत्वात्। | तामैश्वर्यपदां काश्यपः परत्वात्। |
| आत्मैकपरां बादरायणः | आत्मैकपदां बादरायणः |
| उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम्। | उभयपदां शाण्डिल्यः शब्दोपपत्तिभ्याम्। |
| वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ट्यात् | वैषम्यादसिद्धमिति चेन्न प्रत्यभिज्ञानवदवैशिष्ट्यात् |
| अप्रतिषिद्धं परैश्वर्यं तद्भावाच्च नैवमितरेषाम् | अप्रतिषिद्धं परमैश्वर्यं तद्भावाच्च नैवमितरेषाम् |
| सर्वानृते किमिति चैन्नैवं बुद्ध्यानन्त्यात् | सर्वामृते किमिति चैन्नैवं बुद्ध्यानन्त्यात् |
| प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात् | प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तनात् |
| शक्तित्त्वान्नानृतं वेद्यम् | शक्तित्त्वान्नानृतं चेत्यम् |
| तत्परिशुद्धिश्च गम्या लोकवल्लिंगेभ्यः। | तत्परिशुद्धिस्तु गम्या लोकवल्लिंगेभ्यः। |
| जन्मकर्मविदश्चाजन्मशब्दात् | जन्मकर्मविदश्चाजन्मने शब्दात् |
| मुख्यं तस्य हि कारुण्यम् | मुख्यं हि तस्य कारुण्यम् |
| अन्तराले तु शेषाः स्युरुपास्यादौ च काण्डत्वात् | अन्तराले तु शेषाः स्युरुपास्त्यादौ च काण्डत्वात् |
| अत्राङ्गप्रयोगाणां यथाकालसम्भवो गृहादिवत् | अप्रयोगाणां यथाकालसम्भवो गृहादिवत् |

| | |
|---|---|
| तद्यजिः पूजायामितरेषां नैवम् | तद्यजिः पूजायामितरेषां तु नैवम् |
| स्वयमर्पितं ग्राह्यमविशेषात् | स्वयमप्यर्पितं ग्राह्यमविशेषात् |
| निमित्तगुणाव्यपेक्षणादपराधेषु व्यवस्था | निमित्तगुणव्यपेक्षणादपराधेषु व्यवस्था |
| सुकृतजत्वात् परहेतुभावाच्च क्रियासु श्रेयस्यः | सुकृतजत्वात् परहेतुभावाच्च क्रियासु ताः श्रेयस्यः |
| गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् | गौणत्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम् |
| भूयसामननुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि | भूयसामनुष्ठितिरिति चेदाप्रयाणमुपसंहारान्महत्स्वपि |
| लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात् | लघ्वपि भक्त्यधिकारे महत्क्षेपकमपरसर्वहानात् |
| उत्क्रान्तिस्मृतिवाक्यशेषाच्च | उत्क्रान्तिवाक्यशेषाच्च |
| व्युत्क्रमादप्ययस्तथा दृष्टम् | व्युत्क्रमादपायस्तथा हि दृष्टम् |
| सैकान्तभावो गीतार्थप्रत्यभिज्ञानात् | सैकान्तभावे गीतार्थप्रत्यभिज्ञानात् |
| अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम् | अनन्यभक्त्या तद्बुद्धिलयादत्यन्तम् |
| संसृतिरेषामभक्तिः स्यान्नाज्ञानात्कारणासिद्धेः | संसृतिरेषामभक्तेः स्यान्नाज्ञानात्करणत्वासिद्धेः |
| आविस्तरोभावा विकाराः स्युः क्रियाफलसंयोगात् | आविस्तिरोभावविकाशाः स्युः क्रियाफलसंयोगात् |

भक्तिचन्द्रिकायाम् अतिरिक्तं सूत्रत्रयमस्ति स्वप्नेश्वरभाष्ये येषां सूत्राणाम् उल्लेखः नास्ति।

| |
|---|
| भक्तिः प्रमेया श्रुतिभ्यः |
| पुराणेतिहासाभ्याञ्चेति |
| पृथुध्रुवप्रह्लादाम्बरीषशुकसनकनारदभजनाचाराच्च |

स्वप्नेश्वरभाष्ये अतिरिक्तम् एकं सूत्रम्— प्रागुक्तं च।

## २. *शाण्डिल्यभक्तिसूत्र*-ग्रन्थस्य तथा *नारदभक्तिसूत्र*-ग्रन्थस्य परिचयः

वेदानुसारम् ऋषीणाम् उपदेशो वेदसिद्धान्तविषये स्वभावप्रकटनार्थाय दर्शननाम्ना अभिधीयते। अक्षपादो गौतमो वेदानुसारं निजस्व-तर्कसंमित-विचारप्रक्रियया *न्यायसूत्रं* रचितवान्। ततःपरं महर्षिः

कणादः प्रतिवस्तुनि व्यावर्तकधर्मविशेषतत्त्वं स्वीकृत्य *वैशेषिकसूत्रं* प्रवर्तितवान्। महर्षिः कपिलः प्रकृतिपुरुष-विवेकख्याति-प्रकटनार्थाय सङ्ख्यानिहितज्ञानं *साङ्ख्यसूत्रं* प्रवर्तितवान्। महापुरुषः पतञ्जलिः चित्तवृत्तिनिरोधसमन्वितं *योगसूत्रं* रचितवान्। अनन्तरं महर्षिः जैमिनिः वेदस्य पूर्वभागरूप-यज्ञपरक-कर्मकाण्डमीमांसार्थं *पूर्वमीमांसादर्शनं* गठितवान्। अतःपरं बादरायणो ब्रह्मजिज्ञासनार्थं *ब्रह्मसूत्रं* विरचितवान्। परंपरायां ऋषिः शाण्डिल्यो भक्तिजिज्ञासनार्थाय *शाण्डिल्यभक्तिसूत्रं* तथा देवर्षिः नारदो भक्तिव्याख्यानार्थाय *नारदभक्तिसूत्रं* विरचितवान्। एवम् अखिलः महान् ग्रन्थः सूत्रात्मकः अस्ति।

## **२.१. *शाण्डिल्यभक्तिसूत्र*-ग्रन्थस्य परिचयः**

परमकारुणिको भक्तिमार्गस्य आचार्यः परमभक्तशिरोमणिः दयानिधिः महर्षिः शाण्डिल्यो भक्तिमार्गम् अवज्ञातार्थं भक्तितत्त्वं जिज्ञासते—

अथातो भक्तिजिज्ञासा।। इति।

शाण्डिल्यमहोदयः *शाण्डिल्यभक्तिसूत्रे* परमेश्वरं प्रति अनुरागः एव भक्तिः निगदिता—

सा परानुरक्तिरीश्वरे।।

परमाराध्येऽनुरक्तिः अनु-पश्चात्, रक्तिः- रागः। जगति धनकारणं प्रेम, रूपकारणं प्रेम, पदकारणं च प्रेम दृश्यते। परंतु प्रेम्णः मूलम् अपनापनम्, भजनं प्राप्यते- गोविन्द मेरो है गोपाल मेरो है... । भगवन्तम् अपनापनस्य उपलब्धिः, परमात्माव्यतिरिक्तम् अन्यत् सर्वं संसारादिकं व्यवहारनिमित्तं भवति केवलं परमात्मा एव स्वकीय इत्युपलब्धिः भक्तिः। *शाण्डिल्यभक्तिसूत्रे* प्रथमाध्यायस्य प्रथमे आह्निके परमभक्तेन शाण्डिल्याचार्येण ज्ञानाद् भक्त्या भेदः रागशब्दस्य अर्थश्च निगद्यते। तदनन्तरं उक्तं यद् भक्त्याः फलम् अनन्तम् अस्ति। द्वितीये आह्निके भक्तितत्त्वस्य मुख्यत्वं प्रतिपद्यते। अथ परवर्तिसूत्रेषु भक्तिज्ञानयोः समुच्चयः संपत्स्यते। श्रुतिः एव भक्तेः उत्सः, वेदाः प्रमाणम् तथा योगेन सह भक्त्याः संबन्धः अपि व्यज्यते। ततो विविधसाधनमार्गेषु भक्तिमार्गस्य श्रेष्ठत्वं द्योत्यते।

द्वितीयाध्यायस्य प्रथमे आह्निके चित्तशुद्ध्यर्थं ज्ञानस्य आवश्यकताविषये काश्यप-बादरायण-शाण्डिल्यादीनाम् आचार्याणां भक्तिपरिभाषा परिलक्ष्यते। वेदान्ते ब्रह्मणि प्रतिष्ठितस्य जगतः मायाविषये प्रतिफलनं यथा प्राप्यते तथा साङ्ख्यदर्शननिर्देशिते प्रकृतिपुरुषस्य च चर्या अपि परिलक्ष्यते। वासुदेवः साक्षात्परब्रह्म। भगवतः विभूतिं प्रति भक्तिः न पराभक्तिरूपेण गण्यते। भक्तिः न

केवलं ईश्वरं प्रति, अपि तु ईश्वरस्य रामादिकं लीलावतारं प्रति कर्तव्यं इति विषये अपि कर्तुम् अलम्, अग्रिमे बहुलं स्मृतिमूलकानि सिद्धान्तानि सन्ति।

द्वितीयाध्यायस्य द्वितीये आह्निके भक्ति-भजन-कीर्तनादिषु गौणभक्तिषु अनुरागस्य उपस्थापना प्रस्तुयते, महर्षेः जैमिनेः मतम् अपि उपन्यस्यते। तदनन्तरं क्रमशो भक्तिः कथं सुखं जनयति, ध्यानस्य दृश्यफलं, पूजार्थं यज्ञशब्दस्य प्रयोगः, नैवेद्यपादोदकयोः फलं च वर्ण्यते। गौणभक्तेः भेदत्रयं वर्ण्यते। भगवत्स्मरणं कथं प्रायश्चित्तं जनयति इत्यपि आलोच्यते। भक्त्यां जातिवर्णनिर्विशेषेण सर्वेषां समतुल्यत्वं समानः अधिकारः वर्तते, मुक्तिकामिनो यस्य कस्यापि कीर्तनस्य अधिकारः अस्ति, प्रकृत्या चाण्डालानां कीर्तनस्य अधिकारः अस्मिन् भक्तिसूत्रे प्राप्यते। महर्षिः शाण्डिल्यः कथितवान् भगवति दिव्यशक्त्या भगवत्कृपया अनन्तप्रेम ऐकान्तिकभक्तिः पराभक्तिः एव संभवति, कुतः— गीतार्थप्रत्यभिज्ञानात्।

तृतीयाध्याये उक्तं यद् यदा बुद्ध्याः आत्यन्तिको लयो भवति तदा भगवद्भक्तेन अपारभक्त्या परमात्मा दृश्यते। भक्तिः ज्ञानं च एतयोः मार्गयोः स्थापनार्थं ज्ञानमार्गस्य साधनप्रणाली, भक्तिमूलकाङ्गानां विषये चर्या तथा जीवात्मपरमात्मनोः ऐक्यम् उपन्यस्यते। परमकारुणिको भक्ताचार्यो महर्षिः शाण्डिल्यः तदीये *शाण्डिल्यभक्तिसूत्रे* अन्तिमसूत्रेण भक्तिशरणं गन्तुम् अनन्यभक्तिमाध्यमेन आत्मतत्त्वसाक्षात्कारेण मनुष्याणाम् ईश्वरप्राप्तेः अपरिहार्यताम् उल्लिखितवान्।

## २.२. *नारदभक्तिसूत्र*-ग्रन्थस्य परिचयः

*नारदभक्तिसूत्रे* प्रथमतः नारदमुनिना प्रथमषट्सूत्रेषु शिष्टाचारपूर्वकं भक्तिव्याख्यार्थं प्रचेष्टा परिलक्ष्यते। तथा नारदमहोदयेन भगवति परमप्रेम भक्त्याः बाह्यस्वरूपरूपेण इत्याख्यायते, आन्तरस्वरूपेण भक्तिः अमृतस्वरूपा अविनाशिनी इति प्रोच्यते। उक्तं यद् भक्तिं प्राप्य पुमान् अमृतं लब्ध्वा तृप्तिम् आप्नोति, भक्त्यां प्राप्तायां च तस्य जनस्य न कापि वासना उदेति, न तस्य शोकः दुर्भावः द्वेषश्च तिष्ठन्ति केवलम् आनन्दः अनुभवितुं स जनः शक्नोति। अपि च यदि कश्चित् पुमान् भक्तिं जानाति तर्हि तस्य मनः शुद्धत्वात् स मौनं भूत्वा स्वस्मिन् आत्मनः तृप्तिम् अनुभवति। तदनन्तरं भक्ताचार्यः इन्द्रियसंयमस्य आवश्यकताविषये निरोधशब्दस्य अर्थम् उल्लिख्य ईश्वरं प्रति च एकाग्रचित्तो भूत्वा तेषु लौकिक-वैदिकविरोधेषु उदासीनतां प्रदर्शितवान्।

अथ नारदमुनिः पाराशर्य-गर्ग-शाण्डिल्य-नारदादिभिः भक्ताचार्यैः क्रमशः पूजनं, कथादिश्रवणम्, आत्मरतिः, भगवति सर्वकर्मसमर्पणेन व्याकुलता च भक्तिलक्षणानि परिभाषयन्ति। तदनन्तरं

महोदयेन भक्तिमाहात्म्यं प्रदर्श्यते यत्र व्रजगोपिकाः श्रेष्ठभक्तत्वेन प्रदर्शिताः सन्ति नारदाचार्येण। सा भक्तिः कर्मज्ञानयोगेभ्यो अधिकतरा, भक्तिः स्वयंफलरूपा इति कारणात् श्रेष्ठा भवति। नारदमहोदयेन ज्ञानं साधनरूपेण दर्शयित्वा ज्ञानभक्त्योः परिपूरकत्वं सूचितम्। ततः भक्तिलाभाय कः अधिकारी भक्तिलाभार्थम् उपायाः च आलोचिताः भवन्ति। भक्तये साधुसङ्गः अनिवार्यः अस्ति। भगवता भक्तस्य अभेदः अपि इत्यत्र द्योत्यते।

भक्तिमार्गस्य अधिकारी भवितुं मोक्षाय योगमार्गेण मायाम् अतिक्रम्य वेदान्तस्य कर्मफलत्यागादीनाम् आलोचना *नारदभक्तिसूत्रे* प्राप्यते। प्रेम्णः स्वरूपविषये तत् प्रेम कीदृशं गुणरहितं कामनारहितं निरन्तरवर्धमानं सूक्ष्मतरं च, अतःपरं भक्तिभेदो नारदाचार्येण दर्शितः अस्ति। विविधसाधनमार्गेषु भक्तिः सुलभा तथा भक्तिः शान्त्यानन्दलाभयोः मार्गं प्रशस्तं करोति इति मुनिना सूच्यते। ततो भक्त्याः सामाजिकतायां प्रभावः भक्तस्य महिमा गरिमा च नारदमुनिना उद्घाटिता। अतःपरं कतिपयेषु सूत्रेषु भक्तानाम् अधिकारः, लक्षणं, कर्तव्यता, तेषां च भजनविधयः *नारदभक्तिसूत्रे* नारदाचार्येण दर्शिता भवन्ति। अन्ततः गत्वा पराभक्तेः रूपासक्ति-पूजासक्ति-शरणासक्ति-इत्यादयः एकादश प्रकाराः भक्त्या भेदाः दर्शिताः भवन्ति। अपि च नारदमुनिना कुमार-व्यासाद् आरभ्य बलि-हनुमत्-विभीषणादिभिः भक्ताचार्यैः एषा भक्तिः श्रेष्ठा इति मतं प्रस्तुतम्।

## ३. *शाण्डिल्यभक्तिसूत्रं कथं नारदभक्तिसूत्रस्य* पूर्ववर्ती ?

सप्तर्षिषु नारदमुनिः देवर्षिः, शाण्डिल्यस्तु महर्षिः आसीत्। शाण्डिल्याभिधया अनेके महर्षयः तत्तद्ग्रन्थेषु श्रुयन्ते। एकः तावत् शाण्डिल्यो भक्तिसूत्रप्रणेता महर्षिः शाण्डिल्यः एव। अपरो *बृहदारण्यकोपनिषदि* चतुर्थाध्यायस्य वंशनिरूपके षष्ठे ब्राह्मणे प्रथममन्त्रे –कौशिकात् कौशिकः, कौण्डिन्यात् कौण्डिन्यः, शाण्डिल्यात् शाण्डिल्यः(बृ.उ.—४.६.१)। *छान्दोग्योपनिषदि* महर्षेः शाण्डिल्यस्य नामपूर्वकेण स्पष्टम् उल्लिखितं शाण्डिल्यविद्या[12]—एतेन सिध्यते यद् उपनिषदि शाण्डिल्याचार्यस्य उल्लेखः प्राप्यते, अतो निश्चितरूपेण उपनिषदः पूर्वमेव तस्य महोदयस्य उपस्थितिः दृश्यते। देवलस्य पुत्रः कश्यपस्य पौत्रः शाण्डिल्यः आसीत्, शुक्लयजुर्वेदान्तर्गते *शतपथब्राह्मणे* अपि महर्षेः शाण्डिल्यस्य उल्लेखः प्राप्यते, *ऐतरेयब्राह्मणस्य* काल ईसापूर्वं दशमशतकम् अस्ति। अतः शाण्डिल्यमहोदयस्य समयकालोऽस्मात्पूर्वमिति स्वीक्रियते। महर्षिणा शाण्डिल्येन सर्वप्रथमं भक्तिसूत्राणाम् आलोचना उपस्थापिता।

*ऋग्वेदे* ‘इन्द्रः’ माता च पिता च एवमेव स्तूयते, उपनिषदि प्राधान्येन ज्ञानं तथा भक्तिदर्शनम् अपि संपत्स्यते। ईश्वर-नारायण-वासुदेव-कृष्णादि-विविधाभिधया भगवान् समर्थयते। शाण्डिल्यस्य

त्रेतायुगे राज्ञो दिलीपस्य आध्यात्मिकमार्ग-प्रदर्शकरूपेण, द्वापरयुगे राज्ञो नन्दस्य पुरोहितरूपेण, कलियुगस्य प्रारंभे च जनमेजरस्य पुत्रः शतानीकस्य पुत्रेष्टियज्ञे ऋत्विग्रूपेण उल्लेखः अस्ति। *शाण्डिल्यभक्तिसूत्रस्य* उपरि प्रथमतः स्वप्नेश्वरस्य भाष्यम् अस्ति। अपि च नारायणतीर्थ आसीत् अद्वैतसाधकः—यस्य समयकालः सप्तदशशताब्दी। अपि च मधुसूदनसरस्वत्या *सिद्धान्तविन्दोः* टीका, *साङ्ख्यतत्त्वकौमुद्याः* टीका, *न्यायकुसुमाञ्जल्या* च टीका समुपलभ्यते। *श्रीमद्भागवतमहापूराणस्य* तत्त्वम् आधारीकृत्य *भक्तिचन्द्रिका* टीका भक्तिसूत्रोपरि तेन नारायणतीर्थेण उपलभ्यते।

भक्तिजगति *श्रीमद्भागवतम्* यद्यपि श्रेष्ठत्वेन वर्तते तथापि सूत्रेषु द्वासप्तति-सूत्रेणैव केवलं *श्रीमद्भागवतः* प्रभावः दृश्यते, *विष्णुपुराणात्* बहुलम् उद्धृतिः स्वप्नेश्वरस्य भाष्ये उपलभ्यते। केवलं नारायणतीर्थ एव चतुरशीति-सूत्रेण 'तथा ह्याह' इति शब्दस्य व्याख्यानसमये भागवतसन्दर्भं दर्शितवान्। यदि वा स्वप्नेश्वरस्य भाष्ये *श्रीमद्भगवद्गीतायाः* उद्धृतिः बहुलं उपलभ्यते, अतः यदि वयं वदामः यत् *शाण्डिल्यभक्तिसूत्रं* भागवतरचनायाः पूर्वम् आसीत्। एवमेव शाण्डिल्याचार्यस्य समयकालः ख्रिस्टपूर्वाब्द-पञ्चमशतकात् ख्रिस्टाब्द-नवमशतकमध्ये अन्तर्भूतम् इत्यनुमीयते। *वेदान्तसूत्रस्य* रचनाकारः बादरायण आसीत्, यस्य महोदयस्य नाम भक्तिविषयके सूत्रे *शाण्डिल्यभक्तिसूत्रे* प्राप्यते। *योगसूत्रस्य* रचनाकालः ख्रिस्टपूर्वाब्द-द्वयशतकात् ख्रिस्टाब्द-त्रयशतकमध्ये अस्ति। नारायणतीर्थस्य व्याख्यायां द्वात्रिंशत् त्रयत्रिंशत् च सूत्रद्वयेषु विशिष्टाद्वैतवादस्य प्रभावः परिगण्यते— प्रत्यभिज्ञया जीवरूपेण समाहिते ब्रह्मणि न वैषम्यं परिलक्ष्यते विशिष्टवैशिष्ट्यबुद्धेः ऐक्यत्वात्। अतो द्वादशशतकस्थाद् रामानुजाचार्यात् प्राचीनतरो अयं ग्रन्थ: इति निर्विवादः अस्ति।

*ब्रह्मवैवर्तपुराणस्य* ब्रह्मखण्डे नारदसंबद्धा कथा अपि अस्ति— एकदा ब्रह्मा स्वकण्ठात् नारदं सृष्टवान्— ब्रह्मणोऽपत्यरूपेण नारदः प्रजापतिः, अतः सर्जनार्थं नारदम् आज्ञापितवान् परंतु नारदः सृष्टिकार्यस्य निन्दां कृतवान्, तदा ब्रह्मणः शापात् अवज्ञाकारिणः नारदस्य शरीरं नष्टं जातम्। पश्चात् गन्धमादनपर्वतस्य उपरि गन्धर्वयोनिषु उपवर्हण इति नाम्ना अत्यन्तः कामुकः गन्धर्वरूपेण नारदो जातः, यो जनः पञ्चाशत् गन्धर्वकन्याभिः सह विवाहं कृतवान्, गन्धर्वरूपेण एवं नारदेन गन्धर्वलोके संगीतादिविद्याम् अधित्य सा रे गा मा.. सप्त सुरविद्या मर्त्यलोकम् आनीता। पुनः ब्रह्मणो द्वितीयशापकारणात् कान्यकुब्जप्रदेशे कलावत्याः पुत्ररूपेण नारदो जातः, अस्मिन् जन्मनि तस्य नाम नारदः अभवत्। बालः नारदो जातिस्मरो ज्ञानी च आसीत्— जातिस्मरो महाज्ञानी तेनायं नारदाभिद:। ब्राह्मणैः गोपपुत्रः नारदः विष्णुभक्तिः उपदिष्टा, तदा बालनारदः विष्णुमन्त्रानुष्ठानेन मन्त्रप्रभावात् भगवतः क्षणिकमात्रं दर्शनं प्राप्तवान्, परंतु बालकस्य पश्चातापेन आकाशवाणी घोषिता यत्—

नारदस्य अस्मात् शरीरात् निर्गमनात् परं तस्य भगवद्दर्शनेन सह अविच्छिन्नरूपेण भगवतः सान्निध्यम् अपि प्राप्स्यति। अतः ब्रह्मपुत्र-उपवर्हणगन्धर्व-दासीपुत्र-भागवत्पार्षद एवं नारदस्य क्रमान्वयेन जन्म उद्भवो वा आसीत्। दक्षप्रजापतेः शापकारणात् नारदः सदैव पर्यटयति स्म। सर्वान्तर्यामी सर्वव्यापी परमेश्वरस्य मनस्वरूपः आसीत् नारदः, देवर्षेः नारदस्य  लोकत्रयेषु तथा चतुर्दशभुवनेषु अप्रतिहता गतिः प्रसिद्धा अस्ति।

> भगवद्भक्त्या गीतं नृत्यं च गायति परान् प्रेरयति च स नारदः।
> नारदस्य शरीरं परमं दिव्यं पाञ्चभौतिकक्षेत्रेभ्यः परं यतः।। इति

देवर्षेः नारदस्य बाह्यस्वरूपवर्णनायै [13] *श्रीमद्भागवत्पुराणे* देवर्षिः नारदो जटाधारी वीणोपेतो नारायणभक्तः परमतेजस्वी ऋषिः आसीत्। *भागवत्पुराणस्य* दशमस्कन्धे देवर्षेः नारदस्य आन्तररूपवर्णनायां[14] देवर्षिः नारदः संयमी ज्ञानी पूर्णकामो नैष्ठिकब्रह्मचारी आसीत्। *अग्निपुराणस्य* प्रथमे भागे देवर्षिः नारदः प्रवक्तारूपेण दृश्यमानः अभवत्। अग्निदेवसकाशाद् ऋषिः वसिष्ठो रामायणमूलकं ज्ञानं श्रुतवान्, एतदेव *रामायणं* यस्य प्रवक्ता देवर्षिः नारदः श्रोता च महर्षिः वाल्मीकिः आसीत्। नारदसमीपे श्रीरामचरित्रम् आकर्ण्य महर्षिः वाल्मीकिः *रामायणं* रचितवान्।

> रामायणमहं वक्ष्ये नारदेनोदितं पुरा।
> वाल्मीकये यथा तद्वत् पठितं भुक्तिमुक्तिदम्।। (अ.पु. ५.१)

तथा हि व्यासदेवस्य अप्रसन्नतां श्रुत्वा देवर्षिः नारदः कथितवान्—

> यथा धर्मादयश्चार्था मुनिवर्यानुकीर्तिताः।
> न तथा वासुदेवस्य महिमा ह्यनुवर्तिता।

अनुमीयते *श्रीमद्भागवतस्य* रचनाकालः षष्ठशतकम्, देवर्षेः नारदस्य अनुप्रेरणायाम् वेदव्यासेन *श्रीमद्भागवतं* विरच्यते अतः देवर्षेः नारदस्य समयकालः षष्ठशताब्द्याः पूर्वं स्यात्। *स्कन्दपुराणस्य* वैष्णवखण्डे देवर्षिणा नारदेन कार्तिकमासस्य माहात्म्यवर्णनप्रसङ्गेन *भागवत्पुराणे* च शिष्यध्रुवं प्रति देवर्षिणा नारदेन द्वादशाक्षरमन्त्रोपदेशो  'ॐ नमो भगवते वासुदेवाय' मन्त्रेणानेन नारदस्य भक्तिविषये महिमा व्यज्यते। नारदमुनिः विविधविद्यासु उपदेष्टा आसीत्। नारदप्रणीता *नारदस्मृतिः* यत्र धर्मशास्त्रमूलक उपदेशोऽस्ति। एवं परमोपासनाक्रियायोगप्रधानं *नारदपञ्चरात्रं* नारदमुनिना प्रणीतम्। अनन्तरं प्रेमप्रधानं *भक्तिदर्शनं* देवर्षिणा विरच्यते।

देवर्षेः नारदस्य उल्लेखः उपनिषदि ब्राह्मणग्रन्थेषु च न प्राप्यते, वरं च काव्येषु रामायण-महाभारतादिषु विविधपुराणेषु *श्रीमद्भागवत्पुराणे* च प्राप्यते। महर्षेः शाण्डिल्यस्य नामोल्लेखः *श्रीमद्भागवत्पुराणे* गोचरीभूयते।–

इतिहाससमिमं पुण्यं शाण्डिल्योऽपि मुनीश्वरः।
पठते चित्रकूटस्थो ब्रह्मानन्द परिलुप्तः।। (श्री.भा.मा. ५. ८६) इति।

पुराणेषु *नारदपुराणस्य* अस्तित्वं नारदमुनेः विद्यमानतां दर्शयति। देवर्षिणा नारदेन *नारदभक्तिसूत्रे* महर्षेः शाण्डिल्यस्य नाम उल्लिख्यते—

आत्मरत्यविरोधेनेति शाण्डिल्यः।।

नारदस्य काल ईसापूर्व-सप्तमशताब्द्या अग्रवर्ती, तस्मात् शाण्डिल्यः पूर्ववर्ती। *नारदभक्तिसूत्रं* निश्चित्रूपेण उपनिषत्परवर्तियुगे एव श्रूयते। *शाण्डिल्यभक्तिसूत्रस्य* अपेक्षया *नारदभक्तिसूत्रम्* अधिकतरं सुनियोजितं सुव्यवस्थितम् अस्ति। कालक्रमेण पूर्वापेक्षया परवर्तिनि अधिकतरं कृतिपूर्णं भवति। एतेन नारदः परवर्ती शाण्डिल्यश्च पूर्ववर्ती सिध्यति। महर्षिः शाण्डिल्यः गर्गमुनिं कौण्डिन्यं च दीक्षां दत्तवान्, अस्य गर्गाचार्यस्य कौण्डिन्यस्य च उल्लेखः *नारदभक्तिसूत्रे* प्राप्यते। एतेन *शाण्डिल्यभक्तिसूत्रस्य नारदभक्तिसूत्रात्* प्राचीनता परिलक्ष्यते। शाण्डिल्यस्य भावना बुद्धिदीप्ता तथा नारदस्य चेतना अतीव आवेगप्रवणा व्यावहारिका च अस्ति। *शाण्डिल्यभक्तिसूत्रं* बहुलं ज्ञानगर्भितं तर्कसंमितं च, यत्र उपनिषदः दर्शनस्य च आधारेण ईश्वरप्राप्तेः मार्गो दर्शितः अस्ति।

नारदाचार्येण *नारदपञ्चरात्रस्य* शाण्डिल्याचार्येण *शाण्डिल्यसंहितायाः* च लेखनात् परम् उभौ भक्तिसूत्राणि रचितवन्तौ, येषु भक्तिसूत्रेषु स्पष्टतया पाञ्चरात्रागममतस्य प्रभावः परिलक्ष्यते। विंटरनित्जः *महाभारतस्य* रचनाकालः ख्रिस्टपूर्वाब्द-चतुर्थशतकात् ख्रिस्टाब्द-चतुर्थशतकपर्यन्तं स्वीक्रियते। पाञ्चरात्रस्य अस्तित्व-कालः ख्रिस्टाब्द-चतुर्थशताब्द्याः पूर्वं निश्चितरूपेण सिद्धति। पाणिनेः कालः ईसापूर्व-सप्तमशताब्द्याः पूर्वं परमात्मार्थक-वासुदेवशब्दस्य व्यवहारः दृश्यते तथा वासुदेवस्य आराधनापरकशास्त्रं *पाञ्चरात्रशास्त्रं* समाजे तदा विद्यते। महर्षिः शाण्डिल्यः यदा वेदचतुष्टयेषु परं श्रेयं न साक्षात्कृतवान् तदा सः पाञ्चरात्रस्य सहायतायां *शाण्डिल्यसंहितां* विरचितवान्, अतःपरं पाञ्चरात्रमतम् अनुसृतवान्। अतः एतेन परामृश्यते नारदमुनेः समयकालः शाण्डिल्यात्परम्। एवं *श्रीमद्भगवद्गीतायाः श्रीमद्भागवतपुराणस्य* च आधारे निर्मितत्वाद् भक्तिसूत्राणां ततोऽर्वाचीनत्वं प्रतीयते। *शाण्डिल्यभक्तिसूत्रे* 'सैकान्तभावे गीतार्थप्रत्यभिज्ञानात्' इत्यस्मात् *श्रीमद्भगवद्गीतायाः* अर्वाचीनत्वं गण्यते। अपि च 'परां कृत्वैव सर्वेषां तथा ह्याह' इति सूत्रं

*श्रीमद्भागवतः* प्राचीनत्वं सूच्यते। एवं च पञ्चम-दशमशताब्दीमध्ये एव भक्तिसूत्राणां निर्माणकाल इति गण्यते।

## ४. शोधोद्देश्यं शोधपरिधिश्च

### ४.१. शोधोद्देश्यम्

मम गवेषणायाः विषयः '*शाण्डिल्यभक्तिसूत्रे तथा नारदभक्तिसूत्रे भक्तिलक्षणं तत्स्वरूपं च*' इति। *शाण्डिल्यभक्तिसूत्रं* तथा *नारदभक्तिसूत्रं* एतयोः ग्रन्थयोः भक्तिदर्शनजगति मुख्यं स्थानम् अस्ति। ईश्वरप्राप्तेः मुख्यः स्रोतः प्रेम एव, तत्प्रेमविषयकं निर्वचनं प्राप्यते *शाण्डिल्यभक्तिसूत्रे* तथा *नारदभक्तिसूत्रे।* अस्याः भक्त्याः चर्या संसारं प्रति वैराग्यं जनयित्वा भगवति प्रेमप्रसारणाय सहायका भवति। भक्तिः प्रीति-ध्यान-श्रद्धा-प्रेम-त्याग-यज्ञ-पूजा-दानादिशब्दैः प्रतिपाद्यते। भगवत्प्रेम सत्त्वगुणान्वितं नैतिकमूल्यं सात्त्विकजीवनदर्शनं च जागृत्य भौतिकजीवने आध्यात्मिकतायाः आस्वादम् आनयति। प्राचीनभारतस्य संस्कृतौ वैचित्र्यधारायां ज्ञानपरम्परायां यागतपोमन्त्रपाठादिषु च भक्त्याः प्रभावः अस्ति। उभौ भक्तिसूत्रौ कृष्णभक्त्याः प्रबलसमर्थकौ स्तः, यतः अत्र व्रजगोपिकानां भक्तिः आदर्शरूपेण चित्रिता अस्ति।

अतः *शाण्डिल्यभक्तिसूत्रे* भक्तिस्वरूपम्, गौणभक्तिः, पराभक्तिः, साधनभक्तिः कथं प्रेमभक्तौ परिणता भवति, भक्ति-ज्ञानयोः परिपूरकता, माया, ब्रह्म, भक्तिप्रक्रिया, भक्तिफलं च एतेषां विषयाणाम् अपि विश्लेषणम् अस्ति। अपि च *नारदभक्तिसूत्रे* परमभक्तिस्वरूपम्, परमभक्तिमहत्त्वम्, भक्तिसाधनानि, प्रेमस्वरूपम्, भक्तेः महिमा च एतेषां तत्त्वानां तथैव निष्कामभक्तः, भक्त्याः फलम्, भक्तिरसः, भक्त्याः सामाजिकतायां प्रभावः, पुरुषार्थरूपेण भक्तेः उपस्थापनं, गोपिप्रेम, ईश्वरश्च – एतेषां विषयाणाम् उल्लेखः प्राप्यते।

*शाण्डिल्यभक्तिसूत्रे छान्दोग्योपनिषदः तैत्तिरीयोपनिषदः श्वेताश्वरोपनिषदः ब्रह्मसूत्रस्य महाभारतस्य श्रीमद्भागवत्-नृसिंह-विष्णुपुराणानां* प्रभावः तथा *श्रीमद्भागवद्गीतायाः* दार्शनिकतत्त्वं बहुलम् उपलभ्यते। *शाण्डिल्यभक्तिसूत्रे* आध्यात्मिकतायाः प्राचुर्यं *नारदभक्तिसूत्रे* च प्रेमभक्त्याः प्राचुर्यं परिलक्ष्यते। *शाण्डिल्यभक्तिसूत्रे* वेदान्तसाङ्ख्ययोः प्रभावात् निर्गुणभक्तिं इत्यत्र अतीव गुरुत्वम् आवहति *नारदभक्तिसूत्रे* च विशेषतः पौराणिकतथ्यसमन्वयात् सगुणभक्तिं प्राधान्येन इत्यत्र उपस्थाप्यते।

अस्य अनुसन्धानस्य उद्देश्यं *शाण्डिल्यभक्तिसूत्रेषु* अन्तर्गतभक्तितत्त्वानां तथा *नारदभक्तिसूत्रेषु* अन्तर्गतभक्तितत्त्वानां विश्लेषणं भक्तिशास्त्रस्य अभ्यर्हितत्वं प्रदर्शनमेव च।

**४.२. शोधपरिधिः**

अध्यायषटकेन गवेषणाकार्यक्रमो विन्यस्तो भवति।

प्रथमे अध्याये शोधविषयः शोधकर्मपद्धतिश्च आलोच्यते। अस्मिन् अध्याये भूमिका, *शाण्डिल्यभक्तिसूत्र*-ग्रन्थस्य तथा *नारदभक्तिसूत्र*-ग्रन्थस्य परिचयः, *शाण्डिल्यभक्तिसूत्रं* कथं *नारदभक्तिसूत्रस्य* पूर्ववर्ती?, शोधोद्देश्यं शोधपरिधिश्च, *शाण्डिल्यभक्तिसूत्रे* शाण्डिल्यस्य भक्तिलक्षणेन सह *नारदभक्तिसूत्रे* शाण्डिल्यकृत-भक्तिलक्षणस्य प्रासङ्गिकता इत्यादिकम् आलोच्यते।

द्वितीये अध्याये भक्तिशास्त्रम् इत्यंशे भक्ति-शब्दस्य व्युत्पत्तिः, *वैदिके उपनिषदि श्रीमद्भागवते* दै*वीमीमांसादर्शने भक्तिरसायने* च भक्तिलक्षणम्; अपि च नवधा भक्तिविमर्शः इति विषयम् आश्रित्य आलोकपातं क्रियते।

तृतीयाध्यायस्य नाम *शाण्डिल्यभक्तिसूत्र*-समीक्षणम्। तत्र *शाण्डिल्यभक्तिसूत्रे* भक्तिलक्षण-विमर्शः, भक्त्याः परिपक्वता, भक्त्या महिमा च इत्यादिकम् आलोचनम् इत्यत्र उपन्यस्यते।

चतुर्थाध्यायस्य नाम *नारदभक्तिसूत्र*-विमर्शः, *नारदभक्तिसूत्रे* भक्तिलक्षणम्, प्रेमभक्तिस्वरूपम्, *नारदभक्तिसूत्रस्य* उपादेयता च इत्यादिविषकम् आलोचनं प्रतिपाद्यते।

पञ्चमे अध्याये भक्तियोगस्य महत्त्वम्, दार्शनिकनयेन वैष्णवभक्तिः इत्यादि विषये चर्या अस्ति।

षष्ठाध्यायस्य नाम सिद्धान्तितः निर्णयः इति।

## ५. *शाण्डिल्यभक्तिसूत्रे* शाण्डिल्यस्य भक्तिलक्षणेन सह *नारदभक्तिसूत्रे* शाण्डिल्यकृत-भक्तिलक्षणस्य प्रासङ्गिकता

*नारदभक्तिसूत्रे* नारदाचार्यः कथयति—

आत्मरत्यविरोधेन शाण्डिल्यः। इति।

इत्यत्र आत्मनि रतिः परामृश्यते अर्थात् आत्मनि प्रेम एव सूच्यते, अविरोधेन न विरोधेन, आत्मनो व्यतिरिक्तं अन्येषु सर्वेषु पार्थिवसुखादिविरोधिषु उदासीनताप्रदर्शनं शाण्डिल्यमते भक्त्याः स्वरूपम् अस्ति। भक्तस्य  हृदि निगुढो यः ईश्वरो वसति स परमात्मा। सर्वप्राणिषु विराजमाने अद्वितीये परमात्मनि प्रेमैव भक्तिः। आत्मनि तृप्ते सति परमात्मनः तृप्तिर्जायते। आत्मरति[15] आत्मनि एव रतिः यस्य सः, आत्माभिमुखः यः पुमान् स्वस्मिन् एव तृप्तो भवति रमते वा इत्यर्थः आयाति। *श्रीमद्भगवद्गीतायाम्*—

> यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
> आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते।। (श्री.भ.गी. ३.१७)

यदा पुंसः बाह्यवस्तु प्रति अविद्यमाने रागे केन्द्रीभूतं प्रेम केवलं स्वात्मनि एव भवति तदा आत्मरतिः इत्युच्यते। *अमरकोशे* ज्ञानस्य परिभाषा दीयते— मोक्षे धीर्ज्ञानम्। प्रत्यभिज्ञादर्शने प्राप्यते मोक्षो निर्मलः शुद्धचैतन्यः आत्मानुभवः श्रद्धासंविन् आत्मादिरूपः, वस्तुतः तत्रापि श्रद्धाशब्दस्य प्रयोगो दृश्यते। अतः श्रीमधुसूदनसरस्वतीकृते *भक्तिरसायने* विशुद्धभक्तेः रसप्रवाहविषये समृद्धालोचना प्राप्यते। भक्त्यां भावः अस्ति। वस्तुतो महाभावो भक्त्यां मन्त्रयोगस्य चरमभूमिस्वरूपा समाधिदशा परंतु भावो महाभावस्य अङ्गः एव च। महाभावः[16] एकात्मकः, सख्य-दास्य-कान्ता-वात्सल्यभावादीनाम् आधारेण नानारूपात्मकाः भवन्ति।

*शाण्डिल्यभक्तिसूत्रे* महर्षेः शाण्डिल्यस्य भक्तिलक्षणमेवम्—

> सा परानुरक्तिरीश्वरे।।

ईश्वरे[17] सगुणब्रह्मणि परानुरक्तिः परमः अनुरागः यदि व्यज्यते तर्हि सा भक्तिः। ईश्वरं प्रति परा अनुरक्तिः एव भक्तिः, इत्यत्र परमेश्वरे प्रेमैव प्राकट्यते। *नारदभक्तिसूत्रे* ईश्वरस्य स्वरूपं न गृह्यते केवलं अस्मिन् इत्यनेन ईश्वरं परामृश्यते तथा *शाण्डिल्यभक्तिसूत्रे* ईश्वरस्य स्वरूपवर्णनं दृश्यते। ईश्वर आत्मन ऐशीशक्त्या मायया जगत्कार्यं साधयति। सा च माया षडैश्वर्यपूर्णा [18] सत्त्वगुणप्रधाना। भगवत्शब्दोऽतीव रहस्यमयो निर्गुणः सगुणोऽपि वा। *शाण्डिल्यभक्तिसूत्रे*—

> ऐश्वर्यं तथेति चेन्न स्वाभाव्यात्। (शा.भ.सू. ४४.१.२) इति।

साधनभजनस्य उद्देश्यं वस्तुतः —भक्तस्य अखिलेन्द्रियाणां पूर्णविकाशं साधयित्वा ज्ञानेन प्रेम्णा आनन्देन च पूर्णरूपेण विभूषीकरणमेव। साधनोपासनाराधनायज्ञादीनां मुख्योद्देश्यं स्वं सर्वविषयान्

संपूरयित्वा भगवति पूर्णरूपेण समर्पणमेव। अज्ञानी यत् कर्म बन्धनकारणाय करोति, ज्ञानी तु तदेव मुक्त्यर्थं भगवत्प्राप्तेः साधनाय परमात्मालाभाय वा करोति इति विचार्यते। अपि च –

उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम्। (शा.भ.सू. २.१.३१) इति।

भक्तिः उभयपरा। यथा भगवतः ऐश्वर्यस्य ध्यानम् आवश्यकं तथैव आत्मज्ञानस्य साधनम् अपि कर्तव्यम्। महर्षेः शाण्डिल्यस्य नये मतद्वयस्य एकवाक्यता परिदृश्यते। जीवब्रह्मणोः यो भेदो विद्यते तत् सत्यम्, जीवब्रह्मणोः ऐक्यं[19] विद्यते तदपि सत्यम्, परंतु सत्यता अधिकारभेदाद् भवति। यदि जीवब्रह्मणोः अभेदः त्वया अवगम्यते तर्हि त्वयि अनुभूयते *तत्त्वमसि* इति ज्ञानं सत्यम्।

पुरुषस्य बाह्यबन्धनछिन्ने सति मुक्तिः लभ्यते दुःखाभावात् परमानन्दः प्राप्यते। आत्मतत्त्वं सर्वोत्तमः सूक्ष्मव्यापारः अस्ति। ध्यानधारणादिमार्गानुसारं सूक्ष्मात्मतत्त्वग्राह्यत्वाद् बाह्यबन्धनात् मुक्तिः भवति। आत्मदर्शनाद् ब्रह्मदर्शनं, ब्रह्मदर्शनाद् ब्रह्मानुभूतिः अन्ते तु ब्रह्मणि अन्तर्भवति। उभयपरा- ईश्वरः तथा जीवात्मा, परमात्मा तथा जीवात्मा, शब्दः- श्रुतिः, उपपत्तिः- युक्तिः, स्वरूपतः आत्मा अकर्ता अभोक्ता केवलं द्रष्टा साक्षी च। 'उभयपरा' यत्र आत्मरतिः तथा परमात्मरतिः द्वयमेव वर्तते। श्रुत्या तथा युक्त्या एतत् सिध्यते यत् पुंसः स्वस्य अन्तःकरणं कदाचिद् आत्मना कदाचिद् वा भगवता योजनीयम्। अन्तःकरणं व्यवहारकाले ईश्वरे साधनाकाले चात्मनि समर्पणीयम्।

तथा हि *श्रीमद्भगवद्गीतायाम्* अपि प्रोच्यते फलाभिसन्धिरहितत्वाद् अनुष्ठितकर्मण: अनन्तरं पापनाशात् मनस: शान्ति: भविष्यति। शान्ते मनसि आत्मध्यानं संपत्स्यते, ध्यानाद् ज्ञानं ज्ञानात् च परा भक्ति: विशिष्यते। भक्तियोगाभ्यासेन असमर्थपुरुषस्य कृते आत्मनिष्ठा एव श्रेयसी भवति।

उल्लेखपञ्जिः

---

1 वेदो भगवद्विधानं श्रीभगवतः चिद्विभूतिः, सच्चिदानन्दो भगवतः चिदंशः , समाजस्य स्थित्यर्थं जीवनसिध्यर्थं शान्तिप्राप्त्यर्थं च ये सामाजिकानुष्ठानानि कर्तव्यानि आसन्, तेषां सर्वेषां सामान्यनाम यज्ञ आसीत्। *Yajñatattva*. Ed. Compiled by Premananda Swamiji and Sadhu Aghornath Gupta. pp-28-29

2 भावात्मकयज्ञस्य लक्ष्यं भगवल्लीलादर्शनं भगवल्लीलानुभवं च भवति। *छान्दोग्योपनिषदि* तथा *बृहदारण्यकोपनिषदि* चमत्कारिकरूपेण सकाम-द्रव्यात्मकयज्ञतः निष्काम-भावनात्मकयज्ञे पर्य्यवस्यति। *माण्डुक्योपनिषदि* भावनात्मकयज्ञेन प्रयोजनं सर्वत्र ब्रह्मलीलात्मक-साक्षात्कारः परिदर्शनं भवति। सर्वसिद्धान्ते ब्रह्मसत्त्वाभ्यन्तरे च सर्वकर्मणाभ्यन्तरे समानप्राणस्य कर्म उपलभ्यते। जपयज्ञः अपि भावनात्मकयज्ञे अन्तर्भवति। द्रव्यात्मकयज्ञः शुद्धिप्रधानः, भावनात्मकयज्ञो भक्तिप्रधानः— अयमेव साधन-भजन-ध्यान-धारणाया अनुकूलः, केवलात्मकयज्ञो ज्ञानप्रधानः—इयमेव सिद्धानुभूतिः। *Ibid*., pp-78-86

3 अयं 'गड्'शब्दः प्राचीनट्यूटानिकभाषायां प्रयक्तात् 'घूतो-म्' (Ghuto-m) शब्दाद् निष्पन्नः भवति घूतो-म् शब्दस्तु संस्कृत-हुतम् शब्दाद् निष्पन्नः इति वदति प्रामाणिकमूर्धन्यो महनीय-आक्सफोर्ड-आङ्गलभाषाकोशः। 'गड्'शब्दस्य मूलभूतः अर्थो विद्यते यज्ञेन उपास्यो देवः, हवनादिभिः पूजितः परमेश्वरः, भक्तैः स्वमनोरथपूर्तिकामुकैः सेवितः सर्वशक्तिमान् भगवान् इति। *Śāṇḍilya Bhakti Sūtra (*With Bhaktichandrikā by Nārāyana Tīrtha), Introduction pp. 6

4 मन तथा मनसः प्रकाश: यस्मिन् विज्ञाने आलोचीयते तत् मानसिकविज्ञानम् यथा— मनोविद्या समाजविद्या नीतिविद्या इत्यादयः। स्पाउट-मते अन्तर्दर्शनं सुस्पष्टरूपेण आत्मचेतनाया: विशेषावस्था भवति। उद्दीपक-पारिपार्श्विक-बाह्यवस्तू जीवदेहे क्रियान्वयेन जीवेषु या प्रतिक्रिया व्यज्यते तद् आचरणम् इति कथ्यते। चेतना (Consciousness) मनसः स्वरूपः धर्मः यथा भवति तथैव स्मृतिः प्रत्यभिज्ञा अभ्यासः सहजातप्रवृत्तिः संवेदनम् प्रत्यक्षः चिन्तनं च अवचेतन मनस: (Sub-conscious) अस्तित्वं निर्देशयति। अवचेतनं मन: न अवदमित-कामना-वासनाया: आवासस्थलम् निर्ज्ञानमनः भवति तथैव च। Sengupta, Promodbandhhu. *Psychology and Social Philosophy*. pp-4, 10th chapter pp- 239-240

5 Debiprasad Chattopadhyay. *Lokāyata Darśana*. Dvitīya khaṇḍa, pp-209

6 तन्त्रम् अस्याः योगसाधनायाः मूलम् इति शशीभूषण-दासगुप्तः कथितवान्। *योगशिखोपनिषदि* कथ्यते—रजसो रेतसो योगाद् राजयोग: इति स्मृत:। *Ibid*., pp 476-477

7 ऋगवेदे मायायाः प्रसङ्गेन म्याकडोनेल महोदयः प्रोक्तवान्—

It has an almost exact parallel in the English word 'craft' which is its old significance meant 'occult' 'power' 'magic' 'skilfulness' art on the one

hand and deceitful skill, wile on the other. The good sense of Maya like that of Asura( which might be rendered by mysterious being) is mainly connected with Varuna and Mitra, while it's bad sense is reserved for demons . Chattopadhyay, Debiprasad. *Lokāyata Darśana*. Tritīya khaṇḍa, Bhāvavāda, pp-62

8 वामा भूत्वा यजेत् पराम्—न केवलम् आचारभेदतन्त्रस्य कथा, वरं च तन्त्रस्य मुख्यं वस्तु। भाण्टारकरमहोदयेन—

The ambition of every followers of the systems to become identical with Tripurasundari, and one of his religious exercise is to habituate himself to think that he is a woman. Thus the followers of the Shakti school justify their appellation by the brief that God is a woman and it ought to be the aim of all to become a woman. *Ibid*. Dvitīya khaṇḍa, pp 354

9 *Ibid*., pp-524

10 सर्वपरिग्रहशून्य: जीविष्यामि इति एवंविधो व्याकुलतारूपः चित्तवृत्तिविशेषः तैः हर्षामर्षभयोद्वेगैः मुक्तो य: अद्वेतदर्शितया तद्योग्यत्वेन तैः एव स्वयं परित्यक्त:। सर्वारम्भपरित्यागी शुभाशुभे सुखसाधनदु:खसाधने कर्मणी परित्यक्तुं शीलमस्येति शुभाशुभपरित्यागी भक्तिमान् प्रिय:। *Śrīmadbhagavadgītā.* Edited by Dr. Nalinikanta Brahma. With Sans. Comm. *Gūḍhārthadīpikā* of Madhusūdana Sarasvatī, 12th chapter—15,17

11 माया तत्त्वप्रतिभासप्रतिबन्धेनातत्त्वप्रतिभासहेतुरावरणविक्षेपशक्तिद्वयवत्यविद्या सर्वप्रपञ्च प्रकृति:। ईश्वराच्च जीवभोगायाकाशादिक्रमेण शरीरेन्द्रियसंघातस्तद्भोग्यश्च कृत्स्न: प्रपञ्च जायते इति कल्पना भवति। बिम्बप्रतिबिम्बमुखानुगतमुखवच्च ईशजीवानुगतं मायोपाधिचैतन्यं साक्षीति कल्प्यते तेनैव च स्वाध्यस्ता माया तत्कार्यं च कृत्स्नं प्रकाश्यते, अत: साक्ष्यभिप्रायेण दैवीति। *Ibid*., 7th chapter—14

12 सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वामिदमभ्यतोयाक्यनाऽदर एव म आत्मान्हदय एतद् ब्रह्मैतमितः प्रेत्यभवि सम्भवितास्मीति यस्य स्याद्दां न विचितित्सा स्तौति हस्माह शाण्डिल्यः शाण्डिल्यः। छा.उ. ३.१४.४। इति।

13 राजदूते ब्रुवत्येवं देवर्षिः परमद्युतिः।
बिभ्रत् पिङ्गलजटाभारं प्रादुरासीद् यथा रविः।।[13] श्री.भाग. १०.७०.३२

[14] पूर्णः श्रुतधरो राजन्नाह वीरव्रतो मुनिः।[14] *तदेव* १०.८८.४५

[15] आत्मरति-शब्दस्य प्रयोगः ध्वन्यते—
प्राणो ह्येष यः सर्वभूतैर्विभाति विजानन् विद्वान् भवते नातिवादी।
आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठः।।[15] इति मु.उ. ४

[16] एक एव महाभावो नानात्वं भजते यत:।
उपाधिभेदभावेन भावभेदो भविष्यति।। इति।

[17] वेदान्तिकनये, तु अखण्डम् अद्वितीयं चेतन्यं मायोपहितम् ईश्वरः भवति। स एव सत्त्वेनोपहितो विष्णुरिति रजसोपहितो ब्रह्मेति तमसोपहितो रुद्र इति चाभिधीयते। न तु लीलाविग्रहमात्रकृतोऽयं भेदः। तथा सति प्रतिकल्पं लीलाविग्रहानन्त्येन ब्रह्मविष्णुरुद्राणाम् आनन्त्यप्रसङ्गात्। अत एव रामकृष्णादयो विष्णोरवतारा इति पौराणिकी प्रसिद्धिरप्युपपद्यते। सत्त्वोपहितं तं लीलाविग्रहम् अङ्गीकरोति। यः च *विष्णुपुराणे* विष्णुः *लिङ्गपुराणे* रुद्रो *देवीपुराणे* देवीत्यभिधीयते स मायोपहितं चैतन्यमेवोच्यते, ब्रह्महरिहराणां तत् मूलत्वाभिधानात्। Angirā Rishi. *Daivī Mīmāṁsā Darśana: Rasapada & Utpattipada*.

[18] ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा।। वि.पु. ६.५.७४

[19] अतः सर्वं खल्विदं ब्रह्म एतत् कथमुच्यते? यदि ब्रह्मणः भिन्नं किंचित् गण्यते तर्हि तस्य अस्तित्वं क्षीणं भवति। अतः कारणात् व्यवहारदशायां जीवब्रह्मणोः भेदः बाध्यतापूर्वकं स्वीक्रियते। विकाशशीलः आत्मा व्यवहारिके जगति कर्मणा ज्ञानं प्राप्यते, यावत्पर्यन्तं परमपदं प्राप्तुं न शक्यते तावत्पर्यन्तं स्वसमृद्धये सामयिकसत्यं स्वीकर्तुं सचेष्टते। *Śāṇḍilya Bhakti Darśanam.* Hindi commentary by Śrī Yogeswar, pp-69

# द्वितीयोऽध्यायः

## भक्तिशास्त्रम्

यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्षसन्निधौ।
तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छया॥ *श्रीमद्भागवत्पूराणम्* ७.५.१४

The Bhakti process purifies the living entity of all unnatural attractions. When one is purified he is attracted by Kṛṣṇa and begins to serve Kṛṣṇa instead of serving māyā. This is his natural position.

# द्वितीयोऽध्यायः

## भक्तिशास्त्रम्

### १. भक्तिशब्दस्य व्युत्पत्तिः

भज् सेवायाम् इति (धातुपाठः १.११५३) धातोः भावे भ्वादिगणीयः स्त्रियां क्तिन् प्रत्यययोगेन भक्तिशब्दो निष्पद्यते। पूज्येष्वनुरागो भक्तिः इत्यस्य *उपबृंहणे*—भक्तिः सर्वदा आसक्तिः अनुरागः इत्यर्थो ध्वन्यते। निघण्टुकारमते, सेवा भक्तिरूपा प्रेमपूर्वकसेवा। *गरुडपुराणे* निगदितम्—

भज इत्येष वै धातुः सेवायां परिकीर्तितः
तस्मात् सेवा बुधैः प्रोक्ता भक्तिः साधनभूयसी।। (ग.पु.)

भक्तिशब्दस्य आङ्गलप्रतिशब्दः भवति Devotion, Devotion इति विशेष्यपदं ल्याटिनशब्दः Vovēre इत्यस्मात् आगम्यते। पाणिनीयसूत्रेषु वासुदेवार्जुनाभ्यां वुन् (अष्टा. ४.३.९८) इति सूत्रेण वासुदेवे भक्तिमतां वासुदेवाश्रितार्थके शब्दे प्रत्ययविधानात् पाणिनिसमये वासुदेवप्रधानको भक्तिसंप्रदाय आसीत्। वसुदेवस्य अपत्यं वासुदेवः इति व्युत्पत्त्या वासुदेवशब्दो निष्पद्यते। वसति सर्वत्र इति वासुः,वसन्ति सर्वाणि अस्मिन्निति वा वासुः, वासुश्चासौ देवो वासुदेवः इत्यनेन विष्णुः तथा विष्णोः अवतारः श्रीकृष्णश्च द्वयमेव वासुदेवशब्दात् निरूप्यते। भज् धातोः अर्थः आत्मसमर्णम्। ध्यानशब्दवाच्या भक्तिर्विद्याभेदाद् बहुविधा भवति।

भगवति श्रीकृष्णे संपूर्णतया मनःनिवेशनेन पूजनेन श्रीविग्रहस्य संमुखं दण्डवत्प्रणतिनिवेदनेन च भक्तस्य हृदि अविचला भक्तिः जागर्ति। आत्मसमर्पणेन गीताज्ञानं लभ्यते—

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः।। (श्री.भ.गी. ९.३४) इति।

व्याकरणानुसारेण भक्तिः त्रिविधा व्युत्पाद्यते— भजनं भक्तिः— भजनं नाम रसनमेतत् श्रुतिषु श्रुयते। रसास्वादनमेवात्र प्रत्ययेन प्रतीयते। भजनं नाम सेवनं भक्तिशब्दितम्, फलाभिसन्धानशून्या सेवैव भक्तिः। मनसा अन्यैश्च ज्ञानेन्द्रियैः हरेः एकान्तसेवनं कर्तव्यम्। भजनं चिन्तनं चोक्तं भगवन्मात्रगोचरम्। भञ्जनं भक्तिः भञ्जो आमर्दने—कर्मग्रन्थि-हृदयग्रन्थि-अधर्मसंस्कार(राजस-तामस-काम-लोभादिकम्)-कलिमलादीनां निराकरणं भञ्जनमेव भक्तिः। भागो भक्तिः— यथा जीवात्मा परमात्मनः अंशः इति चिन्तनमेव भक्तिः। *गोपालतापिन्युपनिषदि* श्रुतिः आह—

> भक्तिरस्य भजनं तदिहायुत्रोपाधिनैराष्येनामुष्मिन् मनः कल्पनमेत् देवदेव नैष्कर्म्यम् (*गोपालतापिन्युपनिषद्* १.५)।

*भक्तिरसायने* फलसाधनभेदेन भक्त्याः द्वैविध्यम् आपद्यते। भजनम् अन्तःकरणस्य भगवदाकाररूपं भक्तिरिति भावव्युत्पत्त्या भक्तिशब्देन फलम् अभिधीयते। तथा भज्यते सेव्यते भगवदाकारमन्तःकरणं क्रियते अनेनेति करणव्युत्पत्त्या भक्तिशब्देन श्रवणकीर्तनादिसाधनम् अभिधीयते।

## १.१. वैदिकी भक्तिः

वेदिकसाहित्यस्य विकासकालः ६000-१२00 ईसापूर्वः। ऋग्वेदकालः १५00—१२00 ईसापूर्वः, वैदिकसाहित्ये भक्तिशब्दस्य प्रयोगो यादृशः प्राप्यते तत्र कुत्रापि भक्तेः प्रेमसंबन्धस्य अनुभूतिः न प्रतिध्वन्यते। वेदे भक्त्यर्थं श्रद्धाशब्दस्य[1] प्रयोगः बहुलं दृश्यते। वैदिकमन्त्रे देवान् प्रति यत् प्रार्थनावाक्यम् उच्चार्यते तत् दानध्यानाद्यावेदनं परामृश्यते। अपौरुषेयो वेद एव भगवत्स्वरूपः अस्ति। ऋग्वेदः सर्वप्राचीनः, तत्र आचारसंहितायां देवस्तुतिछन्दादीनां वर्णना प्राप्यते—

> त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ, अधा ते सुम्नमीमहे। (अथर्ववेदः २०.१०८.२) इति।

हे परमेश्वर! त्वम् अस्माकं पालनकर्ता तथा हे शतक्रतो! त्वम् अस्माकं माता निर्माणकर्त्री, अतः तव सकाशे सुखकामाय प्रार्थना ध्वन्यते। तथैव *ऋग्वेदे* राधाया वर्णनं पवित्रभक्तिं व्यनक्ति—

> इदं ह्यन्वोजसा सुतं राधानां पते। पिबा त्वस्य गिर्वणः।। (ऋ. ३.५१.१०)

हे राधापति श्रीकृष्ण! वेदमन्त्रोऽपि त्वया जप्यते, अतः 'सोमरसं पिबतु' इत्यत्र राधापतिरूपेण श्रीकृष्णः एव परामृश्यते न तु इन्द्रदेवः। अपि च वेदेषु अग्निः कदापि परब्रह्म कुत्रापि प्राणाग्निः क्वापि वा स्थूलाग्निरूपेण वर्ण्यते। ऋग्वेदसंहितायाः विश्वामित्रस्य *अग्निसूक्ते* प्रथममन्त्रोऽयम्—

> ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातमम्।।

इत्यत्र अग्निशब्दः परमेश्वरस्य वाचकः, अत्र होता पुरोहितं सर्वेषां पुरः अग्रे हितं विद्यमानं यज्ञस्य देवं प्रकाशकम् अग्निदेवं स्तौति, अग्नेः विशेषणं देवः इति, यास्काचार्येण द्युस्थानं दिव्यम् इति कथ्यते, दिव्योऽग्निः परमात्मा परमेश्वर इज्यते इत्यत्र भक्तिरेव व्यज्यते। वैदिकवाङ्मयस्य अनुशीलनेन निष्कर्ष एषो निःसरति यद् यथा वेदो ज्ञानकर्मणोरुद्गमस्थलं तथैव भक्तेरपि मूलं स्रोतो वेद एव विद्यते। यद्यपि

वेदेषु स्पष्टतया भक्तिशब्दो न उपलभ्यते, तथापि वेदमन्त्रेषु देवानां स्तुतिषु शान्तिमन्त्रेषु वा श्रद्धा एव प्राकट्यते।

तमु स्तोतारः पूर्व्यं यथा विद ऋतस्य गर्भं जनुषा पिपर्तन।
आस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे।। (ऋ. १.१५६.३)।

अस्मिन् वेदमन्त्रे भगवतः स्तुतिः विधीयते। जन्मानि पूर्णं कुरु, इत्यत्र जन्मनः पूर्णता कृतार्थतायाः एव कारणात्, कृतार्थता अपि स्तुतिः रसरूपकारणतया भवति। यजेः 'यजयाचयतविच्छप्रच्छरक्षो नङ्' यजनम्। इज्यन्ते अत्र देवताः। ऋग्वेदे धर्मस्य मुख्यं केन्द्रम् आसीत् यज्ञः तत्संबद्धाचारानुष्ठादिकं च मुख्यरूपेण वर्तते। आर्याः ऋग्वेदस्य स्तोत्रेषु धर्मस्य प्रारंभिकरूपं साक्षात्कुर्वन्ति। ते प्रकृतिपूजका आसन्, ऋग्वेदे अग्नि-वायु-इन्द्र-वरुण-पृथ्वी-अदिति-उषा-सरस्वती-देवेभ्यः मन्त्रादिना स्तुतिः प्राप्यते, प्रथममण्डलान्तर्गते *वायुसूक्ते* प्राप्यते—

ऋतेन मित्रावरूणावृतावृधावृतस्पृशा।
क्रतुं बृहन्तमाशाथे।।

यज्ञवाची ऋतशब्दः इत्यत्र सत्यहेतवे व्यवह्रियते। अपि च,

इन्द्रायाहि धियेषितो विप्रजूतः सुतावतः। उप ब्रह्माणि वाघतः।।—

इत्यस्मिन् मन्त्रे इन्द्रदेवस्य आवाहनं सूच्यते, ऋत्विजो ब्रह्माणि वेदरूपानि स्त्रोत्राणि ग्रहीतुम् अस्माकं प्रज्ञया निवेशनेन वा प्रयोजनम् अस्ति परंतु सायणाचार्येण अस्मद्भक्त्या प्रेरितः इत्यर्थः सूच्यते। वेदे ब्रह्मणशब्दो यदा आद्यपुदात्तः तदा तस्य अर्थः स्तुतिः एव दर्शयति।

भक्तिभावनायाः प्राकट्यं वरुणसूक्तेषु सर्वाधिक्यम् उपलभ्यते। वैदिकदेवेषु वरुणस्य स्थानं महत्वपूर्णम् अस्ति। स विश्वतश्चक्षुः धृतव्रतः सुक्रतुः सम्राट् च अस्ति। स सर्वज्ञः, स्रोतृणां मते वरुणः करुणाया आस्पदभूतः आसीत्। स अपराधिभ्यो दण्डं प्रयच्छति। स ऋतस्य नियामको निर्माता च। स्तोता ऋषिरपराधक्षमापनार्थं मङ्गलप्रदानार्थं च प्रार्थयते—

य आपिर्नित्यो वरुणः प्रिय सन् त्वामागांसि कृणवत् सखा ते।
मा त एनस्वन्तो यक्षिन् भुजेम यन्धि ष्मा विप्रः स्तुवते वरूथम्।। (श्री.भाग. ७.८८.६)
इति।

एवं तटस्थरूपेण उपलब्धानां भक्तिमन्त्राणां निदर्शनं परिलक्ष्यते परंतु प्राचीनाचार्याणां मतानुसारं साक्षाद्रूपेण भक्तितत्त्वस्य समर्थनम् उपलभ्यते एतेषु मन्त्रेषु।

### १.२. उपनिषत्सु भक्तिः

उपनिषदो भक्तिः परमात्मना सह जीवात्मनो व्याकुलतां तथा निर्विशेषभावेन ईश्वरप्रीतिं परामृशति। उपनिषदि भक्providedाराध्यदेवयोः विशेषसंबन्धो न सूच्यते। उपनिषदीयभक्तिस्तु मूलतः अद्वैतभक्तिः निर्गुणवादिनो भक्तिरूपेण गण्यते। वस्तुतो *भागवत्पुराणे भगवद्गीतायां* च वासुदेवस्य उपासनायां भक्तिधर्मः सर्वप्रथमं सुनिर्दिष्टरूपेण परिणमते। प्रसङ्गेऽस्मिन् डः सुशीलकुमार दे महोदयः तस्य *Early History of The Vaisnava Faith  and Movement in Bengal* इति ग्रन्थे प्रोक्तवान्—

> But it emerges in a more or less definite form in the  Bhāgavatism and   Kṛṣṇa-Vāsudeva worship of the *Bhāgabadgīta*.

*श्रीमद्भगवद्गीतामाहात्म्ये* सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः इत्युक्त्वा व्यासदेवेन स्पष्टतया उपनिषदो माहात्म्यम् उद्घाटितम्। एतेन परिगण्यते उपनिषत्कालात् गीताकालस्य व्यवधानं यथेष्टम्, कारणं बुद्धदेवस्य आविर्भावात् पूर्वमेव उपनिषदो रचितवत्यः। उपनिषदः कालः १000-३00 ईसापूर्वः। *श्वेताश्वतरोपनिषदि* प्रथमतः स्पष्टतया भक्तिशब्दस्य प्रयोगो दृष्टिपथमायाति—

> यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ।
> तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।। (श्वे.उ. ३.६.२३) इति।

*मुण्डकोपनिषदि* गुरुभक्तिः—

> तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। (मु.उ. १.२.१२)

*रघुवंशे* गुरुभक्तिः द्योत्यते—

> भक्त्या गुरौ मय्यनुकम्पया च प्रितास्मि ते पुत्र वरं वृणीष्व। (र.वं. २.६३)
> भवति विरलभक्तिर्म्लानपुष्पोपहारः। (र.वं. ५.७४)

असूयावर्जितो भूत्वा अखिलं जगद् आलिङ्ग्य सुन्दरस्य साधना अनुसरणीया। *ईशोपनिषदि* प्रोच्यते—

> यस्मिन् सर्वाणि भूतानि आत्मन्येवानुपश्यति।
> सर्वभूतेषु चात्मानं ततो न विजुगुप्सते।। (ई.उ. ६) इति।

यदा साधकः स्वस्मिन् समग्रं जगत् समग्रे जगति च स्वं साक्षात्करोति, तदा साधकः सर्वत्र समानम् आत्मानं पश्यति। नापि कस्योपरि साधकः देष्टि, साधकस्य एषा भावना भक्तिमेव दर्शयति। *छान्दोग्योपनिषदि* भारतीयसंस्कृतेः मूलधारणा प्राप्यते—

स एष रसानां रसतमः परमः परार्द्ध्योऽष्टमो यदुद्गीथः॥ (छा.उ. १.३)

इत्यत्र रसशब्दस्य प्रयोगो दृश्यते, स्पष्टतः रसेन आनन्दः अभिव्यज्यते। विष्णुबुद्धिकारी आलम्बनयोग्यः प्रतिमा इव परमात्मबुद्धिकारी आलम्बनयोग्य इत्यर्थ आयाति, यत्तु भक्तिमेव दर्शयति।

प्राग्बौद्धान्तर्गते *तैत्तिरीयोपनिषदि* प्राचीनभारतीय-समावर्तनभाषणमाध्यमेन भक्तिवादस्य वैशिष्ट्यं विश्लेष्यते, शिक्षावल्ल्यां शिष्याय केवलं शिक्षकैः अभिरूच्यनुसारम् आध्यात्मिकज्ञानं उपलभ्यते—सत्यं वद यथाप्रमाणावगतं वक्तव्यं तद्वद। धर्मं चर। स्वाध्यायान्मा प्रमद। धर्मशब्दस्य अनुष्ठेयविषयत्वाद् अननुष्ठानं प्रमादः स न कर्तव्यः। तथा मातृदेवो भव एवं पितृदेवो भव आचार्यदेवो भव—तात्पर्यमेवमायाति यत् सर्वेषां देवसदृशः पूजनीयः— यानि शिष्टाचारलक्षणानि कर्माणि सेवितव्यानि नियमपूर्वकं कर्तव्यानि, इत्यत्र सेवारूपा श्रद्धारूपा भक्तिः *उपनिषदि* पुनः पुनः प्राकट्यते। श्रद्धा भक्तेः साधनम्, श्रत् दधाति इति श्रद्धा, एवमेव गुरुं पितृवत् मातृवत् भगवत्सदृशो वा अनुरक्तिप्रदर्शनरूपा सेवा परिलक्ष्यते। श्रत् सत्यम्, तस्मिन् धीयते। धर्मार्थसुखापवर्गेषु यथाशास्त्रमधिकृतः पुरुपम्य कर्मानुष्ठानहेतुभावप्रख्यानात् बुद्ध्यधिदेवता श्रद्धा।[2]

*बृहदारण्यकोपनिषद्* भक्तिरसस्य इङ्गितं वहति —

यथा पियसा स्त्रिया संपरिसक्तो न बाह्यं किंचन वेद नान्तरसे वसेवायं—
पुरुषः प्राज्ञेनात्नना सं परिषक्तो न बाह्यं किंचन वेदनान्तरम्॥ (बृ.उ. ४.३.१) इति।

इत्यत्र *उपनिषदि* मूलतो ज्ञानप्राधान्यं परिलक्ष्यते तथापि इत्यत्र परमात्मनः आलिङ्गनरूपो भक्तिरसः ध्वन्यते। उपनिषत्सु च चित्तवृत्तिनिरोधात्मकेन योगेन पुष्टं साधकानां हृदयं भक्तिं प्रति अधिकमाकर्ष्यते।

*मुण्डकोपनिषदि*—

यदेव विद्यया करोति, श्रद्धया, उपनिषदा तदेव वीर्यवत्तरं भवति। (मु.उ. १.१. १०)

यथा *कठोपनिषदि*—

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यः तस्यैष आत्मा विवृणुते तनुं स्वाम्।। (क.उ. २.२३)
इति।

अत्र आत्मशब्दः पुरुषोत्तमवाचकः, प्रवचनं नाम सस्वरेण वेदाध्ययनं परामृश्यते। अत्र स्वपदस्य आत्मीयवाचकत्वेन स्वीयत्वेन वरणे सर्वात्मभावरूपां पुष्टिभक्तिं व्यनक्ति। अनया वरणश्रुत्या वरणस्य मर्यादापुष्टिभेदेन द्वैविध्यम् आपद्यते। मर्यादापक्षे विहितानि साधनानि पुष्टौ तु वरणमेव साधनम्। पुष्टौ तु भगवदनुग्रहेणैव सर्वपापक्षयो भवति। वक्तव्यम् इदम् आत्मज्ञानम् उपरि परंतु उच्यते यमात्मा वृणुते एवमेव भक्तिरायाति।

*कैवल्योपनिषदि* भक्तिशब्दस्य प्रयोगो दृश्यते—

श्रद्धाभक्ति ध्यानयोगा देवेहि।[3]

श्रद्धायाः परिभाषा *उपबृंहणे*— श्रद्धा नाम गुरुचराद्युपदिष्टेऽर्थे आस्तिक्यबुद्धिः। परं ब्रह्मैतद्यो ध्यायति रसति भजति सोऽमृतो भवति, इत्यत्र भक्तिः फलरूपा, परब्रह्मश्रीकृष्णे स्नेहत्वात्। आत्मानमेव लोकमुपासीत (बृ. उ. १.४. १५) सत्त्वशुद्धौ ध्रुवा स्मृतिः, स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः (*छा.* उ. ७.२६.२) भिद्यते हृदयग्रन्थिः (*मु*.उ.२.२.८)—इत्यादिवचनैः एकार्थतायाः कारणात् चिन्तनप्रवाहरूपं ज्ञानं दर्शनसमानाकारं भवति, ध्यानोपासनाशब्दाभ्यां इत्यवगम्यते। अपि च *लिङ्गपुराणे*—

स्नेहपूर्वमनुध्यानं भक्तिरित्युच्यते बुधैः। इति।

## १.३. *श्रीमद्भागवते* भक्तिः

उपनिषत्सु प्रतिपाद्याया भक्तेः विशदतया विकाशो *महाभारते श्रीमद्भगवद्गीतायाम्, श्रीमद्भागवतादिमहापुराणेषु* भक्तिसूत्रेषु वैष्णवादीनां सांप्रदायिकग्रन्थेषु च परिलक्ष्यते। भगवच्छब्दात् भगवद्विषयकमित्यर्थः आयाति। भगवति भक्ताः भागवताः भागवतानां कथा भागवतम् इति द्विधा भागवतशब्दस्य स्थितिः। भगवन्महिमाप्रतिपादककथाम् अनुसृत्य कृतं पुराणं *श्रीमद्भागवतम्* इति। *भागवत्पुराणस्य* कालः ८00-९00 ईसापूर्वः, *श्रीमद्भागवत्पुराणे*—

लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्।
अहेतुक्यव्यवहिता या भक्तिः पुरुषोत्तमे।। (श्री.भाग.३.२९.१२)

*श्रीमद्भागवतम्* उच्चकल्पाश्रितां भक्तिं विवृणुते, भक्तिः ईश्वरस्य अस्तित्वं तथा ज्ञानम् आत्मनः अस्तित्वं व्यनक्ति। भक्तिशब्दस्य प्राथमिकसंज्ञा सेवारूपा, अत्रोच्यते आनुकूल्यपूर्वकं श्रीकृष्णस्य नामश्रवणादिस्वरूपाणां भजनमेव भक्तिः। *सिद्धान्तशिरोमणौ* प्रोच्यते पराशिवस्य प्रेमपूर्वका सेवा पूर्णा स्वल्पा वा सा भक्तिः इत्यभिधीयते—

साङ्गा न्युना च सा सेवा सा भक्तिरिति कीर्त्यते। (*सिद्धान्तशिरोमणिः* ९.१५)

इदं भजनम् ऐहिकं पारत्रिकं वा उभयविषयफलकामनाशून्यं श्रीकृष्णं प्रति चित्तसमर्पणेन प्रेम्णि लीनं परामृशति। भक्तिशब्दस्य व्युत्पत्तिलब्धः प्राथमिकः अर्थो यद्यपि सेवा तथापि प्रकृत्यर्थम् ईश्वरं प्रति निर्विशेषम् उपाधिवर्जितं प्रेम एव सूचयति। विहितोऽविहितो वा श्रीकृष्णे चित्तसंयोजनमेव भजनम्। *श्रीमद्भागवते*—

देवानां गुणलिङ्गानामानुश्रविककर्मणाम्।
सत्त्व एवैकमनसो वृत्तिः स्वाभाविकी तु या॥
अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी।
जरयत्याशु या कोशं निगीर्णमनलो यथा॥ (श्री.भाग. ३.२५.३२) इति।

भक्तिः उपासना अर्थान्तरं ध्यानम् अपि वा। मुक्तिप्रयोजिका विद्योपासना। वस्तुतो मानवानाम् अन्तःकरणं भगवतः चरणारविन्देभ्यः, वचनं गुणगीतेभ्यः, हस्तौ मन्दिरादिमार्जनाय, कर्णौ सत्कथाश्रवणादेभ्यः, नेत्राभ्यां मूर्त्यादिदर्शनाय, अङ्गादिकं गात्रस्पर्शनाय, घ्राणेन्द्रियं चरणसरोजसुगन्धाघ्राणाय, जिह्वा समर्पितप्रसादरूपरसास्वादनाय, चरणयुगलम् अधिष्ठिततीर्थसमूह-विचरणाय, मस्तकं चरणप्रणतिरूपनमनेन च दासत्वाय समर्पितम्। एवं निगद्यते—

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं कुरुष्वाच्युतसत्कथोदये॥ (श्री.भाग. ९.४.१८) इति।

*श्रीमद्भागवते* वैरभक्तिप्रसङ्गेन—

तस्मात् वैरानुबन्धेन निर्वैरेण भयेन वा।स्नेहात्कामेन वा युञ्ज्यात् कथंचिन्नेक्षते पृथक्॥ (श्री.भाग. ७.१.२५)
यथा वैरानुबन्धेन मर्त्य: तन्मयतामियात्। न तथा भक्तियोगेनत्विति मे निश्चिता मति:॥ (श्री.भाग. ७.१.२७)

वैरेण भक्ति: वैरभक्ति:, वीरधर्मानुष्ठानधर्मेण भगवद्भक्ति: वैरभक्तिशब्देन ध्वन्यते।

पुराणमूर्धन्ये सर्ववेदान्तसारे वैष्णवतिलके *श्रीमद्भागवते* महापुराणे भक्तितत्त्वस्य सर्वाङ्गीणं विश्लेषणं प्रस्तुतमस्ति। तदनुसारं प्रेमपयोधौ पूर्णात्मनि परमात्मनि संसक्त्या भक्त्या समः कल्याणकारी कश्चन अन्यो मार्गो न दृष्टिगोचरतामायाति, तदुक्तं *श्रीमद्भागवते*—

न युज्यमानया भक्त्या भगवत्यखिलात्मनि।
सदृशोऽस्ति शिवः पन्था योगिनां ब्रह्मसिद्धये।। (श्री.भाग.३.२५.१९)

अत एव सर्वकामनया भगवद्भजनमेव गोविन्दस्य नामकीर्तनं कर्तव्यत्वेन सिद्धान्तितं *श्रीमद्भागवते*—

अकामः सर्वकामो वा मोक्षकाम उदारधीः।
तीव्रेण भक्तियोगेन यजेत पुरुषं परम्।। (श्री.भाग.२.३.१०)

अतः यदि आत्मज्ञाने इच्छा वर्तते अपि वा आत्मज्ञानात् परं पदं प्राप्तुम् इच्छेत् तर्हि सततं यत्नपूर्वकं श्रीहरेः नामोच्चारणं कुरु। *गरुडपुराणे* उपदिश्यते—

यदीच्छसि परं ज्ञानं ज्ञानाच्च परमं पदम्।
तदा यत्नेन महता कुरु गोविन्दकीर्तनम्।। इति।

## **१.४. दै*वीमीमांसादर्शने* भक्तिः**

दै*वीमीमांसादर्शने* अङ्गीरसमुनेः मतानुसारं भक्तिः भगवन्तं प्रति प्रत्यनुरागविशेषा अलौकिकेश्वरानुरागरूपा वा। सर्वासु चित्तवृत्तिषु प्राधान्येन वृत्तिद्वयं कारणस्वरूपतां भजते—रागो द्वेषश्च। तत्र रागो रजःप्रधानः, द्वेषश्च तमःप्रधानः। सुखानुशायी रागो दुःखाशायी द्वेष इत्यत्र योगसूत्रानुसारेण सुखानुस्मरणपूर्वकं प्रवृत्तिरेव रागः तथा दुःखानुस्मरणपुरःसरं विरुद्धभावनोत्पत्तिरेव द्वेषः इति कथ्यते। तथा च तमःप्राधान्याद् द्वेषवृत्तिः द्वेषस्य, रागवृत्तिश्च सत्त्वोन्मुखरजःप्राधान्येन सुखस्य हेतुः भवति। भक्तिः किल द्वेषप्रतिकूला रागानुकूला अलौकिकी वृत्तिश्च। अलौकिकी सात्त्विकी यतस्तया साकं भगवदनुरागस्य निगूढः संबन्धः अस्ति। एवं च द्वेषातीता रागानुरूपा परमेश्वराभिमुखगमनशीला सत्त्वगुणमयी भगवति विशिष्टालौकिकानुरागवृत्तिरेव भक्तिः। भक्तिः अहेतुकाविच्छिन्नरागानुरूपा द्वेषविरुद्धा अलौकिकवृत्तिः, भगवति अनुरागसंबन्धकारणाद् भक्तिः मूलतः सात्त्विकवृत्तिः। दै*वीमीमांसादर्शने* –

सानुरागरूपा।
स्नेहप्रेमश्रद्धातिरेकादलौकिकेश्वरानुरागरूपा। (दै.मी.द. १.७)। इति।

## १.५. *भक्तिरसायने* भक्तिः

*पञ्चदशशताब्देः* अद्वैतवेदान्तस्य दार्शनिकः तथा कृष्णभक्तः मधुसूदनसरस्वत्या विरचितस्य *भक्तिरसायनस्य* प्रथमे उल्लासे धर्मपूर्वकं भगवद्गुणानाम् आराधनेन द्रवीभूतस्य चेतस्तैलधारावद् अविच्छिन्न-धारावाहिकं भगवदाकारवृत्तिरेव भक्तेः सामान्यलक्षणरूपेण अभिधीयते—

> द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता।
> सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते॥ (भ.रसा. १.३) इति।

प्रसिद्धो गीतायाः टीकाकारः महात्मा मधुसूदनसरस्वती *भक्तिरसायनम्* इति ग्रन्थे क्रमानुसारं भक्त्या गम्भीरां भूमिकां प्रदत्तवान्।

> प्रथमं महतां सेवा तद्दयापात्रता ततः।
> श्रद्धाथ तेषां धर्मेषु ततः हरिगुणश्रुतिः॥ (भ.रसा. १.३४)
>
> ततः रत्यङ्कुरोत्पत्तिः स्वरूपाधिगतिस्ततः।
> प्रेमवृद्धिः परानन्दे तस्याथ स्फुटनं ततः॥ (भ.रसा. १.३५)
>
> भगवद्धर्मनिष्ठातः स्वस्मिंस्तदगुणशालिता।
> प्रेम्णोऽथ परमा काष्ठेत्युदिता भक्तिभूमिकाः॥ (भ.रसा. १.३६) इति।

कृष्णविषयका भक्तिः रस उच्यते, कारणमेवं यत् कृष्णो न देवः, साक्षात् परब्रह्म। परमानन्दस्वरूपस्य भगवदाकारस्य स्वयमेव स्थायिभावत्वेन भक्तिरसे परमानन्दं लभते। *भक्तिरसायने* मधुसूदनसरस्वतीमहोदयेन—

> न भगवान् परमानन्दस्वरूपः स्वयमेव हि।
> मनोगतोस्तदाकारो रसतामेति पुष्कलम्॥ (भ.रसा.१.१०)

नित्योऽविनाशी सच्चिदानन्दस्वरूपः सर्वव्यापकः परमात्मा नित्यो विभुः भगवान् यदा चित्ते द्रवीभूतो भवति तदा भगवतो निरतिशयो बोधसुखात्मकः पुरुषार्थो विषयो भवति भगवद्रूपेण मानवः कृतकृत्यो भवति। *भक्तिरसायने* मधुसूदनसरस्वतीमहोदयेन उच्यते—

> भगवन्तं विभुं नित्यं पूर्णं बोधसुखात्मकम्।
> यद् गृह्णाति द्रुतं चित्तं किमन्यदवशिष्यते॥ (भ.रसा. १.३०)

भगवान् विष्णुः प्राणिनां कल्याणाय धर्मस्य स्थापनाय अधर्मस्य निराशाय सतां संरक्षणाय दुष्टानां दलनाय च समये समये स्वमायया देवमानवपश्वादिषु योनिषु, सत्ययुगे मत्स्य-कूर्म-वराह-वामन-नृसिंहरूपेण, त्रेतायां रामरूपेण, द्वापरे कृष्णबलरामरूपेण कलियुगे च बुद्धकल्किरूपेणावतीर्य भक्तान् आह्लादयति, शास्त्रीयमर्यादां पालयति, सुखयति च समस्तं लोकम्। जगदाधारपरमेश्वरविषयका अनुरक्तिः भगवद्विषयकान्तःकरणवृत्तिविशेषा वा भक्तिः। श्रीमधुसूदनसरस्वतीसिद्धान्तानुसारं भगवद्भावेन द्रवीभूतस्य चित्तस्य सविकल्पा तदाकारतापत्तिरेव भक्तिः निगद्यते। तथा हि— *भक्तिरसायन*ग्रन्थस्य टीकायाम्—

द्रवीभावपूर्विका हि मनसो भगवदाकारता सविकल्पकवृत्तिरूपा भक्तिः।

पुरुषोत्तमे निरतिशयप्रेम्णः परं निर्हेतुको निष्कामः अनुरागः अहेतुकविष्णुभक्तिरेव भक्तिः। भक्तैः भजनकीर्तनेन गुणगीत्या च भक्तिः गुणवती भवति कारणं भक्तहृद् भगवतो निवासस्थलम्, अपि च श्रीहरेः वैकुण्ठधाम भक्तेः साक्षात्स्वरूपम् अस्ति। भगवता श्रीकृष्णेन उच्यते—

नाहं वसामि वैकुण्ठे योगिनां हृदये न च।
मद्भक्ता यत्र गायन्ति तत्र तिष्ठामि नारद।। (प.पु. ९२.२२) इति।

भक्तिसुखान् आसक्तान् प्रति भजनीयस्वरूपनिर्णयार्थं तद्भक्तानाम् अपि विचार आवश्यिकः। भक्तिसुखाद्वैराग्यं न स्यात्, जीवन्मुक्तानामपि श्रुतिस्मृतिषु भगवद्भक्तिप्रतिपादनं तु रहस्यत्वेन गम्यते। श्रीभगवान् रसस्वरूपः प्रेमघन आनन्दघनो वा भक्तमात्रं स्वीकरोति। कृष्णरसे निमग्नः कृष्णरसेन परिवृतः चिन्तनफलेन जातकः कृष्णस्वरूपं लभते। पराभक्तिदशायां यदा भक्तः भक्त्या भगवति तन्मयो भवति, तदा द्वैतभावो विनश्यति, सा परमानन्दप्राप्तेः अवस्था। वस्तुतः परमात्मा एव आनन्दस्य अधिष्ठानं तथापि जीवात्मैव सच्चिदानन्दस्वरूपस्य परमात्मनः अंशत्वात् जीवानाम् आनन्दानुभूतिः जायते आनन्दप्रतिभासो वा भूयते। विषयजन्य आनन्दः अस्थायी भवति स्थायी तु आत्मगत एव आनन्दो भवति।

## २. नवधा भक्तिविमर्शः

भक्त्याः अन्तर्गता साधनभक्तिः संकीर्तन-श्रवण-स्मरण-पादसेवन-अर्चन-वन्दन-दास्य-आत्मनिवेदनाद्यनेकप्रकारा सन्ति। *श्रीमद्भागवते* साधनरूपा भक्तिः नवधा वर्तते—

श्रवणं  कीर्तनं विष्णोः स्मरणं पादसवेनम्।

अर्चनं वन्दनं दास्यं सख्यमात्मनिवदेनम्।। (श्री.भाग. ७.५.२३ ) इति।

तत्र नवविधानां भक्तीनां प्राधान्यम् अभिप्रेत्य एनं दर्शयितुं प्रथमं प्रह्लादवचनमाह— श्रवणमिति। श्रवणं भगवतो नामादिशब्दानां परैः उक्तानां वा श्रोत्रेण ग्रहणम्, कीर्तनं तेषां स्वयमपच्चारणम्, स्मरणं तन्नामरूपादीनां मनसा चिन्तनम् यत्र वर्तते, पादसेवनं परिचर्या प्रतिमादौ साधारणतः, अर्चनं पूजा जलादिषु, वन्दनं दण्डवत्प्रणामादि सर्वाङ्गैः अभिवादनं वा, दास्यं कर्मणामर्पणम्, सख्यं भगवति श्रद्धाविश्वासादिः, आत्मनिवेदनं देहसमर्पणं यथा विक्रीतस्य गवाश्वादेः मरणपालनादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिन्तावर्जनमिति।

यथा *श्रीरामचरितमानसे* श्रीरामचन्द्रः शबरीं नवधा भक्तिं  वर्णयति *श्रीमद्भागवते* च हरिभक्तः प्रह्लादः हिरण्यकशिपुं भगवतो विष्णोः नवविधा भक्तिम् उक्तवान्, तथैव शाण्डिल्यमहोदयेन नवधा भक्तिः एवं वर्ण्यते—

अर्चनं मन्त्रपठने यागो योगो  मधुद्विषः।

नाम्नां संकीर्तनं सेवा तथा तच्चिह्नधारणम्।।

तदीयाराधनं चर्या नवधा द्विजसत्तमः।

जन्मना विद्ययात्रापि तपसा हरिसेवया।।

सत्संगेन नृणां शुद्धिः पञ्चधा परिकीर्तिता।

नवधा भक्तियोगेन तस्यैवोद्धरणं स्मृतम्।। (शा.सं.) इति।

भगवतः श्रीकृष्णस्य अर्चनं मन्त्रजपनं स्तुत्यादिकं निमित्तपूर्वकहवनं ध्यानं नामसंकीर्तनं सेवनं शङ्खचक्रादिचिह्नधारणम् आराधनं च नवधा भक्तिः वर्तते। जन्म विद्या तपः सेवनं सत्सङ्गो वा इति पञ्चप्रकारकं मनुष्यशुद्धिः इत्याख्यायते, नवधा भक्तिः मनुष्याणाम् उद्धारकारणम् इति प्रचक्षते। *शाण्डिल्यभक्तिसूत्रे*—

भक्त्या भजनोपसंहाराद्गौण्या परायैतद्धेतुत्वात्। (शा.भ.सू.२.२.१)

भक्तिपदेन भजनस्य उपसंहाराद् गौणभक्त्याः तात्पर्यम् अभिधीयते। एषा गौणभक्तिः एव पराभक्तिप्राप्तये कारणं भवति। पराभक्तेः विघ्ननाशनसाधनाकाङ्खया कीर्तनादिकमेव उपक्रान्तं भक्तिशब्देन गौण्या वृत्या तृतीयान्तेन निर्दिश्य परभजनसाधनत्वं तेषु विधीयते इत्यत्र अर्थवादस्य आकाङ्खायां 'भक्ताः मयि तेषु तेषु चाप्यहम्' इत्यत्र भगवान् भक्ताधीन इति सूच्यते। भगवद्भक्तिः अस्य जडजगतः क्रिया न, सा चिन्मयि जगति अन्तर्भूयते यत्र सच्चिदानन्दो नित्यो विराजते।

तदुपसंहारस्तत्र *तैत्तिरीयसंहितायां* 'चित्रया यजेत' इतिवत् सामानाधिरण्येन भक्तिनाम्ना भजनेन फलं भावयेदित्यर्थः। *श्रीमद्भगवद्गीतायाम्* 'चतुर्विधा भजन्ते माम्' इत्यत्र आर्त-अर्थार्थि-जिज्ञासु-ज्ञानिषु ज्ञानी भक्तः एव श्रेष्ठः 'एकभक्तिर्विशिष्यते' इत्यादौ भगवद्भक्त्यां भक्तिशब्दः प्रयुज्यते भक्तिभजनयोः एकार्थत्वात्। निरन्तरं गौणभक्तीः अनुसरणं कुर्वतां भक्तानां मनः पराभक्तिं प्रति गच्छति।

## २.१. श्रवणम्

भगवतः नाम-रूप-गुण-लीला-तत्त्वकथादिकं प्रेमपूर्वकं श्रद्धया च श्रवणेन भक्तजनाः आनन्देन अभिभूता भवन्ति। श्रवणभक्तिप्राप्तये श्रद्धा-प्रणाम-सेवानां विशेषतः सत्सङ्गेन महापुरुषाणां सङ्गेन प्रयोजनम् अस्ति। ग्रामाद् दूरस्थग्रामेषु पञ्चदिवसीयं सप्तदिवसीयं यावद् भागवत्पाठ-लीलाकीर्तन-रासपूर्णिमा-पदावलीकीर्तनादीनाम् अष्टमप्रहरहरिनामयज्ञस्य उत्सवः प्रायशः इदानींतनकाले अनुष्ठीयते, यत्र आनुष्ठानिकतया अनेके भक्ताः एकत्रिता भवन्ति, बहुभक्तानां सन्निधौ तत्र भगवल्लीलाम् अपि आस्वाद्यन्ते, एवमेव श्रवणभक्तेः महिमा। कर्तुः प्रयत्नद्वारा ज्ञानेन्द्रियेण कर्णेन यत्साध्यते तत् श्रवणम् जिह्वया कर्मेन्द्रियेण च यत्साध्यते तत्कीर्तनम्। *नारदभक्तिसूत्रे* नारदमुनिना भगवतो नवधा भक्तिषु लीलाश्रवण-नामगुणकीर्तनाभ्यां श्रवणकीर्तनयोः उल्लेखः क्रियते—

लोकेऽपि भगवद्गुणश्रवणकीर्तनात्। (ना.भ.सू. ३७)

परमेश्वरः श्रीकृष्णः सच्चिदानन्दविग्रहस्वरूपः, एको वृक्ष यथा दिवि स्तब्धो तिष्ठति तथैव परमपुरुषेण इदं सर्वं पूर्णम् अस्ति।[4] सत्सङ्गस्य महिमा *नारदभक्तिसूत्रे*—

महत्सङ्गस्तु दुर्लभोऽगम्योऽमोघश्च।

यदि महापुरुषस्य सङ्गतिः कदाचित् लभ्यते तर्हि संसारसागरं तरीतुं शक्यते। ईश्वरप्रसादेनैव सत्सङ्गो[5] लभ्यते। *गरुडपुराणे*—

सत्सङ्गश्च विवेकश्च निर्मलं नयनद्वयम्।
यस्य नास्ति नरः सोऽन्धः कथं न स्यात् कुमार्गगः॥

गङ्गादितीर्थं तु अङ्गजं पापं हरति परंतु भगवत्प्रियाणां सङ्गात् लब्धं मुकुन्दस्य विक्रमं श्रुतिभिः श्रवणादिभिः अन्तःकरणशुध्यर्थं प्रयोजनम् अस्ति। नारदाचार्यः महर्षिं वेदव्यासं कथितवान् *श्रीमद्भागवते*—

इदं हि पुंसस्तपसः श्रुतस्य वा स्विष्टस्य सूक्तस्य च बुद्धिदत्तयोः।

अविच्युतोऽर्थः कविभिर्निरूपितो यदुत्तमश्लोकगुणानुवर्णनम्।। (श्री.भाग.१.५.२२)

*श्रीमद्भागवते* तदुक्तम्—

शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात्।।
यद्दुध्यासिनायुक्ताः कर्मग्रन्थिनिबन्धनम्।
छिन्दन्ति कोविदास्तस्य को न कुर्यात्कथारतिम्।। इति।

वेदस्य भाषा संस्कृतम्, वेदिकमन्त्रपाठार्थं शुद्धोच्चारणविधिः आवश्यिकी[6] श्रवणं नाम षड्विधलिङ्गैः[7] अशेषवेदान्तानाम् अद्वितीयवस्तुनि तात्पर्यावधारणम् अस्ति। स्वस्वरूपं ज्ञातुं साधकस्य ब्रह्मविद् गुरुं प्राप्तुं सर्वथा आवश्यकरूपेण गण्यते। येषाम् आत्मजिज्ञासूनां साधकानां ब्रह्मज्ञानप्राप्त्यर्थं प्रस्तुतिः संपद्यते, तेषां वस्तुतो ब्रह्मज्ञगुरोः सान्निध्यलाभः आवश्यकः अस्ति। गुरुसाहाय्येन गुरुकृपया च साधनायाः प्रगतिः वर्धते आत्मसाक्षात्कारः संभवेत्। *विवेकचूडामणौ* प्राप्यते गुरुलक्षणप्रसङ्गेन—

श्रोत्रियोऽवृजिनोऽकामहतो यो ब्रह्मवित्तमः।
ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः।
अहेतुकदयासिन्धुर्बन्धुरानमतां सताम्।। (वि.चू. ३३)

ब्रह्मज्ञः गुरुः शान्तः परंतु तेजस्वी। शक्तिः असीमा। ब्रह्मविद् ब्रह्मैव भवति। अतः गुरुसान्निध्येन बाह्याः विषयाः नगण्या इव अनुभूयन्ते। दयार्णवस्य शरणं कुर्वतां सज्जनानां सखा एव भवति गुरुः। धर्मस्य उपदेशक यथा शक्तिमान् भवेत् तथैव श्रोता अपि निपूणो भविष्यति।[8] *कठोपनिषदि*—

आश्चर्यो वक्ता कुशलोऽस्य
लब्धाश्चर्यो ज्ञाता कुशलानुशिष्टः।। (क.उ. १.२.७)

मायाशक्त्या मोहिता जनाः इन्द्रियतृप्त्यर्थं भोग्यविषयेषु लिप्तत्वाद् आत्मतत्त्वसाक्षात्काराय तेषां मतिः नास्ति। कदाचित् आत्मनः विषये ज्ञानलाभार्थं सत्सङ्गं श्रोतुं ते प्रयतन्ते परंतु अज्ञानेन मार्गभ्रष्टा भूत्वा ते जीवात्मपरमात्मनोः भेदं कर्तुं न शक्नुवन्तः। तत्त्वज्ञानलाभार्थं सुलभतम उपायो भक्तिः अस्ति, अस्मिन् प्रसङ्गे श्रीकृष्णेन *श्रीमद्भगवद्गीतायां* यथार्थमर्मोपलब्धिः क्रियते, श्रीकृष्णं ज्ञातार्थं शुद्धभक्तः स एव भवितुं शक्यः यस्य अन्तकरणे अहेतुकी भक्तिः विद्यते। *श्रीमद्भगवद्गीतायाम्*—

आश्चर्यवत् पश्यति कश्चिदेनम् आश्चर्यवद् वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित्।। (श्री.भ.गी. २.२९)

*नारदभक्तिसूत्रे*—

सर्वदा सर्वभावेन निश्चिन्तितैर्भगवान् एव भजनीयः। (ना.भ.सू. ७९)

भजनं भक्त्याः अङ्गः, सर्वावस्थायां भगवद्भजनम् अनिवार्यम्, अखण्डरूपेण प्रेमपूर्वकं भगवतः चिन्तनद्वारा स्नान-भोजन-व्यापारादिकं सर्वं करणीयम्। नामजपस्य विधिः श्वासप्रश्वासाभ्यां मनसा च ध्यानं दत्त्वा मन्दस्वरेण ईश्वरस्य नाम जपं कुवन् भक्तः भगवति तन्मयो भवति। प्रायः सर्वे प्रसिद्धाः भक्ताः साधवाः च श्रवणम् इति साधनस्य उपयोगं कृतवन्तः। भगवतो नामश्रवणकीर्तनयोः महत् फलम् अस्ति। यत्र भगवतो नाम श्रूयते तत्र वातावरणं शुद्धं भवति। मृत्युकाले अन्तिमदशायाम् ईश्वरस्य नामोच्चारणेन जातकः परमं पदं प्राप्नुयात्। अत एव दश नामापराधं[9] परित्यज्य भगवतः नामानि जपं श्रवणं च अवश्यं कर्तव्यम्।

तत्प्राप्य तदेवावलोकयति तदेव शृणोति तदेव भाषयति तदेव चिन्तयति।।
(ना.भ.सू. ५५)

इत्यत्र भगवद्दर्शनार्थं दर्शनेन्द्रिय-श्रवनेन्द्रिय-वागिन्द्रिय-अन्तरिन्द्रियाणां प्राधान्यं वर्तते। निर्गुणब्रह्मणः साक्षात्कारसाधनं केवलं ज्ञानम्, श्रवणात् शब्दसाक्षात्कारो भूयते। अस्माकं वाग् भगवतो नामजपनार्थं कर्णद्वयं च दिव्यं चरित्रगुणं श्रवणार्थं प्रयुज्यते। वाणी गुणानुकथनेन श्रवणौ कथायां च। महाप्रभुः श्रीचैतन्यः कथितवान् *शिक्षाष्टके*—

नयनं गलदश्रधारया वचनं गद्गद्रुद्धया गिरा।
पुलकैर्निचितं वपुः कदा तव नामग्रहणे भविष्यति।। इति।

देवाहुतिं प्रति श्रीकपिलवचनम्— सत्पुरुषाणां सङ्गात्[10] कथाः हृत्कर्णयोः रसायनाः सुखदा भवन्ति, तासां जोषणात् सेवनाद् अविद्यानिवर्तनात् अपवर्गो भवति। यद्वा मोक्षदायको भवति, यतस्तस्मिन् हरौ प्रथमं श्रद्धा ततः रतिः फलरूपेण भक्तः भक्तिमाप्नोति। *श्रीमद्भगवद्माहात्म्ये* सनकादीन् प्रति नारदाचार्येण श्रवणमहिमा द्योत्यते—

श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः।
वैकुण्ठस्थो यतः कृष्णः श्रवणाद् यस्य लभ्यते।। (श्री.भाग. १३.६.७६)

*श्रीमद्भागवते* असारसंसारे शुकदेवस्य मुखाद् भगवतः अतुलनीयामृतलीलाश्रवणेन राजा परीक्षित् परमपदं प्राप्तवान् इति श्रूयते—

असारे संसारे विषयविषसङ्गाकुलधियः।
क्षणार्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम्।।
किमर्थे व्यर्थे भो व्रजथ कुपथे कुत्सितकथे।
परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने।। (श्री.भाग. १३.६.१००) इति।

## २.२. कीर्तनम्

भगवतो गुणकीर्तनेन तप-वेदाध्ययन-यज्ञ-मन्त्र-ज्ञान-दानानाम् अविनाशि फलं लभ्यते— एवमेव विद्वद्भिः निरूप्यते। नामरूपगुणैः ऐश्वर्यलीलादिकं गोचरीभूयते। शाब्दबोधश्च तत् शब्दयोगश्च श्रवणं मतम्।। यज्ञादीनां बहुवित्तव्ययसाध्यत्वाद् ध्यानादीनां चित्तैकाग्यसाध्यत्वात् कलियुगे च तदसंभवात् संकीर्तनं भक्तिः विधीयते। वचनं नानापुराणेषु [11] दृश्यमानं प्रमाणम् अस्ति। कलिविशिष्टकीर्तनविधानात्। संकीर्तनं नाम न श्रुतिषु स्मृतिषु प्रसिद्धतया परिलक्ष्यते। कृतयुगे ध्यानेन यत्फलं लभ्यते त्रेतायां यज्ञानुष्ठानेन द्वापरे अर्चनक्रियया यदवाप्यते तत्कलौ संकीर्त्य केशवं प्राप्नुयात्। यज्ञाः पशुसोमयागाः सत्रपर्यन्ताः। वस्तुतस्तु सर्वधर्मतः अपि उत्कृष्टफलं संकीर्तनेन प्राप्तुमलम्। दृश्यते संकीर्तनं कुर्वतां सद्यः चित्तविश्रान्तिः भवति। कृष्णकीर्तनकृतां भक्तानां रोमोद्गमादिसुखातिशय-लिङ्गदर्शनाद् अपि सुखहेतुत्वं ज्ञायते। अत एव ज्ञानिनां संकीर्तनजन्यादृष्टस्य अभावेऽपि संकीर्तनतः सुखातिशयो भवति इति हेतोः मुक्तानां संकीर्तनस्य अधिकारः अस्ति।

कथाव्याख्यानादिना भक्तानां समीपे भगवतः प्रेमकथनं एकान्तेन बहुभिः वा मिलित्वा उच्चैः स्वरेण ईश्वरस्य नाम जपं कुर्वन्, भगवतः चरित्रादिकं प्रेमपूर्वकं श्रद्धया उच्चैः शनैः वा पूजयित्वा, वाद्यनृत्येन सह वा विना, स्थित्वा उपविश्य वा, दिव्यस्तोत्रैः पदैश्च ईश्वरस्य स्तुतिं कृत्वा, प्रार्थयन्, भक्तैः एषा कीर्तनभक्तिः विधीयते। कीर्तनभक्तिः ईश्वरेच्छया महापुरुषाणां कृपया वा प्राप्यते। नवधा भक्तिषु देवर्षिः नारदः संकीर्तने अन्तर्भवति। निम्बार्कसंप्रदायस्य आचार्यः नारदाचार्यः कीर्तनगीतस्य महत्त्वोपस्थापनार्थं कथितवान् –

स कीर्त्यमान शीघ्रमेवाविर्भवति अनुभावयति च भक्तान्। (ना.भ.सू. ८०) इति।

भगवद्गुणानाम् ऐश्वर्यादीनां कीर्तयितरि भक्ते अभ्युदयो रुचिप्रदं महोत्सवं कीर्तनाद् भवति। हरिकीर्तनं विना कस्यापि चित्तं तत्त्वाभिमुखं न जायते। हरिकीर्तनात् सद्यो भगवति स्थिरा मतिः भवति। ये तु

विषयवासनाबद्धा गृहिणः तेषां मोक्षः कीर्तनादेव भवन्ति, येषां चित्तानि सदा विषयेषु निमज्जन्ते तेषां कृते हरिचरितमनुवर्णनं भवसिन्धुप्लवो दृष्ट इत्यर्थः। श्रीहरेः गुणानुवादेन चित्तशोधनात् प्रायश्चित्तशब्देन ध्वन्यते। भक्तः उद्धवो भगवन्तं श्रीकृष्णं कथितवान्—गोपिकानां शङ्खचूडवधेन स्वमोक्षणं मुकुन्दस्य शुद्धचरितस्य गाथाकीर्तनेन, मुनिभिः सनकादिभिः अन्यैश्च लब्धशरणभक्तैः ग्राहवधं गजेन्द्रमोक्षणं, रावणाद् जनकात्मजायाश्च मोक्षणं कंसगृहात् देवकी-वसुदेवयोः मोक्षणं च भगवतो निर्मलं चरित्रगाथादिकं शुद्धं यशो गीतं कीर्तनेनैव अभवन्। *श्रीमद्भागवते*—

> गोप्यश्च कुञ्जरपतेर्जनकात्मजायाः पित्रोश्च लब्धशरणा मुनयो वयं च॥
> (श्री.भाग.१०.७१.९)

रुचिरैः मनोहरैः कृष्णाद्यवतारैः कृतानि वीर्याणि बालचरितानि बाललीला परममङ्गलानि विष्णुपुराणादौ इह *श्रीभागवते* विश्रुतानि प्रसिद्धानि परमहंसगतौ कृष्णे भक्तिं लभेत, तस्मात्कीर्तनमेव[12] परमा भक्तिरिति भावः। कीर्तनभक्तेः फलं *श्रीमद्भगवद्गीतायां* ध्वन्यते—

> य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति।
> भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः॥
> न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः।
> भविता न च मे तस्मादन्यः प्रियतरो भुवि॥ (श्री.भ.गी. १८. ६८-६९)

भगवतः गुण-कर्म-नाम-स्वरूपाणां संकीर्तनं क्रियते। यदा प्रवचनं — 'अपूर्वमनन्तरमबाह्यमनिर्देश्यम्' इति तदा ईश्वस्य तत्त्वस्वरूपाणां कीर्तनं भवति, यदा 'ईश्वरः सर्वज्ञः सर्वशक्तिमान् परमदयालुः' इति उच्यते तदा गुणानां कीर्तनं भवति, तथैव 'कोटिकन्दर्पदलनं सौन्दर्य-माधूर्य-निधानम्' रूपं कीर्तयति तदा रूपस्य कीर्तनं भवति। माहात्म्यकीर्तनमेवम्— 'जाके रोम कोटि ब्रह्मण्डा। नामकीर्तनं सर्वोत्कृष्टम्'। 'कीर्त संशब्दने' कीर्तनशब्दः उच्चस्वरेण गायनेन भवति। कीर्तनं एकाकी कर्तुं शक्यते परंतु संकीर्तनं एकाकी कर्तुं नालम्। संघीभूय कीर्तनं संकीर्तनम्— यदि बहवः जनाः समागत्य कीर्तयन्ति तर्हि तत्कीर्तनम्।

कीर्तनस्य पद्धतिद्वयम् अस्ति— वैयासकी पद्धतिः नारदीयपद्धतिश्च। पुस्तकादिभिः भगवतो गुणानां लीलायाश्च वर्णनं वैयासकी कीर्तनम् इति कथ्यते, तत्र वक्ता आसनम् उपविश्य कथयति कथां शृणोति वा। तालस्वरवाद्यादिभिः यत् कीर्तनं क्रियते तत् नारदीयकीर्तनम्, अस्य द्वौ भेदौ स्तः— एकं नामकीर्तनम् अपरं पदकीर्तनम्। लयस्वराभ्यां भगवतो नाममात्रस्य उच्चारणं नामसंकीर्तनं तथा

भगवतो रूपगुणचरित्राणां पद्यरूपेण गायनं पदसंकीर्तनं भवति। भक्तेः मुख्यं लक्ष्यं प्राप्तुम् अन्यतमम् आसीत् सङ्गीतम्। ईश्वरं स्मृतिमार्गे रक्षणार्थं सङ्गीतं संभवतः सर्वोत्तमं सहायकम् आसीत्। यदा मनुष्यो भगवतो नाम उच्चार्यते तदा तस्य जनस्य जिह्वाग्रे नामावतारो[13] विराजते।

यदा गजराजः आर्तभावेन भगवन्तं गोविन्दम्[14] इति आहूतवान् तदा भगवान् गो-शब्दः वैकुण्ठे विन्द-शब्दश्च मार्गे श्रूतवान् तथा कौरवसभायां दुशासनः यदा द्रौपद्याः वस्त्रं आकर्षितवान् द्रौपदी च विमुक्तये श्रीकृष्णम् आहूतवान् तदा श्रीकृष्णो द्वारकाद् धावन् आगतः। एवं तत्कीर्तनमेव भगवन्तं प्रकटीकरणाय कारणं सूचयति। पुराकाले नारद-वाल्मीकि-शुकदेव-इत्यादयः तथा अर्वाचीनकाले गौराङ्गमहाप्रभु-तुलसीदास-सुरदास-तुकाराम-मीरावाई-इत्यादयः भक्ताः भगवतः नामकीर्तनादिभिः परमं पदं प्राप्तवन्तः। गोस्वामी तुलसीदासः उवाच—

अपतु अजामिलु गजु गनिकाऊ। भए मुकुत हरिनाम प्रभाऊ।।

संकीर्तनस्य सुमधुरध्वनिः—

श्रीकृष्ण गोविन्द हरे मुरारे हे नाथ नारायण वासुदेव।।
रघुपति राघव राजा राम पतित पावन सीता राम।।
जय जय मोहन श्याम मुरारी जय ब्रजसुन्दर गिरिवरधारी।। इति।

कीर्तनादिषु भक्तिसाधनत्वेन *तैत्तिरीयसंहितायाम्* 'आयुवै घृतम्' इतिवद्भक्तिशब्दो गौणः शक्यसंस्कारेण सुग्रह इति। कीर्तनाद् भगवति अनुरागः द्योत्यते। अतः कीर्तनं अनुरागस्य हेतुः भवति, तत्साहचर्यात् भगवन्नाम-श्रवण-वन्दनभजनप्रकारादिकं अनुरागरूप-पराभक्त्याः साधनं भवति। *शाण्डिल्यभक्तिसूत्रे*—

रागार्थप्रकीर्तिसाहचर्याच्चेतरेषाम्। (शा.भ.सू.२.२.२)

## २.३. स्मरणम्

एकान्तेन पवित्रस्थानेषु सुखपूर्वकं स्थिरसुखासनम् उपविश्य साधकाः भक्ताः वा सर्वेषाम् इन्द्रियाणां विषयेभ्यः निराकृत्य संकल्पं दृढनिश्चयं च त्यक्त्वा प्रशान्तेन वैराग्ययुक्तचित्तेन च उत्थाय उपविश्य खादन् पिबन् चलन् स्वाभाविकतया सर्वकार्यं कुर्वन् शुद्धतया सरलतया च भगवतः सगुण-निर्गुण-साकार-निराकार-तत्वानि ज्ञात्वा गुणप्रभावैः ईश्वरस्वरूपं चिन्तयन्, भगवतः लीलानां स्मरणेन ईश्वरस्य साररहस्यं च ज्ञातुं तस्य गुणप्रभावचिन्तनार्थं दिव्यस्तोत्रैः पदैश्च मनसा स्तुतिं कुर्वन् प्रार्थयितुं

बहुलं स्मरणभक्तिः शास्त्रेषु विधीयते। शुद्धभक्तैः नाम-रूप-गुण-प्रभावादि-अमृतपूर्ण-कथानां श्रवणं, प्रेमपूर्वकं भागवतश्रवणम्, भागवतविषये धार्मिकपुस्तकानां पठन-पाठनम्, भगवतः नाम-जप-कीर्तनादिकम्, भगवतः स्तोत्रादिभिः कारुण्येन स्तुतिप्रार्थनं ईश्वरमहापुरुषादीनाम् आज्ञापालनं च इत्यादिकं साधकानां उपर्युक्तस्मरणभक्तिप्राप्त्यर्थं[15] उपायाः सन्ति। *कठोपनिषदि* कथ्यते –

एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्।
एतद्ध्येवाक्षरं ज्ञात्वा यो यदिच्छति तस्य तत्।। (क.उ. १.२. १६.) इति।

योगिनां ध्येयविषयस्य मानसप्रतिबिम्बगठनपूर्वकं प्रत्यक्षतया द्रष्टुम् अभ्यासेन प्रयत्नः करणीयः, ध्यानेन मनः स्थिरतां प्राप्नोति, मनसः तादृशः स्वभावः यदि एकस्मिन् विषये स्थिरतां प्राप्नोति तर्हि अन्यविषयेऽपि स्थितिं प्राप्नोति। अत एव यथाभिमतं ध्यानेन साधकः तत्त्वज्ञानक्रमेण तत्त्वेषु समाहितो भूत्वा कैवल्यं प्राप्तुं शक्यते। *श्रीमद्भगवद्गीतायां* भगवान् कथितवान्--

तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च। (श्री.भ.गी. ८.७)
अनन्यचेता: सततं यो मां स्मरति नित्यश:। (श्री.भ.गी. ८.१४)

इत्यत्र सततं तथा नित्यशः शब्दद्वयेन बोध्यते शुद्धभक्तः सर्वथा नियमितरूपेण नित्यं वा श्रीकृष्णं स्मरेद् ध्यायेत् वा। एते शुद्धभक्तस्य गुणाः सन्ति, अनया अनन्यभक्त्या ईश्वरः तेषां कृते सुलभः विद्यते। यः पुरुषः सर्वकार्यं कुर्वन् भगवतः मङ्गलमयरूपस्य स्मरन् ध्यायति, स अवश्यमेव नामश्रवणादिना स्मरणकथनादिना भगवतः चरणारविन्दध्यानेन[16] संसाराद् विमुच्यते। *श्रीमद्भागवते* नारदाचार्येण कथ्यते—

वैरेण यं नृपतयः शिशुपालपौण्डशाल्वादयो गतिविलासविलोकनाद्यैः।
ध्यायन्तः आकृतधियः शयनासनादौ तत्साम्यमापुरनुरक्तधियां पुनः किम्।। (श्री.भाग.११.५.४८ )

वैरेणापि शिशुपालादयो नृपतयः शयनासनादौ स्थित्वा विलासाद्यैः प्रकारैः ये ध्यायन्तः तत्र मग्नमनसः सन्तः तस्य भगवतः साम्ये तुल्यत्वं गम्यते। *श्रीमद्भागवते* श्रीकृष्णः उद्धवं उक्तवान्—

विषयान् ध्यायतश्चित्तं विषयेषु विषज्जते।
मामनुस्मरतश्चित्तं मय्येव प्रविलीयते।। (श्री.भाग. ११.१४.२७)

यो यस्य स्मर्ता स तद्रूपो भवतीति भगवद्वचनेनाह विषज्जते विषयाकारं भवति, भगवति एव प्रविलीयते मदाकारं भवति। प्रशब्देन ध्याता तन्मयं प्राप्नोतीति दर्शितम्। तस्मात् साधूक्तम् आनन्दस्य प्रशंसायां सर्वतः स्मरणसुखं गरीयः स्मर्तृमात्रं कृतार्थमिति। भगवान् श्रीकृष्णः यदा गोपिकानाम् आध्यात्मिकज्ञानं प्रदत्तवान् तदा गोपिभिः श्रीकृष्णं पुनः पुनः स्मरणेन गोपिकानाम् अज्ञानावरणं नष्टं जातम्, शुकदेवजी आह – हे पद्मनाभ संप्रति योगेश्वरः अपि भवतः पादपद्मं हृदये ध्यायति यत् खलु जगति पतितानां आश्रयस्थलम् अस्ति। मम एकमात्रं निवेदनमस्ति यत् अस्माकं गृहस्थिनाम् आसक्तं मनः सदा भगवतः स्मरणार्थं नियोजयतु। *नारदभक्तिसूत्रे*— ईश्वरविस्मरणे परमव्याकुलता इति सूत्रे स्पष्टरूपेण स्मरणभक्तिं प्रतिपत्स्यते अपि च एवमपि ध्वन्यते यत् गोपिकानां कदापि भगवतः श्रीकृष्णस्य माहात्म्यज्ञानविस्मृतिः न भूयात्। श्रीमान् तुलसीदासजी रामायणे स्मरणभक्तिविषये प्रोक्तवान् –

सो परम प्रिय अति पातकी जिन्ह कबहु प्रभु सुमिरन करयौ।
ते आजु मैं निज नयन देखौं पुरि पुलकित हिय भर्यौं।।
जे पद सरोज अनेक मुनि करि ध्यान कबहुंक पावहीं।
ते राम श्रीरघुबंसमनि प्रभु प्रेम तें सुख पावहीं।।

ध्रुव-भीष्म-कुन्ती-सनकादयः स्मरणभक्त्या परमपदं प्राप्तवन्तः, जटायुपक्षी अपि भगवत्स्मरणेन परमगतिं प्राप्तवान्। गुण-प्रेमसहित-नामकीर्तनादिभिः भगवत्स्वरूपध्यानवत् अस्मिन् संसारे शीघ्रोद्धारकर्तृ साधनान्तरं नास्ति। श्रीकबीर-दास-महोदयः प्रोक्तवान्—

सुमिरनसों मन लाइये, जैसे दीप पतंग।
प्रान तजे छिन एकमें, जरत न मोड़ें अंग।।
सुमिरनसों मन लाइये, जैसे कीट भिरंग।
कबीर बिसारे आपको, होय जाय तेहि रंग।।

पूजायां वैष्णवैः सात्वतादिभिः प्रदत्तं नैवेद्यनिर्माल्यादिकं भगवते विधीयते, तदिह सात्वतत्त्वस्य भेदाद् भगवद्भक्तेन स्वस्य कृते भोजनं धारणं च ग्राह्यं भवति।

स्मृतिकीर्त्योः कथादेश्चार्तो प्रायश्चित्तभावात्। (शा.भ.सू.२.२.१९)इति स्मरणकीर्तनकथानमस्कारादीनाम् आर्तभक्तौ निवेशः प्रायश्चित्तकारणाद्भवति इति *शाण्डिल्यभक्तिसूत्रे* निगद्यते।

## २.४. पादसेवनम्

श्रीभगवतो दिव्य-मङ्गलमय-स्वरूपस्य धातुप्रतिमाचित्रं मानसमूर्तिं वा श्रद्धापूर्वकं दर्शनेन चिन्तनेन पूजनेन सेवनेन वा भक्तानां भगवतः प्रेम्णि तन्मयीभवनं पादसेवनं कथ्यते। भक्ताः अतृप्तनयनाभ्यां भगवतः चरणारविन्दं सेवनेन चरणोदकं च गृहीत्वा, मनसा भगवच्चरणौ चिन्तनेन पूजयित्वा वा, भगवतः चरणपादुके मनसा चिन्तनेन पूजनेन वा भगवतः चरणरजं मनसा शिरसि धारणं, भगवच्चरणैः स्पृष्टां शय्यां तीर्थस्थानाद् उत्कृष्टम् अवगम्य तासां समादरेण तथा अयोध्या-चित्रकूट-वृन्दावन-मथुरादि-स्थानेषु यत्र यत्र भगवतः अवतारा प्रादुर्भूताः सन्ति, तत्रस्थं रजः भगवतः चरणरजः इति मत्वा शिरसि धारयन्, श्रीगङ्गाजलं भगवतः चरणोदकं मत्वा नमस्कारेण स्नानादिभिः सेवनेन पादसेवनभक्त्यर्थं विविधप्रकाराः सन्ति।

शास्त्रेषु महात्मनः पादसेवनभक्तेः स्तुतिं कृतवन्तः। भगवतः चरणोदकपानेन शिरसि धारणेन च कल्याणं भूयते। नित्यं निरन्तरं प्रभोः चरणदर्शनेन सेवनेन क्षणात् क्षणं कथं सुखी भवेत्, इति विषये प्रकृष्टतया उदाहरणत्वेन सीता माता प्रदर्श्यते, वनयात्रासमये माता सीता भगवन्तं उक्तवती—

> छिनु छिनु प्रभु पद कमल विलोकी। रहिहउ मुदित दिवस जिभि कोकी।।
> मोहि मग चलत न होहहि हारी। छिनु छिनु चरन सरोज निहारी।। इति

भगवतः श्रीरामस्य चरणचिह्न-चरणरजः-चरणपादुका-दर्शनात् तथा सेवनाद् भरतस्य कीदृशः आनन्दः तथा प्रेमतन्मया दशा जायते इति विषये *अध्यात्मरामायणे* प्राप्यते—

> अहो सुधन्योऽहं मुनिरामपादाविन्दाङ्कितभूतलानि।
> पश्यामि यत्पादरजो विमृग्यं ब्रह्मादिदेवैः श्रुतिभिश्च नित्यम्।।
> (अ.रा.२.९.२-३)

अहल्या भगवतः पादाब्जसंलग्नरजःकणात् कृतार्थः अभवत् इति श्रूयते—

> अहो कृतार्थास्मि जगन्निवास ते पादाब्जसंलग्नरजकणादहम्।। (श्री.भाग.१.५.४३)

*श्रीमद्भागवते* पादसेवनस्य महिमा प्राप्यते—

> तावद्भयं द्रविणगेहसुहृन्निमित्तं शोकः स्पृहा परिभवो विपुलश्च लोभः।
> तावन्ममेत्यसदवग्रह आर्तिमूलं यावन्त तेऽङ्घ्रिमभयं प्रवृणीत लोकः।। (श्री.भाग.
> ३.९.६)

*महाभारते* निगद्यते—

> विसर्जितः स रामेण पितुर्वचनकारिणा।
> नन्दिग्रामेऽकरोद् राज्यं पुरस्कृत्यास्य पादुके।। इति।

बाल्मीकीये *अध्यात्मरामायणे* च दृश्यते यद् यदा श्रीरामचन्द्रः अयोध्यां प्रत्यागतवान् तदा भरतजी रामचन्द्रस्य चरणपादुकाद्वयं शिरसि धारयित्वा तस्य पुरतः अगच्छत्, धन्या भरतस्य चरणसेवाभक्तिः। *शाण्डिल्यभक्तिसूत्रे* —

> पादोदकन्तु पाद्यमव्याप्तेः। (*शा.भ.सू.*२.२.१२)

इत्यत्र पादोदकशब्देन पाद्यमेव प्रयुज्यते साक्षाद् भगवच्चरणोदकं न प्राप्तिर्भवति।

> गङ्गाप्रयागपुष्करनैमिषाणि पुण्यानि यानि कुरुजाङ्गलयामुनानि।
> कालेन तीर्थसलिलानि पुनन्ति पापात्पादोदकं भगवतः प्रपुनाति सद्यः।। (*नृ.पु.* ५९.४६) इति।

इत्यादिना पावनत्वेनोक्तं पादोदकं पाद्यरूपमेव पादसंयुक्तजलस्य पादोदकत्वे शालग्रामपूजायां पादोदके तत्पाद्ये च पादोदकशब्दस्य व्यावहारः परिलक्ष्यते।

श्रीजीवगोस्वामी प्रोक्तवान्—पादसेवायां पादशब्दो भक्त्यैव निर्दिष्टः। ततः सेवायां सादरत्वं विधीयते। पादसेवाशब्देन सादरेण प्रीत्या वा सेवा बोध्यते। श्रीमूर्तेः दर्शनं स्पर्शनं, भगवतः मन्दिरपरिक्रमा, पुरुषोत्तम-श्रीक्षेत्र-द्वारका-मथुरादीन् च गमनं, महोत्सवम्, वैष्णवसेवा-तुलसीसेवादिकं च पादसेवायाम् अन्तर्भूयन्ते। धर्मराजो युधिष्टिरो भगवन्तं श्रीकृष्णम् उक्तवान् अमङ्गलनाशार्थं यः तव पादुके परि लब्ध्वा चरन्ति। ये परिचरन्ति देहेन सेव्यतया ध्यायन्ति मनसा तथा गृणन्ति वाचा ते भवस्यापवर्गे मोक्षं विन्दन्ति। *श्रीमद्भागवते*—

> त्वत्पादुके अविरतं परि ये चरन्ति ध्यायन्त्यभद्रनशने शुचयो गृणन्ति।
> विन्दन्ति ते कमलनाभभवापवर्गमाशासते यदि त आशिष ईश नान्ये।। (श्री.भाग. १०.७२.४)

एवम् अनुवृत्तया सेवया भजतो प्रेमलक्षणया भक्तिः अन्तःकरणे भगवतः प्रकाशो भवति, ज्ञानं भवति ततः साक्षाद् अविलम्बेन परां शान्तिम् उपैति। भगवत्पादसेवका भगवत्प्रसादाद् इहामुत्र कृतार्थाः भवन्ति।

## २.५. अर्चनम्

> श्रीविष्णोरर्चनं ये नु प्रकुर्वन्ति नरा भुवि।
> ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम्।। इति।

यः जनः अस्मिन् संसारे श्रीभगवतः पूजनं करोति स एव श्रीभगवतः अविनाशि आनन्दस्वरूपं परमपदं प्राप्नुयात्। भक्ताः धात्वादिनिर्मितमूर्तिचित्रपटादिरूपं भगवतः कस्यापि अभिलषितस्वरूपस्य साकारमूर्तिं निर्माय, सर्वभूतेषु परमात्मा विद्यते इति मत्वा आदरपूर्वकं सेवनेन, सामर्थ्यानुसारं याथार्थ्येन नानाविधोपचारैः श्रद्धापूर्वकेण ईश्वरस्य तत्त्वरहस्यप्रभावादीन् ज्ञात्वा सेवनेन पूजयन्ति, पत्रपुष्पादिभिः तृप्यन्ति, या खलु अर्चनभक्तिः। तत्रार्चनं नाम पूजा।

*नारदभक्तिसूत्रे* पूजादिष्वनुराग इति पाराशर्यः कथ्यते। पञ्चोपचार-षोडशोपचार-षट्त्रिंशोपचारैः न केवलं पूजा भूयते अपि तु तया सह मन्त्रजपैः मणिकाञ्चनसंयोगेन अपि पूजा युज्यते।

> जन्मान्तरसहस्रेषु कृत पाप प्रणाशनात्।
> परदेव प्रकाशाच्च जप इत्यभिधीयते।। (कु.तं. १७.२८)

*शाण्डिल्यभक्तिसूत्रे*—

> तद्यजिः पूजायामितरेषां नैवम्। (शा.भ.सू.२.२.११) इति।

इत्यत्र यज् धातोरर्थः पूजायां परिकीर्त्यते। वैष्णवाः भगवन्तं तस्य अन्तरङ्गाशक्त्या उपासते, बहिरङ्गा शक्तिः एव अन्तरङ्गाशक्तेः विकृतप्रतिबिम्बरूपा अस्ति। भक्तस्य कर्तव्यं परमेश्वरं शक्त्या पूजनं, भक्ताः ईश्वरं स्वकर्मणा पूजां कृत्वा जीवने परमसिद्धिं प्राप्तुं समर्थाः भवेयुः। अतः *श्रीमद्भगवद्गीतायाम्* उच्यते—

> यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततः।
> स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।। (श्री.भ.गी. १८.४६)

भक्तिः अस्माकं हृदि ईश्वरस्य भावं जागृत्य परममान्दम् अनुभावयति। तस्य आचार-व्यवहार-वेशभूषा-भोजनादिकं भक्तिम् आश्रित्य भवति। भक्त्यां भोजनस्य विशेषगुरुत्वं वर्तते कारणं भोजनस्य उपरि अस्माकं शरीरे सत्त्वरजतमसां सन्तुलनं संभवति। वयं यदा ईश्वराय किमपि अर्पयामः तदा तद्भोजनं निवेदितभोगात् प्रसादे परिणमति। इमं प्रसादं गृहीत्वा भक्तः भक्तिं प्राप्नोति।

निमित्त-अनिच्छापूर्वक-गुणवशाद् अपराधत्रयं पूजायां भवितुम् अर्हति। पूजा जपश्चैव सर्वतन्त्रेषु अयं विधिः इति *तन्त्रसारे* प्रोच्यते। पूजा इत्यनेन गायत्रीमन्त्राणां जपः परामृश्यते। आत्मोन्नतिसाधनमेव परमेश्वरस्य पूजा। यस्मात् परमात्मनः अखिलजीवानां सर्जनं परिव्यप्तादिकं सर्वं घटते, तं परमेश्वरं स्वकर्मणा पूजयित्वा मनुष्यः परमां सिद्धिं प्राप्नोति। *स्कन्दपुराणे* वासुदेवः श्रीकृष्णः परब्रह्म इति सूच्यते—

वासुदेवः परं ब्रह्म कल्याणगुणसंयुतः।
भुवनानामुपादानं कर्ता जीवनियामकः।।
तदेव वासुदेवाख्यं परं ब्रह्म निगद्यते।
अन्तर्यामी जीवसंस्थो जीवप्रेरक ईरितः।। इति।

*तन्त्रालोके* अभिनवगुप्ताचार्यः—

पूजा नाम न पुष्पाद्यैः या मतिः क्रियते दृढा।
निर्विकल्पे महाव्योम्नि सा पूजा ह्यादराल्लयः।। (*तन्त्रालोकः* १.२१)

विष्णुपूजाप्रक्रियाह्वानपुरःसरं विसर्जनपर्यन्तं मन्त्रसहितकरन्यासादिविधानेन भगवदाराधनया सर्वं पापं विनश्यति, भगवदाराधनां विना प्रायश्चित्तसंघटनाय अन्यो विषयो नास्ति। विष्णुभक्ति-इन्द्रियवशीकरण-वैदिकमन्त्रजप-पुराणोक्तस्त्रोत्रपाठविषये अपि निर्देशः प्राप्यते। देवपूजा-यज्ञ-तीर्थस्नानतपस्याव्रतादिभिः न तथा शुद्धिर्जायते यथा भगवद्ध्यानेन लभ्यते। मुनिना नारदेन निगद्यते—

न भूपदेवार्चनयज्ञतीर्थस्नानव्रताचारक्रियातपोभिः।
तथा विशुद्धिं लभ्यतेऽन्तरात्मा यथा हृदिस्थे भगत्यनन्ते।। (*श्री.भाग.*४.८५.२५) इति।

अथ विष्णुसंप्रदानकदाने पूजने परिचायने च श्रुतिः— नू मर्तो दयते सनिष्यन् यो विष्णव उरुगायाय दाशत्। प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात्।

यद्यदिष्टतमं लोके यच्चान्यदपि ते गृहे।
तत्तद्धि देयं प्रीत्यर्थं देवदेवाय चक्रिणे।। इति।

पूजायां पत्रादेः अपि दानं श्रूयते। पत्रादीनां दानम् अन्यथा हि वैशिष्ट्यम्। तुलसीपत्र-बिल्वपत्र-वटपत्रादीनां दानम्, यथा— अष्टशताधिक-बिल्वपत्राणां प्रयोगः भवति गणेश-शिव-दूर्गापूजादिषु विविधयज्ञक्रियासाधनार्थम्। *शाण्डिल्यभक्तिसूत्रे*-

पत्रादेर्दानमन्यथा हि वैशिष्ट्यम्।। (शा.भ.सू.२.२.१५)

भक्त्या पत्रपुष्पफलतोयादिकं भगवन्तं दातव्यम्, *भगवद्गीतायाम्*—

पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति। (श्री.भ.गी. ९.२६)
तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः।।

इत्यादिना प्राप्तस्य भगवदुद्देश्याय सर्वदानस्य भक्त्याः अङ्गत्वं विधीयते। राजा पृथुः अम्बरीष इत्यादयः अनेके भक्ताः आसन् ये विविधैः उपचारैः मनसा इन्द्रियैश्च पूजयित्वा अनायासेन भगवन्तं प्राप्तवन्तः। यथा उपाचारादीन् विना केवलं भक्तिपूर्वकं पूजनेन सुदामा तण्डुलगुटिकैः, गजेन्द्रः पुष्पेण, द्रौपदी शाकपत्रेण च भगवन्तं पूजयित्वा परमसिद्धिं प्राप्तवन्तः।

**२.६. वन्दनम्**

तत्र तावद् भगवद्वन्दनप्रवृत्तिरपि सर्वतो मङ्गलम् अक्रूरवाक्येन प्रतीयते—

ममाद्यामङ्गलं नष्टं फलवांश्चैव मे भवः।
यन्नमस्ये भगवतो योगिध्येयाङ्घ्रिपङ्कजम्।। (श्री.भाग.१०.३८.६) इति।

यतः भगवतः अङ्घिपङ्कजं नमस्करिष्यति। एतेन अमङ्गलं नश्यति। भवश्च फलवान् भगवतः नमस्कारसामग्री प्राप्ता। एवम् आकाशं ज्योतींषि नक्षत्राणि सत्वानि प्राणिनः, सरितश्च समुद्राश्च सरितसमुद्रान्, यत्किंचिद् भूतं वस्तु, अनन्यः एतेषु भगवतः अन्यत्वदर्शनशून्यो निष्कामो वा एतानि हरेः शरीरम् इति बुद्ध्या प्रणमेद् इत्यर्थः।

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्।
भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम्।।
(श्री.भाग.११.५.३३)

अत्र भगवतः चरणपद्मं वन्दितं भवति। भगवतः शास्त्रवर्णितस्वरूपं नामकीर्तनं धात्वादिनिर्मितमूर्तिचित्रपटादिकं शरीरेण मनसा वा श्रद्धासहितं साष्टाङ्गप्रणिपातेन अखिलचराचरेषु परमात्मनः स्वरूपं मत्वा श्रद्धापूर्वकं प्रणामं कृत्वा भक्तः भगवत्प्रेम्णि मुग्धो भवति, सा एव

वन्दनभक्तिः। उद्धवस्य स्तुतिः— त्यागोऽयं दुष्करो भूमन् कामानां विषयात्मभिः। सुतरां त्वयि सर्वात्मन्न भक्तैरिति मे मति।। इति। *भगवद्गीतायाम्* भगवतः सर्वस्वरूपेषु नमस्कारः सूच्यते—

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व।
अनन्तवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि सर्वः।। (श्री.भ.गी. ११.४०)

न वासुदेवात्परम् अस्ति मङ्गलं, वासुदेवं नमस्कृत्य न कोऽपि दुःखी भवति।

श्रोतव्या सत्कथा विष्णोर्नामसंकीर्तनं मुदा।
द्वारकापथिगच्छद्भिरनन्योन्यं भक्तिवर्धनम्।।
जप्तव्यं वैदिकं जाप्यं स्तोत्रमागमिकं तथा।
पौराणिकं च यत्स्तोत्रं विष्णोः सुप्रीतिहेतवे।। इति।

मन्दिरादौ उपासकैः यदा स्त्रोत्रादिपाठेन भगवतः उपास्यदेवस्य वा प्रशस्तिः गीयते प्रार्थना क्रियते वा तदा सा वन्दनभक्तिः। गायत्रीमन्त्रादिपाठम् अपि[17] वन्दनाभक्तिरूपेण समीहते।

## २.७. दास्यम्

परिचर्यया दास्यं प्रकाश्यते। भगवतः गुण-रहस्य-प्रभावादीन् ज्ञात्वा श्रद्धया प्रेम्णा तस्मिन्  ईश्वरे सेवाप्रदर्शनं आज्ञापालनं च दास्यभक्तिः। *क्रमसन्दर्भे*—

अस्तु तावत्तद्भजनप्रयास: केवलतादृशत्वाभिमानेनापि सिद्धिर्भवति।

भगवान् श्रीकृष्णः कथितवान्—

अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव।
मदर्थमपि कर्माणि कुर्वन् सिद्धिमवाप्स्यसि।। (श्री.भ.गी. १२.१०)

श्रीकृष्णसन्तुष्टिविधानार्थम् अनुष्ठितं कर्म एव पारमार्थिके कर्मणि पर्य्यवसति। त्रेतायुगे रामचन्द्रं प्रति हनुमतः दास्यभक्तिः गोचरीभूयते, *रामचरितमानसे रामायणस्य* सुन्दरकाण्डे लङ्काकाण्डे च हनुमता कृतम् अखिलं कर्म तस्य प्रभोः श्रीरामचन्द्रस्य कृते एव—इत्यत्र प्रकटितं निष्कामकर्म एव दास्यभक्त्याः परिचायकम् अस्ति। अस्या दास्यभक्त्याः आदर्शोदाहरणम् श्रीलक्ष्मण-हनुमत्-इत्यादयः। The relationship of the devotee with the lord in various stages is beautifully described here. Sri Hanuman says to lord Ram देहबुद्ध्या तु दासोऽहं

जीवबुद्ध्या त्वदंशक:। आत्मबुद्ध्या त्वमेवाहमिति मे निश्चिता मति:। कृष्णभक्तः केवलं कृष्णभक्तिं प्रति तस्य दास्यत्वमेव इच्छति—

कृष्णभक्तिव्यवहितं भक्तानां नाभिवाञ्छितम्।
कृष्ण: भुग्भोक्तुं करोति दासतां मुने:।। (श्री.भाग.२.८.५) इति।

## २.८. सख्यम्

दास्यापेक्षया सख्यस्य विशेषत्वं सख्ये प्रीतिमूलको विशस्तभावः अस्ति। भगवतः प्रभावतत्वं रहस्यं महिमानं च अवगम्य अतीव विश्वासपूर्वकं मित्रभावेन रुच्यनुसारं तस्मिन् भगवति अनन्यप्रेमभावः यत्र वर्तते, गुण-रूप-लीलादिभिश्च मुग्धो भूत्वा निरन्तरं साहचर्यं प्रसन्नता एव सख्यभक्तिः। सख्यभक्तिप्राप्त्यर्थं भगवद्भक्तानां सङ्गः, भगवतः सेवनं जीवनचरित्राणाम् अध्ययनं गुण-लीला-प्रभावादिकं च भक्तैः श्रोतव्यम्। सख्यभक्त्या भगवान् भक्ताधीनो भवति, ततः तस्य भक्तस्य आनन्दस्य शान्तेश्च सीमा नास्ति। सख्यभक्त्या उदाहरणं यथा— श्रीविभीषण-सुग्रीव-उद्धव-अर्जुन-सुदामा-व्रजसखी इत्यादयः। उद्धवस्य भगवता श्रीकृष्णेन अतीव गहनं सख्यम् आसीत् कारणं भगवान् तस्य पुरतः किमपि न गोपितवान्। श्रीकृष्णः गोपिभ्यः सन्देशं प्रेषयितुम् उद्धवं सर्वोत्तमपात्ररूपेण चयनितवान्। एतद् वर्णनं श्रीशुकदेवः कथितवान्—

वृष्णीनां प्रवरो मन्त्री कृष्णस्य दयित: सखा।
शिष्यो बृहस्पते: साक्षादुद्धवो बुद्धिसत्तम:।। (श्री.भाग. १०.४६.१) इति।

*श्रीमद्भगवद्गीताया*म्—अर्जुनस्य सख्यभावं भगवान् स्वयमेव उद्घोषितवान्— भक्तोऽसि मे सखा। (श्री.भ.गी. ४.३)—इष्टोऽसि मे दृढमिति।(श्री.भ.गी. १८.६४) इति।

## २.९. आत्मनिवेदनम्

शरीरेण मनसा च श्रद्धया प्रेम्णा परमात्मनि भगवति सर्वकर्मणां समर्पणम् एव आत्मनिवेदनभक्तिः। भगवान् स्वयम् एव अस्याः आत्मनिवेदनरूपाया भक्त्याः महत्त्वं प्रकाशयन् *श्रीमद्भगवद्गीता*यां बहुलं प्रशंसितम्—

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।। (श्री.भ.गी. १८.६२)

भगवतो रसमयं विग्रहं प्रति एतादृशानां भक्तानां कृते सर्वं जगत् परमप्रेमपूर्णं परमानन्दमयं च दृश्यते, स भक्तो येन मार्गेण गच्छति तस्मिन् मार्गे श्रद्धा प्रेम भक्तिः आनन्दः समता शान्तिश्च सन्ति। धरणी एतादृशान् भक्तान् धारयन् सनाथा च भवेत्। पितरः प्रमुदिता भवन्ति देवता च नृत्यं प्रारभन्ते। *नारदभक्तिसूत्रे*—

मोदन्ते पितरो नृत्यन्ति देवताः। (ना.भ.सू. ७१)

गोपाङ्गनाः, भक्तः प्रह्लादः, महाराजः बलिश्च इत्यादयः अस्याः आत्मनिवेदनभक्त्याः परमभक्ताः आसन्। *भगवद्गीतायाम्*—

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।। (श्री.भ.गी. १८. ६६) इति।

भगवति समर्पितानि कर्माणि शुभाशुभफलं दातुम् असमर्थत्वात् तेषां बन्धनाभाव एव सूच्यते। *शाण्डिल्यभक्तिसूत्रे*—

स्वसमर्पितं ग्राह्यमविशेषात्। (शा.भ.सू. २.२.१३)

इति वाक्ये नैष्कर्मसिद्धिं परमां संन्यासेन अधिगच्छति— इति पद्योक्तेन निष्कामकर्मत्यागेन परमेश्वरशरणापत्तिरूपं भक्तिकथनं सकृत् कीर्तनस्मरणाद्युत्पादनेन सर्वपापक्षयं जनयिष्यति। *ब्रह्मवैवर्तपुराणे* व्रजभूमौ श्रीराधिकायाः तथा गोपिकानाम् अनन्यप्रेमास्पदम् अवलोक्य प्रसन्नाप्लुतचित्तेन उद्धवो ब्रूते—

धन्यं भारतवर्षं च पुण्यदं शुभदं वरम्।
गोपीपादाब्जरसा पूतं परमनिर्मलम्।।
ततोऽपि गोपिका धन्या मान्या योषित्सु भारते।
नित्यं पश्यन्ति राधायाः पादपद्मं सुपुण्यदम्।। (ब्र.वै.पु. ५.९४.७७-७८) इति।

*श्रीमद्भगवद्गीतायां* नवमाध्याये सततं कीर्तयन्तः—मां यतन्तश्च दृढव्रताः—नमस्यन्तश्च मां भक्त्या—ज्ञानयज्ञेन चाप्यन्ये यजन्तो—अनन्याश्चिन्तयन्तो मां ये जनाः—कौन्तेय तत्कुरुष्व मदर्पणम्—शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः इत्यादिश्लोकैः या गौणभक्तयः कीर्तनं नाम्नाम् अभिधानम्, भक्त्यर्थं यत्नश्च, व्रतः एकादशी उपवासाद्यनुष्ठानम्, नमस्कारः स्वापकर्षबोधक-करशिरःसंयोगादिव्यापारः, ज्ञानयज्ञो मुख्यामुख्यभेदेन एकत्वपृथकत्वविषयतया, ध्यानम् अनुस्मृतिः,

यागः पूजा भगवन्तमुद्दिश्य पत्रादिदानं च, विहितनिषिद्धसर्वकर्मणां परमेश्वरे समर्पणम् –एतानि परभक्त्या अङ्गानि भवन्ति।

अपि च, मनोब्रह्म इति उपासीत— इत्यादिवचनैः उपासनादिशब्दकवलीकृतानि अपि भक्तिसाधनानि सन्ति। ताभ्यः गौणभक्तिभ्यः पावित्र्यं पापक्षयपूर्वकम् अन्तःकरणं शुध्यते। *शाण्डिल्यभक्तिसूत्रे* तेषु कीर्तनादिषु एकस्य अपि अतिशयानुष्ठानेन स बलवान् भवति, स एकोऽपि परमेश्वरतुष्टिं जनयित्वा पराभक्तये प्रभवति। कीर्तनादिषु एकेन अपि दृढतरसेवितेन भगवत्प्रसादाद् भक्तिः प्राप्यते।

> ईश्वरतुष्टेरेकोऽपि बली। (शा.भ.सू.२.२.८)
> लघ्वपि भक्ताधिकारे महत्क्षेपकमपरसर्वहानात्। (शा.भ.सू. २.२.२१)

यद्यपि लघु तथापि ईषत्कीर्तनादि महतः पापस्य क्षेपकं नाशकं भवति। तदर्थं भक्तस्य द्वादशशब्दैः भक्ताधिकारिकत्वम् इति भावः। युगान्तरे तु साधनान्तराद् अपि कीर्तनादिरूपा भक्तिः मुक्तिसाधनं सर्वयुगेषु भवति। यस्य मुकुन्दस्य स्मरणमात्रेण जन्मसंसारबन्धनाद् विमुच्यते जातकः। यतो भक्ताधिकारे प्रायश्चित्तकारणात् सर्वेषां त्यागलक्षणस्य हानिप्रतीतिः भवति। स्मरणकीर्तनादयः पापस्य प्रायश्चित्तभूतेषु कृच्छचान्द्रायणव्रतादिस्थानेषु प्रतिष्ठिताः भवन्ति। गौणभक्तिः मुक्तये साक्षात्साधनं भवितुं न अर्हति। कीर्तनादिगौणभक्तिसाधनानि परां भक्तिं कृत्वा एव मोक्षाय प्रयुज्यन्ते। तथा हि उच्यते—

> परां कृत्वैव सर्वेषां तथा ह्याह। (शा.भ.सू.२.२.२९)

वित्तव्ययायाससाध्य-राजसूयाश्वमेधशतकादिकजन्य-धर्माधिकधर्मजनकतया,एकैकपापनाशक-कृच्छ्रचान्द्रायण-प्राजापत्याद्यपेक्षया वित्तव्ययायासनैः अपेक्ष्यणाद् अत्यन्तसुखसाध्यतया नवधाभक्तेः एव श्रेष्ठत्वं प्रतिपाद्यते।

उल्लेखपञ्जिः

[1] श्रद्धा हि शास्त्रार्थविश्वासः। शास्त्रं च तदशरणस्य भयं तच्छरणास्याभयं वदति।
अतो जाताय: श्रद्धायास्तत् शरणापत्तिरेव लिङ्गमिति। (*भक्तिसन्दर्भः*)

2 *निरुक्तम्*, *निघन्टुः*, परिच्छेदः-१, पृ-४६४

3 शुद्धा आस्तिक्यबुद्धिः, भक्तिः भजनं तदेकतात्पर्बुद्धिः,
ध्यानं विजातीय-प्रत्ययशून्य-सजातीय-प्रत्यय-प्रवाहः,
एतेषां योगः संबन्धः तत्कारणमिति यावत्, तस्मात्—कै.उ. २

4 ततो यदुत्तरतरं तदरूपमनामयम्।
य एतद्विदुरमृतास्ते भवन्त्यथेतरे दुःखमेवापियन्ति।। श्वे.उ. ३.१०

5 सत्सङ्गमहिमा ब्रह्मदेवेन निगद्यते—
सत्सङ्गो द्विजभक्तिश्च गुरुदेवाग्निर्तर्पणम्।
गोप्रदानं वेदपाठः सत्क्रिया सत्यभाषणम्।।
गोभक्तिदानभक्तिश्च सदा धर्मस्य साधनम्।
कृष्णे सुप्ते विशेषेण नियमोऽपि महा फलः।। *स्क.पु.* २३४.६.५-६ इति।

6 चेत् वैदिकमन्त्रः सुष्ठुतया उच्चार्यते, शब्देन उत्पन्ना ध्वनिः प्रभावात्मिका भवति, एकः शब्दः सुप्रयुक्तः सम्यग् ज्ञातः स्वर्गे लोके कामधुग् भवति। परंतु शब्दस्य अशुद्धे उच्चारणे सति अर्थः पूर्णतया परिवर्तते, *पाणिनिशिक्षायाम्*— स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्।

7 उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।
अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।। इति।

8 किंच अस्य वक्ता अपि आश्चर्यः अद्भूतवदेवानेकेषु कश्चिदेव भवति। तथा श्रुत्वापि अस्य आत्मनः कुशलो निपूणः एव अनेकेषु लब्ध्वा कश्चिदेव भवति। यस्माद् आश्चर्यो ज्ञाता कश्चिदेव कुशलानुशिष्टः कुशलेन निपुणेनाचार्येणानुशिष्टः सन्। श.भा.

9 दश नामापराधा सन्ति, १) सन्तानां निन्दा २) भगवतः नाम्नां लघु-बृहत्-भेदभावः ३)गुरोः अपमानम् ४) शास्त्रनिन्दा ५) नाम्नि अर्थवादे विश्वासः ६) नाम आश्रित्य पापाचरणम् ७) धर्म-व्रत-दान-यज्ञादिभिः नाम तुलनम् ८) अश्रद्धालोः हरिविमुखानां सकाशे प्रभोः नाम प्रचारः ९) नाममाहात्म्यं श्रुत्वापि तस्मिन् न प्रेमप्रदर्शनम् १०) अहंकार-ममता-भोगादिविषयेषु आसक्तिः।

[10] कपिलवचनेनाह चतुर्भिः— तितिक्षव इति। साधवः शास्त्रानुवर्तिनः, साधुः सुशीलं भूषणं येषाम्।। किं च मय्यनन्येनेति। अनन्येन निष्कामेन दृढामव्यभिचारिणीम्, मत्कृते मत्प्रीत्यर्थम्।। किंच मदाश्रयेति। एतान् साधून् आध्यात्मिकादयस्तापा न तपन्ति न व्यथयन्ति, यतो मद्गतचित्तान्, यद्वा ये तापैर्नाभिर्भूयन्ते ते साधव इत्यर्थः।। *Bhakti Ratnāvalī*, With Kantimala Commentary edited and translated by Dr. Shri Krishnamani Tripathi.

[11] ध्यायन् कृते यजन्यज्ञैस्त्रेतायां द्वापरेऽर्चयन्।
यदाप्नोति तदाप्नोति कलौ संकीर्त्य केशवम्।। वि.पु. ६.२.१७

संकीर्तनस्य प्रशंसा श्रूयते—
कलेर्दोषनिधे राजन्नास्ति ह्येको महान् गुणः ।
अत्र संकीर्तनेनैव सर्वः स्वार्थोऽभिलभ्यते।। इति श्री.भाग. १२.३.५१

*शिवपुराणे* सुधर्मनामराक्षं प्रति रुद्रवाक्यम्—
कृष्णनाम सदा गेयं हरेरपि।
कीर्तनीयं सदा नाम मुरारेः परमा गतिः।।
महादेव महादेव महादेवेति यो वदेत्।
एकेनैव भवेन्मुक्तिर्द्वाभ्यां शम्भुर्ऋणी भवेत्।। शि.पु.

[12] संकीर्तनं भगवतो जगदीश्वरस्य।
भक्तानुकम्पनपरस्य कृपार्णवस्य।।
दीनार्तिदुःखदलनस्य सुरोत्तमस्य।
सांसारिकं सकलतापमपाकरोति।। प.पु. इति।

[13] नामचिन्तामणिः कृष्णश्चैतन्यरसविग्रहः।
पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः।। प.पु. इति।

[14] गां विन्दति इति गोविन्द:। गां ज्ञानं सर्वेषामिन्द्रियाणि विन्दति। गवां विद: लाभ: यस्य स: गोविन्द:। गोविन्दशब्दस्य अर्थ: शंकराचार्येण निरूप्यते—नष्टां वै धरणीं पूर्वमविन्दद्यद्गृहागताम्। गोविन्द इति तेनाहं देवैर्वाग्भिरभिष्टुत:।। *महाभारतम्* १२.३३०.५

[15] अपवित्रः पवित्र: वा सर्वावस्थां गतोऽपि वा।

य: स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचि:।। प.पु. ५.८०. १२
स्मरणं श्रीहरेः पादपद्मं निर्वाणकारणम्। ना.पञ्च.२.७.१७

16 शृन्वन् गृणन् संस्मरयंश्च चिन्तयन्।
नामानि रूपाणि च मङ्गलानि ते।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते। श्री.भाग.–१०.२.३७

श्रीविष्णुसहस्त्रनामस्त्रोत्रम् –
यस्य स्मरणमात्रेण जन्मसंसार बन्धनात्।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे।।

17 गायत्रशब्दः स्तुत्यर्थस्य गैधातोः करणे स्ट्रन् प्रत्ययेन निष्पद्यते, निरूक्ते उच्यते—गायत्रं गायतेः स्तुतिकर्मणः। गायति अनेन इति गायत्रम् स्त्रीलिङ्गे ङीप्प्रत्ययेन गायत्री इति। छा.उ.। गायत्री वा इदं सर्वभूतं यदिदं किंच वाग्वै गायत्री वाग्वा इदं सर्वभूतं गायति च त्रायते च। छा.उ. ३.१२.१

# तृतीयोऽध्यायः

## *शाण्डिल्यभक्तिसूत्र*-समीक्षणम्

स तन्मयो ह्यमृत ईशसंस्थो ज्ञः सर्वगो भूवनस्यास्य गोप्ता।
य ईशेऽस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय॥

यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै।
तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये॥

He is the soul of the universe, He is immoral, His is the Rulership; He is the all-knowing, the all-pervading, the protector of the universe, the Eternal Ruler. None else is there efficient to govern the world eternally. He who at the beginning of creation projected Brahmā and who delivered the Vedas into him— seeking liberation I go for refuge into that effulgent one, whose light turns the understanding towards the Ātman.

*Śvetāśvatara Upaniṣad*, VI— 17-18

# तृतीयोऽध्यायः

## *शाण्डिल्यभक्तिसूत्र*-समीक्षणम्

### १. भक्तिलक्षणविमर्शः

#### १.१. महर्षिणा शाण्डिल्येन भक्तिलक्षणम्

शण्डिल गर्गादिभ्यो यञ् शाण्डिल्यः मुनिविशेषः। *शाण्डिल्यसंहितायाः* प्रणेता महर्षिः शाण्डिल्यः। परमेषु भक्तिसूत्रप्रणेता कश्यपवंशोत्पन्नः महर्षिः शाण्डिल्यः पञ्चरात्रानुसारमिति स्पष्टं प्रतिभाति। *शतपथब्राह्मणे* यज्ञस्य अग्निः शाण्डिल इति।

भक्तिचन्द्रिकायां नारायणतीर्थेन निगदितं भक्तिः न सेवामात्रम्, समाने अपि राजसेवाकर्मणि भक्तोऽयमभक्तोऽयमिति भेदव्यपदेशदर्शनात्। तस्माद् भक्तिः भावविशेष इति प्रोच्यते। महर्षिः शाण्डिल्यः उक्तवान् तस्य *शाण्डिल्यभक्तिसूत्रे*—

अथातो भक्तिजिज्ञासा। (शा.भ.सू. १.१.१)

*पूर्वमीमांसायां* कर्मकाण्डात्परं भक्तिः जिज्ञासितव्या। कर्मकाण्डः इत्युक्ते वयं यज्ञम् अवगच्छामः, याज्ञिकक्रियाकलापेषु भक्त्या आलोचनायां यज्ञस्य प्रासङ्गिकता आयाति। अथशब्दः स्वरूपेण मङ्गलार्थकः आरम्भ एव द्योतयति। जिज्ञासाशब्दो निरूपणलाक्षणिकः अर्थः, आनन्तर्ये आनन्तर्यनिरूपकः अर्थः आयाति।

कर्म ज्ञानं च उभययोः यद्यपि चेतसि भगवद्गुणकीर्तनस्य इव आनन्दतन्मयता न लभ्यते परंतु भक्तिः एव विजातीयानन्दस्य आविर्भावहेतुः भवति, अतः का इयं भक्तिः? कतिविधा? इति जिज्ञासा ज्ञातुम् इच्छा भवति इत्यर्थः। अत्र भक्तिमीमांसा इति विहाय भक्तिजिज्ञासा इति कथनेन भक्तेः पुमर्थता सूच्यते परंतु भक्तिः स्त्रीवाचका भवति। अत्र अस्य शास्त्रस्य भक्तिः विषयः, भक्तिद्वारा कैवल्यं फलम्, भक्तिकामः अधिकारी, संबन्धस्तु शास्त्रकैवल्ययोः प्रयोज्यप्रयोजकभावः।

महर्षिणा शाण्डिल्येन तु आत्मीये *शाण्डिल्यभक्तिसूत्रे* परमतत्त्वम् इष्टदेवम् ईश्वरं प्रति अनुरक्तिरेव भक्तिः निगदिता, यतो हि परमेश्वरस्य अभिमुखं प्रेम्णा एव जीवः अमृतरूपं मोक्षं लभते। तथा हि –

सा परानुरक्तिरीश्वरे।[1]

अत्र 'सा' इति लक्ष्यनिर्देशः 'परा' इति गौणीं नवधाभक्तिं व्यावर्तयति, 'ईश्वर' इति आराध्याभिप्रायेण प्रोच्यते। लक्षणम् इत्युक्ते लक्ष्यते ज्ञायते अनेन इति। भक्त्याः स्वरूपकथनं स्वरूपलक्षणं सूचयति। इह जगदाराध्येन परमेश्वरविषया अनुरक्तिः एव भक्तिः। स्नेह-प्रेम-श्रद्धाभेदेन लौकिकः अनुरागः त्रिविधो भवति। तत्र पुत्रकन्याशिष्यादिषु निम्नगामी अनुरागः स्नेह उच्यते। मित्रकलत्रादिषु समानगामी अनुरागः प्रेम निगद्यते। मातृपितृगुरुजनादिषु मान्यगामी अनुरागः श्रद्धानाम्ना व्यपदिश्यते।

अनुरागो द्विविधः काममूलकः प्रेममूलकश्चेति। काममूलक आसक्तिः प्रेममूलकश्च भावः इति प्राकट्यते। कामस्य मूलं स्वार्थः तस्य लक्ष्यम् इन्द्रियतृप्तिः, प्रेम्णो मूलं च पदार्थपरता। अतः कामी यदा स्वार्थपरतां परित्यज्य परार्थपरताव्यजनेन अग्रसरति तदा स प्रेमिको भवति। प्रेमवर्धनेन प्रेमिकस्य स्वार्थवृत्तिः लीयते, तदा तस्य अन्तःकरणम् अनुरागतरङ्गिनीं कामभूमिं विहाय प्रेमभूमौ प्रवहति। स्वार्थस्य अज्ञानमूलत्वात् कामिनि विशुद्धप्रेम्णः अभावाद् न असौ भक्त्या अधिकारी भवति, अपि तु भगवति उन्मुखः प्रेमिक एव भवति भक्त्या अधिकारी। तथा चोक्तं भगवता श्रीकृष्णेन *श्रीमद्भागवते*—

मिथो भजन्ति ये सख्यः स्वार्थैकान्तोद्यमा हिते।
न तत्र सौहृदं धर्मः स्वार्थार्थं तद्धि नान्यथा।। (श्री.भाग. २०.३२.१७) इति।

यथा हिमालयप्रदेशात् निर्गमनकाले कापि धारा अलकनन्दा काचन मन्दाकिनी काचित् च भागीरथीति गीयते, पश्चात् तिस्रो मिलित्वा समतलभूमौ प्रवहन्त्यो ताः गङ्गानाम्ना व्यपदिश्यन्ते, तथैव अनुरागमयी धारा स्नेह-प्रेम-श्रद्धारूपेण पति-पुत्र-मित्र-पितृप्रभृतिषु प्रवहन्ती चञ्चलरूपा पावनी गीयते। अनन्तरं स्वीय-त्रिविध-नामरूप-स्वभावान् परित्यज्य स्वार्थरहित-भगवद्भावमय-समतलप्रदेशे एकीभूय शान्तधारारूपेण यदा प्रवहति तदा इयं धारा भक्तिः इति प्रोच्यते। तथा च पुत्र-मित्र-पितृप्रभृतिषु या अनुरागोत्पत्तिः स्नेह-प्रेम-श्रद्धारूपेण जायते सा एव पश्चाद् भगवद्भावोन्मुखा ईश्वरानुरागरूपिणी भक्तिः इत्यभिधीयते। गुरुभक्तिः देवभक्तिरपि ईश्वरभिन्नदेवतायाः भक्तिरूपेण बोध्यते—

देवभक्तिरितरस्मिन् साहचर्यात्। (शा.भ.सू. १.२.१८) इति।

भक्तिः कस्मिन् करणीया, उत्तरं *भक्तिसूत्रे* प्राप्यते—ईश्वरे— भक्त्यार्थम् आस्तिक्यवादे विश्वासः एव आवश्यिक-कर्तव्यतया गण्यते। ईश्वरः सर्वशक्तिमान् सर्वनियन्ता अद्वितीयसत्ता। ईश्वरस्य सद्भावे किं

प्रमाणम्[2], नारदाचार्येण— 'आत्मरतिः' इति पदेन आत्मनि परमात्मनि रतिः प्रेमैव प्राकट्यते। परमात्मनि मनसः स्थितत्वे अमृतत्वप्राप्तिर्भवति, *छान्दोग्योपनिषदि*—

ब्रह्मसंस्थोऽमृतत्वोपदेशात्। (छा.उ. २.३.२) इति।

तद्संस्थिते अस्मिन् ब्रह्मणि स्थितः अयं(जीवात्मा) परमात्मनः अंशः। 'यतो वा इमानि जातानि जायन्ते' इत्यादौ परमेश्वररूपेण तथा 'ममैवांशो जीवलोके जीवभूतः सनातनः' इत्यादौ जीवरूपेण ब्रह्म द्योत्यते। अत्र 'राग' इति प्रश्ने—

द्वेषप्रतिपक्षभावाद्रसशब्दाच्च रागः। (शा.भ.सू.१.१.६)

ईश्वरस्य स्वभावः ऐश्वर्यरूपः अस्ति, अस्मिन् ईश्वरे यः अनुराग स ईश्वरः ऐश्वर्यरूपः भवति। *शाण्डिल्यभक्तिसूत्रे* अनुराग एव भक्तिसंज्ञायां मूख्यरूपेण गण्यते यत्र द्वेषः सर्वथा त्यज्यः। रागे द्वेषः न विद्यते—

तस्मात् द्वेषादयस्तु नैवम्।(शा.भ.सू.२.१.१९)

योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये कृष्णगतेन कृष्णे वासुदेवे समाहितेन अन्तरात्मना अन्तःकरणेन श्रद्दधानः सन् यो भक्तः सेवते भजते स सर्वश्रेष्ठो योगी भवेत्। अतो रागः[3] क्लेशत्वात् हेयः त्यज्यः परंतु परब्रह्मणि ईश्वरे रागो भवति चेत् अस्मिन् भगवति सा रतिरूपेण[4] व्यज्यते। भावाद् रसनिष्पत्तिः भवति, *तैत्तिरीयोपनिषदि*—

रसो वै सः। रस ह्येवायं लब्धानन्दी भवति। (तै.उ. २.७.२)

इत्यत्र रसशब्दः[5] *तैत्तिरीयोपनिषदः* प्रभावं सूचयति। भगवान् वासुदेवः सर्वकारणकारणम्, ईश्वर एव कर्ता, सर्वं खलु ईश्वरेच्छया भवति, ज्ञाने तथा भक्तौ कर्ताभावो न विद्यते, कर्मणि कर्तव्यभावो विद्यते अहंकारस्य समवेतत्वात्, अतो भक्तये अहंकारः सर्वथा वर्जनीयः। साधनभजनस्य लक्ष्यं तु इष्टसाधना एव, इष्टस्य ध्यानेन समाहितः तद्भावापन्नो भूत्वा सर्वत्र भक्तः निजस्वेष्टसत्तां जागरयति। सच्चिदानन्दस्य स्फुरणं भगवदिच्छापूरणं जीवानां प्रति कल्याणं यज्ञेश्वरस्य निर्वाचनं च यज्ञेश्वरपूजायामेव वर्तते। वासुदेव एव सच्चिदानन्दं ब्रह्म, अकारमात्रत्वात् केवलं विग्रहमात्रं प्रत्यभिज्ञया इन्द्रियसन्निकर्षरूपसंस्कारतो श्रीकृष्णः परमात्मा एव त्रैलोक्यस्वामी भवति। *शाण्डिल्यभक्तिसूत्रे*—

वासुदेवेऽपीति चेन्नाकारमात्रत्वात्। (शा.भ.सू.२.१.२६) इति।

सर्वव्याप्तत्वाद् अन्तर्यामिसत्त्वाद् निर्गुणरूपात्मनि भक्तः न किमपि समर्पयति, गुणः प्रकृतेः धर्मः, समर्पणं केवलं सगुण-साकाररूपात्मनि एव करणीयम्। *श्रीमद्भगवद्गीतायाः* दशमाध्याये –

वृष्णीनां वासुदेवोऽस्मि पाण्डवानां धनञ्जयः। (श्री.भ.गी. ३७.१०)

सुखानुशायी राग इति *पातञ्जलदर्शने* प्रियदर्शनजन्यं सुखं मे भवतु इति वासना एव अनुरक्तिः। नैयायिकादयस्तु आराध्यत्वेन ज्ञानं भक्तिः इति उचुः, तत्र आराधना मूलतो गौरवसंबलितां प्रीतिसूचकक्रियां दर्शयति, तत् पूजादिकं पूज्यत्वादिना आश्रयभक्तिरूपेण पर्यवस्यति। अपि च शाण्डिल्यमहोदयेन—

उभयपरां शाण्डिल्यः शब्दोपपत्तिभ्याम्। (शा.भ.सू.२.१.५)

उभयपरा- स्वस्य अन्तःकरणं कदाचिद् आत्मना कदाचिद्वा भगवता योजनीयम्। अन्तःकरणं व्यवहारकालेन ईश्वरे साधनाकाले च आत्मनि समर्पणीयम्। परमात्मा सर्वज्ञः जीवात्मा अल्पज्ञः परंतु जीवात्मा परमात्मनः अंशविशेषः। यद्यपि ईश्वरजीवयोः भेदो वर्तते तथापि जीवात्मपरमात्मनोः तत्त्वतः अभिन्नत्वं वर्तते— तथा हि जीवब्रह्मणोः एकता एव ध्वन्यते—

वैषम्यादसिद्धमिति चेन्नाभिज्ञानवदवैशिष्ठात्। (शा.भ.सू.२.१.६)

जीवात्मनि क्लेशो विद्यते, अतः परमात्मनि अपि क्लेशो वर्तते इति प्रश्ने उत्तरम् एवं भवति— क्लेशेन अपरामृष्टः क्लेशकर्मविपाकाशयैः अपरामृष्टः पुरुषविशेषः ईश्वरः। प्रभोः प्रेम द्वेषादिक्लेशराहित्यम् अस्ति। *शाण्डिल्यभक्तिसूत्रे*—

न च क्लिष्टः परः स्यादनन्तरं विशेषात्। (शा.भ.सू.२.१.७)

जीवे अविद्या-अस्मिता-राग-द्वेष-अभिनिवेशाः पञ्चक्लेशा आगन्तुका एव, न तु स्वभावजा गुणाः। ज्ञाने आत्मसाक्षात्कारो भक्तायां च ईश्वरसाक्षात्कार इत्येव द्वयोः अन्तरम् अस्ति। पूर्णताप्राप्ते समष्टितत्त्वे सनातनधर्मावलंबिनाम् इष्टः अभीप्सितः प्रार्थित आराध्य उपास्य ईश्वर एव अस्ति। आत्मनः शान्तशिवाद्वैतस्वरूपलाभ एव सनातनधर्मावलंबिनां प्रधानम् उद्देश्यम् अस्ति। ईश्वरः सर्वविधो विकारवर्जितो ज्ञानस्वरूपः स्वयंप्रकाशो ब्रह्मज्योतिः अस्ति। वासुदेवः सर्वमिति स महात्मा सुदुर्लभः तथा नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः—इत्युक्त्वा अनुभूतिः विनिगद्यते। ममात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः—इत्युक्त्वा सर्वजीवेषु सेवा व्यज्यते। भगवतः मायाशक्तिवशाद् इदं जगद् वशीभूयते—

भजनीयेनाद्वितीयमिदं कृत्स्नस्य तत्स्वरूपत्वात्—

तच्छक्तिर्माया जडसामान्यात्— व्यापकत्वाद्व्याप्यानाम्। (शा.भ.सू.३.१.१-३)

सच्चिदानन्दस्वरूपं वासुदेवं[6] हृदि प्रतिस्थापनं कर्तव्यम्। जीवो मायया वशीभूतो, माया ईश्वरवशीभूता इति वैषम्यं विद्यते। प्रज्ञानं ब्रह्म, अहं ब्रह्मास्मि, तत्त्वमसि, अयमात्मा ब्रह्म च इति उपनीषदीयं महावाक्यचतुष्टयं मनुष्याणां कृते महोषधिस्वरूपम् अस्ति। अस्माकं मनः सत्त्वरजतमगुणत्रयेन मायिकम्, मायिके अन्तकरणे ज्ञानमपि मायिकम्। भगवतो रूपमयी गुणमयी च मायाद्वयं वर्तते, साधनचतुष्टयादिना ज्ञानमार्गेण यद्यपि रूपमाया अतिक्रमणीया तथापि गुणमयी माया अच्छेद्या, तत्केवलं भगवत्कृपापरवशेनैव उत्काम्यते। उच्यते—

दैवी ह्येषा गुणमयी मम माया दुरत्यया।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।। (श्री.भ.गी. ७.१४) इति।

## **१.२. काश्यपमते भक्तिलक्षणम्**

ऋषिणा काश्यपेन प्रोच्यते मुक्तये भगवतः ऐश्वर्यं ध्यातव्यम्, *शाण्डिल्यभक्तिसूत्रे*—

तामैश्वर्यपरां काश्यपः परत्वात्। (शा.भ.सू.२.१.३)

काश्यपाचार्यः तां भक्तिम् ऐश्वर्यां ब्रह्मप्रतिपत्तिं परमैश्वर्यादिमद्विषयिणीं निःश्रेयसफलाम् इति चिन्तयति। द्वैतवादी आचार्यः काश्यपो ब्रह्मजीवयोः भिन्नत्वं स्वीकृतवान्। तस्य नये मुक्तिहेतवे ईश्वरस्य ध्यानम् आवश्यिकरूपेण गण्यते, ईश्वरस्य कृपाव्यतिरेकेण कार्यसिद्धिः न भवति, भगवतो गुणकीर्तनं विना जन्ममरणाभ्याम् अपि न परित्रायते, जीवः अमरधाम गन्तुं नालम्। ऐश्वर्यं भगवतः स्वाभाविकं रूपम्—

ऐश्वर्यं तथेति चेन्न स्वाभाव्यात्। (शा.भ.सू.२.१.८) इति

गलितान्ते तु प्रेम्णि विषयः अवतारविशिष्टः अवतारी भगवान् श्रीकृष्णः षड्गुणपूर्णः अवतारश्च लीलाविग्रहादिरूपः अस्ति। भगवतः श्रीकृष्णस्य ऐश्वर्यम् अनन्तं परंतु सः अखिलरसामृतसिन्धुः तस्य माधुर्यलीला श्रेष्ठा। पाश्चात्य-पण्डितवर्गा एव श्रीभगवतो विभावद्वयं स्वीकृतवन्तः— ऐश्वर्यं तथा माधुर्यम्। भगवान् अनन्त-ऐश्वर्यशालि-निखिलभुवनस्य अधिपतिः भूत्वापि माधुर्यसौन्दर्यादि-गुणादिना मनुष्यचित्तं प्राबाल्येन आकर्षति। ईश्वरे विश्वम्भरे तन्मयता यदि समीभवनं भवति तर्हि उपास्योपासकयोः भेदो निवर्तते, जीवात्मा ब्रह्मरसे निमज्जति।

### १.३. बादरायणमते भक्तिलक्षणम्

कृष्णद्वैपायनः वेदव्यासः 'बादरायणः' इति नाम्ना अभिधीयते, सः बदरिकाश्रमेषु *वेदान्तसूत्रं* रचयामास। बादरायणः आचार्यः मन्यते यत् भक्तिः आत्मैकपरा भवति, जीवात्मापरमात्मनोः भेदज्ञाने निवृत्ते सति आत्मतत्त्वं चिन्तनीयम्। शुकदेवेन व्यासदेवेन च मन्त्रव्यम् एतत् परमेश्वरे अतीव प्रेमबोधे सत्यपि सत्यप्रेम स्वात्मनि एव भवति, भगवतो स्वात्मनि प्रेम बलवत्तरं भवति। बादरायणनये मनः आत्मना संयोजनीयम्। *शाण्डिल्यभक्तिसूत्रे*—

आत्मैकपरां बादरायणः। (शा.भ.सू.२.१.४)

आत्मा सर्वाधिष्ठानस्वरूपः एकः अद्वितीयः, परां विषयः, यस्याः तादृशीम् अखण्डार्थविषयिणीमिति यावत्। आचार्यः बादरायणो मूलतः व्यासदेव आसीत्। बादरायणः अद्वैतवादी तन्नये सर्वं ब्रह्ममयम् अस्ति। *शाण्डिल्यभक्तिसूत्रे*—

ब्रह्मणि एव जगद् व्याप्तम्— तत्प्रतिष्ठा गृहपीठवत्। (शा.भ.सू.२.१.१२)
फलमस्माद्बादरायणो दृष्टत्वात्। (शा.भ.सू.३.१.७) इति।

कर्मफलानि ईश्वरादेव आप्यन्ते। धर्मस्य आवश्यक-कर्तव्यत्व-ज्ञापनाय अविगीतशिष्टाचारविषयता एव मुख्यरूपेण गण्यते। वस्तुतस्तु फलम् ईश्वरादेव प्राप्यते। *वेदान्तसूत्रेषु* द्वितीयं सूत्रं 'जन्माद्यस्य यतः'— यतः सर्वज्ञत्वात् संसारस्य सृष्टिः स्थितिः तथा लयो भवति, यो जगतः नामरूपाभ्यां व्यक्तभावं धारयति, यस्मिन् बहुविधाः कर्ता भोक्ता च सन्ति। यः ईश्वरः कर्मफलस्य आधाररूपः, सर्वकर्मणां भिन्न-भिन्न-देशकालयोः कारणम्, अपि वा मनसः यद् अगम्यं तत् ब्रह्म एवास्ति। सर्वम् ईश्वराधीनम् इति अभिप्रेत्य—तस्य ईश्वरस्य प्रसादात् मर्त्यः संभूतः अमर्त्यतां गच्छति इति अवगम्यते।

आत्मचिन्तनं विना अन्यत् सर्वं निरर्थकम् अस्ति। बादरायणमते ज्ञानेन आत्मा पवित्रायते, मोहः तथा अविद्या यदा निवर्तते तदा द्वैतज्ञानं नश्यति, जीवः परमधाम गन्तुं शक्नोति। *विवेकचूडामणौ* मोक्षप्राप्तये ब्रह्मणः तथा आत्मनः एकत्वबोधेन कैवल्यं सिध्यति, न अष्टाङ्गयोगेन न साङ्खेन नापि कर्मयोगेन तत् लभ्यते। भक्तये अन्तर्शुद्धिः आवश्यिकी, सन्तोषः तपः स्वाध्यायः शरणागतिश्च— इत्यादयः अन्तर्शुद्धिलाभाय उपकारका भवन्ति। श्रीरामकृष्णः कथितवान् ईश्वरः एव केवलं वस्तु अन्यत् सर्वम् अवस्तु। आत्मा एव वस्तु अन्यत् सर्वम् अवस्तु, वस्तुस्वरूपं तु आत्मस्वरूपं स्वचेष्टया अवगम्यते। ज्ञानचक्षुषा स्वस्वरूपदर्शनाद् आत्मस्वरूपस्य उपलब्धिः भविष्यति। वेदपाठ-शास्त्रपाठ-

मन्त्रोच्चारणैः चित्तशुद्धिः साधकानां संभवेत्, अज्ञानदूरीकरणार्थं तु ब्रह्मज्ञानेन प्रयोजनम् अस्ति। वैराग्येन आत्मनिष्ठया च माया निवर्तते। *विवेकचूडामणौ*—

स गच्छति भवाम्भोधेः पारं प्रत्यूहवर्जितः।। (वि.चू. ८२) इति।

तदर्थं शम-दम-तितिक्षा-शास्त्रविहितानाम् अखिलकर्मणां त्यागः एव ध्वन्यते। आत्मतत्त्वस्य नित्यं ध्यानं कर्तव्यम्, अविकल्पपरब्रह्मलाभः एव निर्विकल्पसमाधिप्राप्तेः अवस्था, यत्र तु मन-बुद्धि-अहंकारादयः लुप्ता भवन्ति, ब्रह्मणः तथा आत्मन एकाकारप्रतीतिः तदा साधकानां भवति।

## १.४. जैमिनिमते भक्तिलक्षणम्

आचार्यो जैमिनिः नाम्ना तत्कीर्तनं फलाधिक्येन स्वीकरोति। वन्दनाभक्तिनाम्ना नमस्कारादिभिः पराभक्तिः भावयेत्—

नाम्नेति जैमिनिः सम्भवात्। (शा.भ.सू.२.२.६)

*श्रीमद्भगवद्गीतायाम्*—भक्त्या प्रयच्छति। (श्री.भ.गी. ९.२६)—इत्यत्र भक्तिप्राप्तये साधनानि प्रकीर्तितानि सन्ति। शाण्डिल्यमते इयं न मुख्या भक्तिः, गौणभक्तिः। कर्मभिः उत्कर्षलाभाय नामकरणम् आवश्यकम् अस्ति। एवं श्रवणकीर्तनादिकम् उद्दिश्य भक्तेः अध्यात्मज्ञानानुरागादिरूपा साधनभक्तिः विधीयते। भक्तिपूर्वकं कीर्तनेन पराभक्तिः प्राप्यते। नित्यं भगवतः नामश्रवणजपादिकं सर्वेषां कृते कर्तव्यम्। श्रीकृष्णः श्रेष्ठभक्तं अर्जुनं परमतत्त्वं कथितवान्—

मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय।
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव।। (श्री.भ.गी. ७.७) इति।

संकीर्तनं हि गुणकीर्तनं नामकीर्तनं च।

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्युनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्।। (ह.भ.वि. ११.३७७) इति।

## २. *शाण्डिल्यभक्तिसूत्रे* भक्त्याः परिपक्वता

### २.१. भक्त्याः भेदविवेचनम्

भक्तिः प्रीतिस्वरूपा, प्रतिबन्धकीभूतं दुर्वासनादुरदृष्टादिकं शास्त्रविहितकर्मणा निवर्तनं कर्तव्यम्। अपरिचिते प्रीतिः न जायते, नानाविषयक-ज्ञानलक्षणेन विक्षेपेण अस्थिरे अन्तःकरणे सा भक्तिः न भवति, चित्तविक्षेपनिवर्तनाय साष्टाङ्गयोगस्य उपयोगो विद्यते *योगदर्शने*। ब्रह्म एव सत्त्वरजस्तमःस्वरूपे त्रिगुणमये अन्तकरणे प्रतिबिम्बितं जीवस्वरूपम्, तस्य च जीवस्वरूपता एव बन्धनः, त्रयाणां गुणानां ब्रह्मणि लये सति स्वप्रकाशानवच्छिन्नानन्दस्वरूपेण स्वस्वरूपेण अवस्थानं मुक्तिः—इयं संज्ञा तु शंकराचार्येण अपि कथिता। अविद्याया निवर्तने सति स्वस्वरूपेण अवस्थानं मुक्तिः व्यासवशिष्ठादिपक्षे, कैवल्यं मुक्तिः इति श्वेताम्बर-दिगम्बरादिपक्षे च, एवं सम्यग् विचार्येण पराभक्तिः एव मुक्तिः इति गम्यते।

भक्तिः द्विविधा –परा अपरा च, तत्र परा श्रेष्ठा प्रीतिरूपा मुख्या, अपरा तदनुकूलतया तदङ्गभूता ततो न्यूना। कृच्छ्रचान्द्रायणादिभ्यः राजसूयाश्वमेधादिभ्यो यज्ञेभ्यः दानेभ्यो गङ्गा-गया-करुक्षेत्र-पुष्करादितीर्थयात्राभ्यो साक्षात्संबन्धेन प्रीतिरूपमुख्यभगवद्भक्तिजनकत्वाद् उत्कर्षेण अभ्यधिका स्मरणकीर्तनादिलक्षणा गौणी भक्तिः अपरा। गौणभक्तिः पराभक्त्याः सहायका भवति। भक्तिः अनुरक्तिः प्रीतिः[7] प्रेम प्रणयश्च समपर्यायः, अनुरागस्तथा ईश्वरविषयकानुराग इति व्यपदिश्यते।

भक्त्याः परिणामरूपेण ज्ञानादिभ्यः भक्त्याः तात्पर्यं स्वयंफलरूपा इति आयाति, भागवत्पुराणानुसारं भक्त्याः भेदो निरूप्यते— सगुणभक्तिविषये शाण्डिल्यमहोदयेन प्रोच्यते—

> यावद् भेदाभिमानो हि कार्यबुद्धिश्च सेवने।
> तावत्तु सगुणा भक्तिः कर्तॄणां विद्धि तत्त्वतः।।
> यद्विधोऽस्या भवेत् कर्ता सा प्रोक्ता तद्विधा बुधैः।
> भूम्याः संपर्कतो वारि मधुरं विरसं यथा।। (शा.सं. ६.७७-७८) इति।

यावत्पर्यन्तं भेदाभिमानं विद्यते, भगवतः पृथक्सत्ता अस्ति, भगवत्सेवायां कार्यबुद्धिः अस्ति तावत्पर्यन्तं भक्तसाधकानां भक्तिः तत्त्वतः सगुणा इति अवज्ञायते, सगुणभक्तेः साधकः सत्त्वरजस्तमांसि इति गुणत्रयेषु यं गुणं प्रति साधनायाः प्राधान्यं स्वीकरोति भक्तिः तदनुसारं सात्त्विकी राजसी तामसी इति च कथ्यते यथा वर्षासु वारिधारा विचित्रभूमिषु मिलित्वा मधुरविरसरूपेण परिलक्ष्यते।

भगवान् कपिलदेवः प्रोक्तवान् *श्रीमद्भागवते*— तामसी भक्तिः

> अभिसन्धाय यो हिंसां दम्भं मात्सर्यमेव वा।
> संरम्भी[8] भिन्नदृग् भावं मयि कुर्यात् स तामस:।। (श्री.भाग.३.२९.८)

राजसी भक्तिः

> विषयानभिसन्धाय यश ऐश्वर्यमेव वा।
> अर्चादावर्चयेद् यो मां पृथग्भाव: स राजस:।। (श्री.भाग.३.२९.९) इति।

भगवान् कपिलदेवः उक्तवान् यद् यो जनः इन्द्रियैः भोग्यवस्तूनां विषय-यश-ऐश्वर्यलाभादीनां संकल्पं कृत्वा ईश्वरं व्यतिरिच्य सः उत्साही पुमान् अभीष्टफलकामनया ईश्वरस्य मुर्तिषु पूजयति, सा भक्तिः राजसी भक्तिः।

सात्त्विकी भक्तिः

> कर्मनिर्हारमुद्दिश्य परस्मिन् वा तदर्पणम्।
> यजेद् यष्टव्यमिति वा पृथग्भाव: स: सात्त्विक:।। (श्री.भाग.३.२९.१)

कर्मक्षयकामी मोक्षकामी वा भगवत्प्रीतये कर्मार्पणं करोति कारणं तत्र ईश्वरकृपा आवश्यिकी। इत्यत्र भगवत्सेवा न मुख्यरूपेण गण्यते, पृथग्भाव इति शब्दो ध्वन्यते। यजेद् यष्टव्यमिति वाक्यस्य तात्पर्यं सर्वदा भगवद्भजनं शास्त्रेषु विधीयते। अतो भजनं केवलं कर्तव्यार्थं करोति यदि मनुष्यः, अपि वा तत्त्वं ज्ञात्वा भक्तिलाभार्थं भजनं यदि क्रियते वा, तर्हि सा भक्तिः अपि सात्त्विकी[9] भक्तिः। केवल्यकामा सात्त्विकी। एतेन बोध्यते कैवल्यप्राप्तेः साधनमेव सगुणत्वात् सत्त्वगुणमयी भक्ति:। *श्रीमद्भागवते* ज्ञायते श्रीकृष्णः कैवल्यं सात्त्विकज्ञानमिति कथयति। कैवल्यं सात्त्विकं ज्ञानं रजो वैकल्पिकं च यत्।

निर्गुणभक्तिविषये शाण्डिल्यमहोदयेन प्रोच्यते—

> यदाऽत्मरूपिणी सैव अहंप्रत्ययसाक्षिणी।
> संशयेन समुत्कीर्णा तदा निर्गुणतां गता।।
> विषया नावभासन्ते देहधर्मस्तथैन्द्रियाः।
> प्रक्षीणवृत्तिर्भक्तेश असौ निर्गुणतां गतः।। (शा.सं. ६.७९-८०)

यदा भक्तिः आत्मरूपिणी अहंप्रत्ययसाक्षिणी निसंशयात्मिका अतः निर्गुणा इति आख्यायते। इत्यत्र भगवता भक्तेः अनन्यवृत्तिः जायते, शरीरधर्मस्तथा इन्द्रियादेः विषया दृश्यमानाभावाद् मनोवृत्तयः

क्षीणा जाताः, तदा असौ भक्तः निर्गुणभक्तौ लीयते। सगुणा भक्तिः साधनस्वरूपायां निर्गुणा भक्तिश्च सिद्धावस्थायां प्राप्यते, भगवतः कृपापरवशः कश्चिद् विरलः साधक एव निर्गुणभक्तिं प्राप्नोति।

ये सर्वेऽपि कामा आप्ताः ते आप्तकामाः। यस्य आत्मा एव काम्यो नान्यः कामयितव्यः तस्य आत्मकामत्वेन सर्वे अपि कामा आप्यन्ते। यः आप्तकामः स निष्कामः अकामः अकामयमानश्च। तस्य अकामयमानस्य कर्माभावे लोकान्तरगमनाभावात् प्राणा वागादयो न देहाद् बहिर्गच्छन्ति। तादृशः अकामो जनो ब्रह्मैव सन् ब्रह्माप्येति। कोऽपि निर्गुणनिराकारं ब्रह्म भजते, कोऽपि सगुणसाकारं ब्रह्म भजते, परंतु प्रकृतभगवत्प्रेमी तत्प्रेमबन्धनं वन्दते यद्बद्धं मुक्तिदं मुक्तं नित्यं शुद्धं बुद्धं ब्रह्म भक्तं क्रीडामृगीभूतं करोति। भगवत्प्रापनं यथा शास्त्रेषु अतीव दुर्लभमिति कथ्यते तथैव यथार्थभक्तानां समीपे भगवान् अपि अतीव सुगम इति—

दूरात्सुदूरे तदिहान्तिके च पश्यत्स्विहैव निहितं गुहायाम्। (मु.उ. ३.१.७) इति।

गौणभक्तिः त्रिविधा शाण्डिल्यमते—गौणं त्रिविध्यमेव तासां मुख्येन साहचर्यश्रवणं तु स्तुत्यर्थम् निर्दिश्यते— आर्तभक्तिः जिज्ञासाभक्तिः अर्थार्थिताभक्तिश्च, एवं च पापक्षयविपदुद्धारादिनिमित्तं स्मरणकीर्तनाद् आर्तभक्तिः, ज्ञानार्थं यज्ञाद्याचरणं जिज्ञासोर्भक्तिः— तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन इत्यादिश्रुतेः। (बृ.उ. ४.४.२२)। अर्थार्थिता भक्तिः अपि द्विधा—तत्र एका पराभक्त्यर्थं क्रियमाणा पूर्वोक्ता राज्यस्वर्गादिलाभार्थं क्रियमाणा च कीर्तनादिरूपा अपरा भक्तिः। ज्ञानभक्तिः पराभक्तिस्वरूपा, ज्ञानिनो ब्रह्मविद्यामार्गानुसारिणः श्रवणमनननिदिध्यासनेन तथा भक्तिमार्गानुसारिणः आर्ताः पूजा-जप-तप-अर्चनादिना मूलतः अद्वितीयं परमात्मनम् ईश्वरमेव सेवन्ते। नवधा भक्तिः यथा बहिःकल्याणकारिणी तथा आन्तरकल्याणकारिणी अपि, पर्वततुल्यपापं श्रवणकीर्तनस्मरणादिना नश्यति, नवधा भक्तिः प्रायश्चित्तसाधनं भगवत्प्राप्तिसाधकं च। *शाण्डिल्यभक्तिसूत्रे*—

गौणं त्रैविध्यमितरेण स्तुत्यर्थत्वात् साहचर्यम्। (शा.भ.सू.२.२.१७)

अतः सम्यग्ज्ञानं भक्त्याः अङ्गः अस्ति। दृष्टं निष्करुणत्वम् अल्पमहिमत्वम् अप्रियत्वादिज्ञानं च मनसः मालिन्यकारणं भवति, पुनः ऐश्वर्यभक्तवात्सल्यादिकं माहात्म्यज्ञानं मालिन्यनिरासाय कारणं भवति, ततश्च पराभक्तिरिति। श्रीरूपगोस्वामीमहोदयेन साधनभक्तिः द्विविधा भवति—

वैधी रागानुगा चेति सा द्विधा साधनाभिधा।। (भ.र.सि. १.२.५)

वैधीभक्तिविषये—

> यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते।
> शासनेनैव शास्त्रस्य सा वैधी भक्तिरुच्यते।। (भ.र.सि. १.२.६)

वैधीभक्त्या उत्तमः[10] मध्यमः[11] कनिष्ठः[12] च अधिकारिणः त्रयः प्रकाराः सन्ति। रागानुरागाभक्ति-विषये प्रोच्यते— तत्र विषयिणः स्वाभाविकतया विषयसंसर्गाद् अतिशयं प्रेम जागर्ति तदा रागो इति। यथा चक्षुरादीनां सौन्दर्यादौ, तादृश एव अत्र भक्तस्य श्रीभगवति रतिरपि राग इत्युच्यते। यथा—

> रागात्मिकैकनिष्ठा ये व्रजवासिजनादयः।
> तेषां भावाप्तये लुब्धो भवेदत्राधिकारवान्।। (भ.र.सि. १.२.२९१)

माहात्म्यज्ञानं न अनुरागजनकं, पूर्णज्ञानं विना बाल्याद् एव ध्रुववाल्मिक्यादिभिः भक्तिसागरपारावारे उत्तरणं गोचरीभूयते। उच्यते—

> भक्त्या जानातीति चेन्नाभिज्ञप्त्या साहाय्यात्। (शा.भ.सू.१.२.६)

भक्त्या जानाति इत्यत्र न केवलं भक्त्या मुक्तिम् आप्नोति किं तु ज्ञानाद् एव, कथमेव अभिज्ञप्तया साधनभक्त्या श्रवणादिभिः माम् अभिजानाति इत्यत्र 'अभि' इति आभिमुख्यम् अनुराग उच्यते, जानातीति स्फूर्तिः। भक्तः अनुरागेण श्रीकृष्णम् अनुभवितुं शक्यः भवति। श्रीकृष्णस्य अनुरागस्मरणमाहात्म्यात् भगवन्तं सर्वकल्याणगुणपूर्णं तत्त्वतो ज्ञात्वा साक्षात्कृत्य एतत् शास्त्रेषु ज्ञानफलत्वेन प्रसिद्धं प्रेम भवति। भगवतः स्फुर्तितो भगवदनुग्रहाद् भगवत्स्वरूपज्ञानात् प्रेमबर्धनात् तन्मात्रनिष्ठादिभिः चरमं प्रेम एव साध्यभक्तिः।

## २.२. *शाण्डिल्यभक्तिसूत्रेषु* दार्शनिकालोचना

वस्तुतः *शाण्डिल्यभक्तिसूत्रेषु* दार्शनिकालोचना प्रमाणम्, प्रमेयः(जीवः जगत् सृष्टिः ईश्वरः मायाः), साधनम्(ज्ञानं कर्म योगः), मोक्षश्चेति चतुष्टयेषु विषयेषु परिलक्ष्यते। महर्षिणा शाण्डिल्येन 'महिमख्यातिः' नारदाचार्येण च 'गुणमाहात्म्यशक्तिः' इति शब्दो व्यवह्रियते। ईश्वरस्वरूपविषये उपनिषदां मतम्, ईश्वरस्य शक्तिः माया इत्यादिविषयेषु आलोचना *शाण्डिल्यभक्तिसूत्रे* प्राप्यते। *शाण्डिल्यभक्तिसूत्रे* जीवजगद्विषयकं दार्शनिकालोचनं कर्मविषयकम् आलोचनम् अपि प्राप्यते। अस्याः भक्त्याः अतीव महत्त्वपूर्णं वैशिष्ट्यम् अस्ति यत् एषा भक्तिः न केवलम् ईश्वरं प्रति अपि तु तस्य कस्यापि अवतारं प्रति निर्देशितुं शक्यते वराह-नृसिंह-वामन-रामादिषु। इह भक्तिसूत्रे

प्रागस्तित्वरूपस्य सत्कार्यवादस्य आभासं द्योत्यते। परमप्रेम आत्मनः उपाधिं नाशयति, तथापि एतत् न विस्मर्तव्यं यद् इह भौतिके जगति वैधी भक्तिः पराभक्तिद्वारेण साधकं मोक्षाय नयति।

ध्यानं भक्तिशब्द-वाच्या। अतः *शाण्डिल्यभक्तिसूत्रे*—

ध्याननियमस्तु दृष्टसौकर्यात्। (शा.भ.सू.२.२.१०)

भक्तिः ध्यान-शब्देन अपि अभिधीयते। *बृहदारण्यकोपनिषदि*— आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः निदिध्यासितव्यः—इत्यत्र श्रवणात् मननं मननात् च ध्यानम् एवमेव इत्यत्र ध्यानस्य विशिष्टता द्योत्यते।

अष्टाङ्गयोगेषु यम-नियम-आसन-प्राणायाम-प्रत्याहाराः सांसारिकानां भक्तानां कृते साधयितुं शक्यते परंतु ध्यान-धारणा-समाधयः साधकाणां कृते एव व्यपदिश्यते। अतो ध्यानयोगेन गायत्रीमन्त्रस्य अन्तर्निगूढभावं विना साधनायाः अभ्यन्तरे उद्भासनम् असंभवपरं भवति। ब्रह्मगायत्र्याः साधना आलोकस्य आनन्दस्य एव। साधकस्य धीशक्तिं सक्रियकरणाय ब्रह्मगायत्री अपरिहार्या। उज्जीवित-प्रचोदित-धीशक्तिसहायतया गायत्रीमन्त्रस्य जपध्यानादिना जीवैः अनुभूयते यद्— यो असौ असौ पुरुषो सः अहम् अस्मि— अहम् एव सः अखण्डचैतन्यस्वरूपः पुरुषः। जीवस्य युक्तिविचारविवेकप्रधानबुद्धिं परिष्कृत्य शुद्धिकृत्य च धीशक्तेः उत्तरणे सति चेतनचैतन्ययोः योगसूत्रं स्थाप्यते, ध्यानस्य सार्थकता अत्रैव। यथाभिमतध्यानाद् एव चित्तप्रसादरूपं दृष्टसौकर्यं संभाव्यते। तथा च यस्य यद्रूपध्यानाद् एव आनन्द आविर्भवति तेन तदेव अभिमतं रूपम् ध्यातव्यम्। एकाग्यं हि ध्यानस्य प्रधानसाधनम् अस्ति। भगवतः विविधरूपेषु ध्यानं कर्तव्यम्। यस्य भावस्य ध्यानेन चित्तं शाम्यति स भावः हृदये धारयित्वा ईश्वरस्य ध्यानेन मनसि एकाग्रता उत्पद्यते ततः क्रमेण समाधिः भवति, समाधौ आत्मनः शक्तिः वर्धते। *पतञ्जलियोगसूत्रे* प्रोच्यते—

यथाभिमतध्यानादेव। (यो.सू.१.३९)

*शाण्डिल्यभक्तिसूत्रे* बुद्धिशब्दस्य प्रयोगो ध्वन्यते—

बुद्धिहेतुप्रवृत्ताविशुद्धेरवघातवत्। (शा.भ.सू. २.१.१) इति।

श्रवणमनननिदिध्यासनादीनां भक्तिपरिशुद्धिपर्यन्तं तत्प्रवृत्तिरावश्यकी, बुद्धिशब्दस्य प्रयोग: भारतीयदर्शनेषु बहुलं प्राप्यते। गुरुशुश्रुषा, शास्त्रचिन्तनम्, शमादि-षटकसम्पत्तिश्च एतानि भक्तिसहायकानि। दार्शनिकभावनायां जीवात्मापरमात्मनयोः संज्ञा निरूप्यते। जीवः जगत् ईश्वरः

प्रकृतिः/माया प्रत्यभिज्ञा सर्वेषां प्रभावः भक्त्यां दार्शनिकभावनां दर्शयति। तपसा कल्मषं हन्ति इत्यादिस्मृतेश्च।(म.सं. १२.१०४)। ईश्वर आसीत् सत्यं ज्ञानमनन्तं ब्रह्म, आनन्दरूपम् अमृतं तत्त्वम् एव। परमेश्वरः निर्विकारस्वरूपः, परमेश्वरे मायाशक्तिः एव जगतः सर्जनकारणं भवति। *शाण्डिल्यभक्तिसूत्रे*—

प्रकृत्यन्तरालादवैकार्यं चित्सत्त्वेनानुवर्तमानात्। (शा.भ.सू.२.१.११)

प्रकृतिः नाम जडकार्यमात्रोपादानम् अस्ति। सा विकार्या, परमेश्वरः अविकारी, परमेश्वरः चित्सत्तया प्रकृत्याम् अनुगतः अस्ति। *भगवद्गीतायां* मूलप्रकृतिः इति शब्देन पार्वतीदेव्याः दश महाविद्या आदिशक्तिः एव ध्वन्यते। तस्मात् प्रकृतिलक्षणं मायाशक्तिम् अन्तरालीकृत्य परस्य कर्तृत्वादिस्वाभाव्यमिति न विकार्यता। ननु मायायाम् एव जगत् प्रतिष्ठितं भवति। इत्यत्र प्रोच्यते जीवेषु ज्ञान-सुख-दुःख-इच्छादिविकाराः सन्ति, अतः विकारिणस्तु जीवाः भवितुमर्हन्ति। परमात्मा अविकारी, परमात्मना जीवात्मनः ऐक्यं कथम्? तथा हि जीवात्मा न विकारी, सुखादयो न आत्मविकाराः भवन्ति। प्रकृतिः एव जगत्सर्जनकारणं भवति, प्रकृतिः सत्त्वरजतमसां साम्यावस्था। प्रकृतिः ईश्वरस्य मायाशक्तिः, प्रकृतिः त्वां नियोक्ष्यति, प्रकृतिः परमात्मनि भगवति वासुदेवे स्थिता अस्ति। नासतो विद्यते भावो नाभावो विद्यते सतः— एवमेव परमाणोः अभ्यन्तरे अनन्तं ब्रह्माण्डं विद्यते। तस्मिन् ब्रह्मणि जगत् प्रतिष्ठितम् इति आशङ्कया उत्तरम् एवम् लभ्यते— यत् प्रकृत्या आश्रयः ब्रह्म एव भवति। सृष्टिकार्ये ब्रह्म प्रकृतिश्च उभयमेव कारणं भवति। परस्परं चेतनाचेतनाभ्यां स्वज्ञानाय स्वशक्तिविषयाय अपेक्षितम् अस्ति। प्रकृतिः तथा पुरुष इति तत्त्वद्वयेन सम्यक् ज्ञाने सति मनः शुद्धं भवति। प्रकृतिः जडः पुरुषश्च चेतनः, तत्त्वद्वयम् अनादि अस्ति। तौ प्रकृतिपुरुषौ बुद्धिस्थौ परस्परम् अनादिकालादेव स्तः—इत्यत्र साङ्ख्यदर्शनस्य प्रतिध्वनिः सूच्यते—

चेत्यचितोर्न तृतीयम—युक्तौ च सम्परायात्। (शा.भ.सू.२.१.१४-१५)

माया ब्रह्मणः शक्तिः। सर्वदा भागवती सृष्टिः सादृश्यसहकार्यपेक्षया चेतनकृतसृष्टित्वात् मायिकसृष्टिवत् भवति।

भक्तिमार्गे मुख्यरूपेण इष्टदेवस्वरूपं ज्ञातव्यम्। वेदस्य ब्रह्मकाण्डे मुख्यरूपेण आराध्यस्वरूपं निरूप्यते। इत्यत्र लौकिकजगति ज्ञानाभावे प्रेमाभावः परिलक्ष्यते। ब्रह्मकाण्डे ब्रह्मविद्या साधनं, ब्रह्मविद्याप्राप्तये यावत्पर्यन्तं मनो न शुध्यते तावत्पर्यन्तं मानवानां तीर्थभ्रमण-जप-दान-पूजा-उपासना-सत्सङ्गश्रवणोपवासादिकार्याणां प्रवृत्तिः भवेत्। तदुच्यते—

तदङ्गानां च। (शा.भ.सू.२.१.२)

नित्यकर्मानुष्ठाने धर्मोत्पत्तिः धर्मोत्पत्तेः पापक्षयः पापक्षयात् चित्तशुद्धिः चित्तशुद्धेः परम् अनित्यता उपलब्धिः तदा सर्ववस्तुवैराग्यात् मुमुक्षा जायते साधकस्य। चित्तशुद्धिः निष्कामकार्यस्य मुख्यपरिणतिः भवति। यावत्पर्यन्तं चित्तशुद्धिः न भवति तावत्पर्यन्तं काम्यकर्माणां त्यागो न भवति, काम्यकर्मणि अनुरागः वासनावशाद् भवति, अतः अखिलकाम्यवस्तुनां त्यागे लये जाते यदा अन्तःकरणं केवलं एकाग्रतया ईश्वरे एव समीह्यिते तदा भक्तिभावो हृदि जागर्ति। कारणं ब्रह्मविद्याया सहायकाङ्गानि शम-दम-उपरति-तितिक्षा-श्रद्धा-समाधान-दान-पूजा-श्रवण-मनन-निदिध्यासनादयः भवन्ति। एवं शुद्धं मनः परमात्मनि भगवति वासुदेवे समर्पणं कर्तव्यम्। *श्रीमद्भगवद्गीतायाम्*—

उद्धरेदात्मनात्मानं नात्मानमवसादयेत्।
आत्मैव हयात्मनो बन्धुरात्मैव रिपुरात्मनः।। (श्री.भ.गी. ६.५)इति
प्रत्यभिज्ञानाच्च। (शा.भ.सू.२.१.२७)

भगवतः वासुदेवस्य विष्णुरूपतायाः विषये प्रत्यभिज्ञा पूर्वानुभवस्मृतिः उपलभ्यते। वसुदेवविषये परब्रह्मप्रत्यभिज्ञा च श्रूयते *नारायणोपनिषदि*—

ब्रह्मण्यो देवकीपूत्रो ब्रह्मण्यो मधुसूदनः।
ब्रह्मण्यः पुण्डरीकाक्षो ब्रह्मण्यो विष्णुरच्युतः।। (*नारायणोपनिषद्* ४)

स्मर्यते च प्रत्यभिज्ञा, यया प्रलये दृष्टानुभावेन युधिष्ठिरं प्रति मार्कण्डेयेन उक्तम्—

यः स देवो मया दृष्टः पुरा पद्मायतेक्षणः।
स एव पुरुषव्याघ्रः सम्बन्धी ते जनार्दनः।।

भगवतः अवतारेषु भक्तिः पराभक्तिरूपेण गण्यते। *श्रीमद्भगवद्गीतायाम्* देवभक्तिः[13] ध्वन्यते—

यो यो यां यां तनुं भक्तः श्रद्धायार्चितुमिच्छति।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्।। (श्री.भ.गी. ७.२१) इति।
जन्मकर्मविदश्चाजन्मशब्दात्—तच्च दिव्यं स्वशक्तिमात्रोद्भवात्।
(शा.भ.सू.२.१.२१-२२)

*भगवद्गीतायां* श्रीकृष्णेन—

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः।। (श्री.भ.गी. ७.१६)

भगवतः श्रीकृष्णस्य जन्मकर्मवेदनस्य साक्षादमृतत्वफलम् उपपद्यते। भगवतः जन्म कर्म च न जीवशरीरवत्, न च कर्मफलाधीनं भवति, अपि तु दिव्यमस्ति निरहङ्कारात् फलासक्तिरहितत्वाद् वा।

प्राणित्वान्न विभूतिषु। (शा.भ.सू.२.१.२४)

*श्रीमद्भगवद्गीतायां* श्रीकृष्णस्य— महर्षीणां भृगुः, यज्ञानां जपयज्ञः, स्थावराणां हिमालयः, सिद्धानां कपिलमुनिः, दैत्यानां प्रह्लादः, पक्षिणां वैनतेयः, विद्यानाम् अध्यात्मविद्या, मुनीनां व्यासश्च इत्यादयः विभूतयः भगवद्रूपाः उल्लिखिताः सन्ति परंतु इमाः विभूतयः प्रति भक्तिः न पराभक्तिः, पराभक्त्याः साधनमात्रं भवितुम् अर्हन्ति प्राणादिजीवोपाधियुक्तत्वात्। कारणमेवं जीवोपाध्यनवच्छिन्नविषया एव पराभक्तिः। वृष्णिषु वासुदेवः सर्वश्रेष्ठः इति परमेश्वरस्य विभूतिवर्णनप्रसङ्गेन वासुदेवनामकीर्तनं भूयते। अपि च एवम् अनेन प्रकारेण वासुदेववद् ब्रह्मलिङ्गवत्तया प्रसिद्धेषु वराह-नृसिंह-वामन-रामभद्रादिषु अवतारेषु भक्तिः मुक्तिफला पराभक्तिः इति बोध्यते। *शाण्डिल्यभक्तिसूत्रे*—

वृष्णिषु श्रेष्ठ्येन तत्—एवं प्रसिद्धेषु च। (शा.भ.सू. २.१.२८-२९)

सा पराभक्तिः एकान्तभावेन लभ्यते, *श्रीमद्भगवद्गीतायाम्* उच्यते—अनन्यो भक्तः निरन्तरं श्रवणकीर्तनादिभिः भगवन्तम् उपासनया भगवत्कृपया योगक्षेमं प्राप्तुं शक्यते। अत एव—

सैकान्तभावो गीतार्थप्रत्यभिज्ञानात्। (शा.भ.सू.२.२.२८) इति।

यस्य भक्तिः न परिपक्वा भवति क्रमशः भिन्न-भिन्नलोकेषु आवर्तनात्परं अन्ततः गत्वा ते परिपक्वावस्थायां प्राप्य भगवन्तं प्राप्नोति। *श्रीमद्भगवद्गीतायां* अष्टमे अध्याये देहत्यागात्परं आत्मनः अन्तिमो गन्तव्यः क्रममुक्तिविषये अपि वर्णितः अस्ति। भक्त्या युक्तो योगबलेन...

ॐ इत्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन्।
यः प्रयाति त्यजन् देहं स याति परमां गतिम्।। (श्री.भ.गी. ८.८३)

अपि च वैदिकमते अस्मिन् जगति देहत्यागस्य मार्गद्वयं वर्तते—शुक्लः कृष्णश्च। शुक्लमार्गे यः शरीरं त्यजति तस्य पुनरागमनं न भवति परंतु कृष्णमार्गे शरीरं त्यजति चेत् पुनः आवर्तनं भूयते। योगी परं

स्थानमुपैति चाद्यम् इत्यादिकम्। परिपक्का ईश्वरभक्ताः अनन्यगतिं प्राप्नुवन्ति अपरिपक्काः च क्रममक्तिं प्राप्नुवन्ति। उच्यते—

उत्क्रान्तिस्मृतिवाक्यशेषाच्च। (शा.भ.सू.२.२.२६)

*बृहदारण्यकोपनिषदि*—आत्मनः उत्क्रान्तिः— तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेन्येभ्यो वा शरीरदेशेभ्यस्तमूत्क्रामन्तं प्राणोऽनुत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति।तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च। (बृ.उ. ४.४.२) इति।

भक्तिचन्द्रिकायां *शाण्डिल्यभक्तिसूत्रेषु* 'भक्तिः प्रमेयाः श्रुतिभ्यः' इति सूत्रं वर्तते यत्र स्पष्टरूपेण भक्तिः श्रुतिभ्यः प्रमीयते—भगवतः स्मरणभक्तिविषये प्रमाणाय श्रुत्या प्रयोजनीयता उल्लिख्यते—

विचक्रमे पृथीवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्।
ध्रवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार॥[14]

अथ पादसेवने श्रुतिः—

यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया वदन्ति।
य उ त्रिधाकु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा॥[15]इति।

त्रीणि नेत्राणि शब्दलिङ्गाक्षभेदाद्— वस्तुतत्त्वं ज्ञातव्यम् इन्द्रियसन्निकर्षरूपं प्रत्यक्षप्रमाणं, अनुमानप्रमाणं, वेदादिशास्त्राद्याप्तवाक्यरूपं शब्दप्रमाणं च नेत्रत्रयेन। तदुक्तं *शाण्डिल्यभक्तिसूत्रे*—

व्युत्क्रमादप्ययस्तथा दृष्टम्। (शा.भ.सू.३.१.८)

सृष्टिः येन क्रमेण भवति जीवतत्त्वानां लयः तस्य विपरीतक्रमेण भवति— पृथिवी अप्सु,जलं बह्नौ, अग्निः वायौ, वायुः आकाशे, आकाशः प्रकृतौ, प्रकृतिः ब्रह्मणि च लीयते। ज्योतिर्भूते एकीभूत इत्यर्थः। सर्वगते परमेश्वर इत्यर्थः। यदि परमेश्वरं प्रति भक्तिः न उदेति तर्हि अज्ञानवशाद् जीवस्य संसारबन्धनं भवति, ज्ञानी ईश्वरकृपां प्राप्य मायाम् अतिक्रम्य बन्धनमोचनं करोति। षड्भावविकाराः यथाक्रमम्— जायते, अस्ति, वर्धते, विपरिणमते, अवक्षीयते, नश्यति च। उत्पत्तेः विनाशपर्यन्तं

क्रियाफलविशेषः शरीरजो धर्मः, पराभक्तिमाध्यमेन तत्त्वज्ञाने उदये जाते विकारबुद्धेः लयत्वात् सर्वत्र परमात्मनः साक्षात्कारो भवति।

आविस्तरोभावा विकाराः स्युः क्रियाफलसंयोगात्। (शा.भ.सू ३.२.८) इति।

कर्मत्रयं विद्यते- प्रारब्ध-संचित-क्रियमाणभेदेन, प्रारब्धकर्म भोगेन क्षीयते, पराभक्तिज्ञानं संचितकर्म क्रियमाणकर्म च नाशयति, यावदायुः तावत्प्रारब्धः भोक्तव्यः। पराभक्तौ सत्याम् अपि मुक्तिप्रतिबन्धकं तावदेव यावत्पर्यन्तं प्रारब्धो न क्षीयते, सा अवस्था जीवनमुक्तिः। परंपरयैव ज्ञानाग्निना कर्मक्षयो भवति।

वेदान्ते उपदिश्यते मनोवचनातीतम् अनिर्देश्यम् अव्यवहार्य्यं प्रपञ्चातीतं परमतत्त्वं विना जगति किंचित् नास्ति यथा रजसा दर्पणगतं रजः कण्टकात् कण्टकः कर्मणा कर्म दूरीभूयते तथैव नामरूपाभ्यां नामरूपातीतं तत्त्वं प्राप्तुं चेष्टते। निर्गुणनिराकारनिष्प्रपञ्चात् सगुणसाकारप्रपञ्चः [16] प्रादुर्भवति। तामसिकं कर्म दूरीकर्तुं राजसिकेन कर्मणा, राजसिकं कर्म दूरीकर्तुं सात्त्विकज्ञानाश्रयेण प्रयोजनम् आवश्यकम्। मनोहरशब्द-स्पर्श-रूप-रस-गन्धादिविषयेषु आसक्तचित्तानां प्राणिनां मनसि प्रपञ्चातीतं भगवत्स्वरूपम् आकर्षणार्थं अशब्द-अरूप-अव्ययानां दिव्यशब्द-दिव्यस्पर्श-दिव्यगन्ध-दिव्यरूपेषु प्रादुर्भावः परिलक्ष्यते। अस्या योगविद्यायाः विविधा मार्गाः सन्ति— ज्ञानयोग-भक्तियोग-कर्मयोग-हठयोग-लययोग-मन्त्रयोग-राजयोगादयः। तेषु साधनमार्गेषु ज्ञानयोग-भक्तियोग-कर्मयोगानाम् अनुशीलनेन ऋषयः समाधिकैवल्यादिकं लब्धवन्तः।

## ३. *शाण्डिल्यभक्तिसूत्रे* भक्त्या महिमा

### ३.१. गोपिकानां महिमा

भक्तिः मुख्यतः ईश्वरगुणश्रवणादिभिः अनन्यविषयोत्कण्ठाह्लादविशेषजनकतया लौकिकानुरागवत् सुष्ठुतया ग्राह्यते। भक्तप्रह्लादेन *श्रीमद्भागवते* —

या प्रीतिरविवेकानां विषयेष्वनपायिनी।
त्वामनुस्मरतः सा मे हृदयान्मापसर्पतु।। (वि.पु. १.२०.१७) इति।

अविवेकिनां विषयेषु सुखसाधनेषु यः प्रीतिः अनुरागविशेषः उत्पद्यते, भगवन्तम् अनुस्मरतो भक्तो यदा हृदयात् तद् विषयसुखादिकम् उल्लंघ्य ईश्वरे परमेश्वरे सदा निरतिशयं सुखनियतरागान् अनुभवति तदा सा भक्तिः। *विष्णुपुराणे*—

नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम्।
तेषु तेष्वच्युता भक्तिरच्युतास्तु सदा त्वयि।। (श्री.भाग.१.२०.१६)

तस्मात् नाथ योनिसहस्रेषु इति श्लोकमाध्यमेन भक्त्याः प्रीतिभक्त्योः अभेद एव अवगम्यते, प्रीतिरेव च प्रेमसंज्ञिता रतिः। यथा—

अनन्यममता विष्णौ ममता प्रेमसंज्ञिता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः।। इति

एषः आत्मक्रीडावान् भक्तः ब्रह्मविदाम् वरिष्ठः। ब्रह्मविषयकज्ञानविरहाद् अपि अनुरागरूपया भक्त्या व्रजगोपिकानां मुक्तिः अभवत्। *विष्णुपुराणे*—

चिन्तयन्ती जगत्सूतिं परब्रह्मस्वरूपिणम्।
निरुच्छवासतया मुक्तिं गतान्या गोपकन्यका।। (वि.पु. ५.१३.१५) इति।

ज्ञानं खम्भा, भक्तिः खम्भासाहाय्येन पल्लविता लता। इत्यत्र खम्भा गौणसाधनं परंतु पुष्पितस्वरूपं मुख्यसाध्यम्, ज्ञानं सहायकं भक्तिस्तु लक्ष्यम्। पूजापाठ-सेवन-तीर्थव्रतादि-कार्याणि दृढाद् दृढतरं भवन्ति यम-नियम-ध्यान-नित्यानित्यवस्तुविवेक-समाधि-इत्यादि-ज्ञानमार्गैः। आचार्यः शाण्डिल्यः भक्तिस्वरूप-विचारविमर्शनाद् अनन्तरम् ज्ञानं विना गोपिकानां श्रीकृष्णप्राप्तिं सूचिवान्। *शाण्डिल्यभक्तिसूत्रे*—

अत एव तदभावाद्वल्लवीनाम्। (शा.भ.सू.१.२.५)

श्रीकृष्ण: न केवलं पालनकर्ता, सर्वत्र गोपिकावल्लभ: इति व्यावहार: प्रसिद्ध:। शब्दशक्त्या वल्लभशब्दस्य अर्थ: वल्लते (*अमरकोश:* १३७.३), वल्यते (*उणादय:* १.२५.३) वा वल्लभ: रासवल्लिभ्यां च  इति अभच् प्रत्ययेसंवरणे इति वल्ल, धातो: वल्लभ—  अभीष्टेऽभीप्सितं हृदयं दयितं वल्लभं प्रियम् (*अमरकोश:* ५३.१.३)। परब्रह्मस्वरूपे परमात्मनि ज्ञानस्य अभावे सत्यपि गोपिकाः गोलोकं प्राप्तवत्यः। एवंप्रकारेण देवर्षिणा नारदेन कथितम्—

यथा व्रजगोपिकानाम्। इति।

गोपिकानां प्रेम्णः केन्द्रविन्दुः षोडशकलः श्रीकृष्णः आसीत्, क्षणमात्रम् अपि श्रीकृष्णविरहे तासां जीवनं जलविहीनमीनसदृशं व्याकुलम् आसीत्। केवलं पुनः पुनः दर्शनलालसायां गोपिकाः प्राणान् धारयन्ति—एवमेव विशुद्धभक्तस्य सत्यं स्वरूपं प्राकट्यते। गोपिकानां तन-मन-धन-लोक-परलोकादिकं तु श्रीकृष्णाय समर्पितम् अस्ति। अहर्निशं श्रीकृष्णचिन्तनम्, सुरसंयोगेन निरन्तरं श्रीकृष्णगुणकीर्तनम्, सर्वत्र श्रीकृष्णदर्शनं च व्रजगोपिकानां स्वभावचातुर्यम् अस्ति। गोपिकाः गोविन्ददर्शनेन परमानन्दिता अभवन्। श्रीकृष्णः व्रजगोपिकान् प्रति भणति —

न पारये निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः।
या माभजन् दुर्जरगेहशृंखलाः संवृश्च्य तद्वः प्रतियातु साधुना।।
(श्री.भाग.१०.३२.२२) इति।

हे गोपिका! त्वं मम कृते गृहस्थजीवनम् अपसृत्य भजनकार्ये नियोजयसि कार्यम् इदं सर्वथा दोषरहितम्, गोपिकानाम् उदारतया श्रीकृष्ण ऋणात् मुच्यते। सर्वत्यागिनो व्रजवासिनो भक्ताः श्रीकृष्णस्य पदपङ्कजपरागो भवितुम् इच्छेयुः। नृत्यरतानां गोपिकानां महिमानं तदैव बोधयितुं शक्यते यदा साधकाः विषयाशयात् परमवैराग्यम् अनुभूय प्रेममार्गं प्रविशन्ति। *शाण्डिल्यभक्तिसूत्रे*—

तत्परिशुद्धिश्च गम्या लोकवल्लंगेभ्यः। (शा.भ.सू.२.१.१७)

भक्त्याः परिशुद्धिः न प्रत्यक्षतो निर्णेतुं शक्यते ज्ञानप्रामाण्यवत्, तस्मात् भक्त्याः परिशुद्ध्यात्मकं ज्ञानं लोकवत् जातलिङ्गेभ्यः भगवतः कथाश्रवणनामकीर्त्तनादिकम् अश्रुपुलकादिविकारैः अनुमीयते। *शाण्डिल्यभक्तिसूत्रे*—

सम्मान-बहुमान-प्रीतिविरहेतर-विचिकित्सामहिमख्याति-तदर्थ-प्राणस्थान-तदीयता-सर्वं तद्भावाप्रतिकूल्यादीनि च स्मरणेभ्यो बाहुल्यात्।। (शा.भ.सू.२.१.१८) इति।

भगवति श्रीकृष्णे अर्जुनस्य सम्मानेन, इक्ष्वाकोः बहुमानेन, विदूरस्य प्रीत्या, गोपीनां विरहेण, उपमन्यो तथा श्वेतद्वीपवासिनां विचिकित्सया, भीष्म-व्यासयोः निरन्तरं भगवतो महिमख्यातिना, व्रजवासिनां तथा हनुमतः भगवते प्राणस्थितया, बलिराजस्य समर्पणेन, प्रह्लादस्य सर्वभूतेषु भगवद्भावेन, यथा हन्तुमागते अपि भगवति भीष्मस्य तस्मिन् अप्रतिकूल्येन च, एवं बहुभक्तिपरिशुद्धिलिङ्गानि स्मृतिभ्यः परिलक्षितानि सन्ति। मनुष्याणां निरन्तरं स्वकीयम् अन्तःकरणं परमात्मनि योजनीयम्। यावत्पर्यन्तं भगवतः स्मरणं तावत्पर्यन्तं चित्तशुद्धिः, ज्ञानमार्गे जगद् बाधितं मिथ्या तथैव भक्तिमार्गे

अविरलं भगवच्चिन्तनस्य समवेतत्वात् तस्याः श्रेष्ठत्वमापद्यते। ज्ञानमार्गे भवमोहे निवारिते सति जगत् स्वप्नवत्प्रतीयते। *ब्रह्मवैवर्तपुराणे*—

पृथिव्यां यानि तीर्थानि पुण्यन्यपि च जाह्नवि।
मद्भक्तानां शरीरेषु सन्ति पूतेषु सन्ततम्।। इति।

श्रुत्याम् *ईशोपनिषदि*—

हिरण्यमयेन पात्रेण सत्यस्यापिहित मुखम्।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।। (ई.उ. १५)

अस्मिन् श्लोके महारासस्य गूढतात्पर्यं निहितमस्ति। ये ऋषयः उपनिषदाश्च गोपीरूपेण व्रजभूमौ जाताः, तेषां मुक्तिः घोषिता। मुखं योगस्य मार्गः। हिरण्यमयपात्रमेव योगमाया। *श्रीमद्भगवद्गीतायां* श्रीकृष्णः स्वयमेव प्रोक्तवान्—

नाहं प्रकाशः सर्वस्य योगमायासमावृतः।
मूढोऽयं नाभिजानाति लोको मामजमव्ययम्।। (श्री.भ.गी. ७.२५)

योगमायासमावृतः श्रीकृष्णः सर्वेभ्यः न प्रकाश्यते। सा योगमाया—तस्य *केनोपनिषदः* हैमवती। हिरण-हेमयोः एकार्थबोधकत्वात्। सा एव श्रीकृष्णस्य अन्तरङ्गा स्वरूपशक्तिः चित्शक्तिः एव। *नारदपञ्चरात्रे*— सा परा परमा शक्तिर्महाविष्णुस्वरूपिणी। एकेयं प्रेमसर्वस्वस्वभावा गोकुलेश्वरी। योगमायाया अपरं नाम पौर्णमासी, भगवान् श्रीकृष्णः अस्यां पूर्णिमायां गोपिभिः सह रासक्रीडां कर्तुम् इच्छति स्म। उद्धृतेन श्लोकेन प्रोच्यते हिरण्मयपात्रेण सत्यस्य मुखम आच्छादितम्, अखिलभावानां पुष्टिविधायकरसस्वरूपं प्रार्थनाय द्वितीयश्लोकेन सत्यधर्मदर्शनाय इच्छा व्यज्यते। सत्यधर्माय दृष्टये सत्यस्वरूपस्य श्रीकृष्णस्य धर्म एव लीला रासलीला अस्ति। रासलीलाया महिमा रासपञ्चाध्यायस्य समाप्तिवाक्ये ध्वन्यते—

विक्रीडितं व्रजवधूभिरिदञ्च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् यः।
भक्तिं परां भगवति प्रतिलभ्य कामं हृद्रोगमाश्वपहिनोत्यचिरेण धीरः।। इति।

### ३.२. भक्तिः सार्वजनीना

परमात्मनोः अंशविशेषत्वात् जीवात्मा संपूरको भवति। शुद्रादयः अपि परमकल्याणकारिणीं भगवद्भक्तिम् अनुष्ठातुं शक्याः भवन्ति। *श्रीमद्भगवद्गीतायाम्*—

चातुर्वण्यं मया सृष्टं गुणकर्मविभागशः। (श्री.भ.गी. ४.१३)

गुणकर्मवशाद् भगवता ब्राह्मण-क्षत्रिय-वैश्य-शूद्रादिरूपं चातुर्वण्यं सृष्टम्। *शाण्डिल्यभक्तिसूत्रे*—

आनिन्द्योन्यधिक्रियते पारम्पर्यात् सामान्यवत्। ( शा.भ.सू.२.२.२३)

निन्दितचाण्डालादीनाम् अपि भक्तौ अधिकारो वर्तते। चोदनालक्षणोऽर्थो धर्मः। (पू.मी.१.१.२)। शास्त्रयोनित्वात्। (*उ.मी.* १.१.३) इति न्यायाद् अलौकिकः अर्थः श्रुत्यैकसमाधिगम्य इत्यत्र न विप्रतिपद्यामहे किंतु स्त्रीशूद्रादीनाम् इतिहासपुराणादिभिः चाण्डालादीनां च स्मृत्याचारवद् उपदेशपारंपर्येण ज्ञानम् अपि श्रुतिमूलकम् एव भवति। तस्मात् सर्वत्र तदधिकार इति। भक्त्यां सर्वाधिकारो वर्तते, ज्ञानस्य अधिकारी साधनचतुष्टयसम्पन्नः प्रमाता एव वेदान्ते अधिकारी भवेत्। ज्ञानवान् द्विजोपूज्यो भक्तिस्तु सार्वजनीना। केवलं परमात्मनि एव मनः निवेशनं कार्यम्।

महापातकिनां त्वार्तौ। (शा.भ.सू. २.२.२७) इति।

पतनहेतुपापरतानां च पुनः आर्तभक्तौ अधिकारः अस्ति, प्रायश्चित्तेन पापक्षयात् अधिकारस्य सिद्धिः भवति। भगवद्भगवद्विग्रहयोः भेदाभावात्, भगवत्सेवा तदवतारसेवासमरूपेण ग्राह्यत्वात्। सगुणब्रह्मविषयका उपासना गौणीयभक्तिः प्रारंभिकभक्तिः उच्यते। अन्तःकरणं परमात्मना संयोजनेन पराभक्तिः उत्पद्यते। रागेण प्रेम्णा भोगोदकनिवेदनं फलपुष्पनिवेदनम् आरतीक्रियादिकं पराभक्तेः साधनं भवति। शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः, शुद्धचित्तं एव परमात्मनः अधिष्ठानम्, ईश्वरे तुष्टे सति भक्तिः वर्धते इत्यादिकं अस्मिन् प्रसङ्गे उल्लिख्यते। अज्ञानवशाद् अस्माकम् इदं मनुष्यशरीरं, अतो भगवति आत्मसमर्पणं कार्यम्। महर्षिशाण्डिल्येन निगदितम्- अनन्यभक्तिद्वारेण अस्माकं बुद्धिः परमात्मनि यदा लीना भवति तदा सा पराभक्तिरूपेण गण्यते।

अनन्यभक्त्या तद्बुद्धिर्बुद्धिलयादत्यन्तम्। (शा.भ.सू.३.२.४) इति।

अनन्यभक्त्या केवलनिष्कामभक्त्या तस्य जीवस्य बुद्धेः अन्तःकरणस्य अत्यन्तं लयाद् ब्रह्मानन्दप्राप्तिरूपा मुक्तिः भवति। जीवाः भ्रमरकीटादिवत् अनन्यभक्त्या भगवत आराधनां कृत्वा सुखदुःखरहिता भूत्वा परमानन्दं लभन्ते। सूत्रे अत्यन्तम् इत्यनेन सूचितम्— यदा तमस्तत्र दिवा न रात्रि न सन्न चासच्छिव एव केवलः। नासादासीन्नो सदासीत् तदासीत् इत्यादिश्रुतिभिः प्रलयादौ अभावप्रतिपादनात् सिद्धिर्भवति।

### ३.३. मुख्यसाध्यं भक्तिः

ज्ञानं भगवतः शरणात्प्राप्यते ज्ञानं साधनं समर्पणं साध्यम्। ज्ञाने प्राप्ते परम्परायां पराभक्तौ प्राप्तायाम् अपि भक्तिमार्गे समर्पणम् अनिवार्यम्। यज्ञः तपो दानं तीर्थयात्रा उपवासो व्रतादयः ब्रह्मविद्यायाः सोपानं भवन्ति। परंतु ब्रह्मविद्या भक्तिकृपावशाद् लभ्यते। भक्तिं विना ज्ञानं क्षणस्थायि, भक्तिहीना आहुतिः व्यर्था भवेत्। *श्रीमद्भागवते* ब्रह्मा श्रीकृष्णम् उक्तवान् —

> श्रेयःसृतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये।
> तेषामसौ क्लेश एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम्।। (श्री.भाग.१०.१४.४)

टीकायाः उपसंहारे श्रीधरस्वामीपादेन— अयं भावः। यथा अल्पप्रमाणं धान्यं परित्यज्य अन्तःकणहीनान् स्थूलधान्याभासांस्तुषान् ये अपहघ्नन्ति तेषां न किंचित् फलम् अस्ति एवं भक्तिं तुच्छीकृत्य ये केवलबोधलाभाय प्रयतन्ते तेषां तथैव। उपर्युक्त-प्रमाणादिभिः ज्ञायते यद् भक्तिं विना कर्म-ज्ञान-योगादयः स्वकीयफलं दातुं नार्हन्ति, तदर्थं सा भक्तिः मुख्या यतः ते भक्तिम् अपेक्षन्ते। *शाण्डिल्यभक्तिसूत्रे*—

> सा मुख्येतरापेक्षित्वात्। (शा.भ.सू. १.२. १)

श्रीमान् जीवगोस्वामी तस्य *भक्तिसन्दर्भे* अस्मिन् प्रसङ्गे उल्लिखितवान्— *श्रीमद्भगवद्गीतायां* श्रीभगवान् उवाच 'अमानित्वमदम्भित्वम्' (श्री.भ.गी. १३.८) इत्यादौ ज्ञानयोगमार्गम् उपक्रम्य मध्ये 'मयि चानन्ययोगेन भक्तिरव्यभिचारिणी' (श्री.भ.गी. १३.११) इति अपि उक्त्वा, 'प्रान्ते तत्त्वज्ञानार्थदर्शनम्' (श्री.भ.गी. १३.१२) इति समाप्य आह एतद् ज्ञानम् इति। ततो भक्तियोगं विना ज्ञानं न भवति इत्यर्थः। अतः अन्ते अपि उक्तम्—'मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते'(श्री.भ.गी. १३.१९) इति। *श्रीचैतन्यचरितामृते*—

> ভক্তিমুখ নিরীক্ষ—কর্ম-যোগ-জ্ঞান।
> এইসব সাধনের অতীব তুচ্ছ ফল।
> কৃষ্ণভক্তি বিনে তাহা দিতে নারে বল।। (श्री.चै.च. २.२२.१४-१५)

भक्तिमार्गानुसारिणः ये सन्ति ते भक्तिं मोक्षसाधनाय परं साधनं चिन्तयन्ति। भक्तेः भागद्वयं तत्र वैधी भक्तिः पराभक्तिश्च। वैधी भक्तिः पराभक्त्यां साधनरूपेण वर्तते। पूर्णज्ञानं विना ध्रुव-वाल्मिक्यादयः भक्तिं लब्धवन्तः। सर्वेषां भक्तिविषये समानाधिकारः अस्ति— अतः निषादः यद्यपि निम्नजातिः,

वृद्धा शवरी, अशिक्षितो ध्रुवः, राक्षसः विभीषणः, वानरः हनुमान् च आसन् तथा द्ररिद्रः अपि विदूरः सुदामाः च सर्वे भक्त्याः कृते भगवन्तं प्राप्तवन्तः, अपि च ज्ञानाभावे अपि गोपिकाः प्राप्तवत्यः। *बृहदारण्यकोपनिषदि*—आत्मानमेव प्रियमुपासीत।। शतपथ-श्रुत्याम्—प्रेम्णा हरिं भजेत्।। इति। *श्रीमद्भागवते*—

भक्त्या सञ्जायते भक्त्या विभ्रत्युत्पुलकं तनुम्।। (श्री.भाग.११.३.३१)

श्रीधरस्वामिणा—भक्त्या साधनभक्त्या संजातया प्रेमलक्षणया भक्त्या इत्यत्र साधनभक्त्याः अनुष्ठानेन प्रेमभक्तिः आविर्भवति इत्यर्थः आयाति। *श्रीमद्भगवद्गीतायाम्*—

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते।
श्रद्धया परयोपेतास्ते मे युक्तमना मताः।। (श्री.भ.गी. १२.२) इति।

भक्त्या परमात्मानम् अभिजानाति इत्यनेन एतद् ज्ञाप्यते भक्तिः साधनं परमात्मा तु साध्यम् कारणं भक्त्या ब्रह्म वासुदेवं जानाति इत्यत्र अभिपूर्वकं ज्ञाधातोः अभिजानाति –इत्यर्थ आयाति। ज्ञानाद् ज्ञायते अतो ज्ञानात् परमनुभवो भवति, एकं ज्ञानम् अपरं तु अनुभूतिः। ज्ञानक्रिया साधनम् अनुभूतिस्तु साध्यम्, अनुभूतिरेव भक्तिः।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। (श्री.भ.गी. १८.५५) इति।

ब्रह्मज्ञानी प्रसन्नात्मा न शोचति न काङ्खति सर्वभूतेषु समदृष्टिवशाद् ब्रह्मवेत्ता पराभक्तिं प्राप्नोति। परमभक्तिबोधः तथा परब्रह्मबोधः अभिन्नः अस्ति। परां यः पराभक्तिं प्राप्नोति स ब्रह्मज्ञानी भवति। पराभक्ति-ब्रह्मज्ञानयोः अङ्गाङ्गीसंबन्धो विद्यते। यतः सा भक्तिः न क्रियात्मिका अत एव तत्फलस्य निःश्रेयसस्य अनन्तत्वम् उत्पद्यते—

अत एव फलानन्त्यम्। (शा.भ.सू. १.१.८)

*छान्दोग्योपनिषदि* कर्माजितो इहलोकः यथा क्षीयते तथा पुण्याजितः परलोकः अपि क्षीयते इत्यनेन अमृतत्वस्य अपि क्षयित्वं प्रसज्येत। द्विषतो जनस्यापि ज्ञानं वर्तते परंतु भक्त्यां द्वेषो न वर्तते भक्तिस्तु अनुरागरूपा। कर्मणि कर्तुः प्रयत्नो वर्तते, प्रयत्नं विना कर्म न अनुष्ठीयते—

न क्रिया कृत्यनपेक्षणाज्जानवत्। (शा.भ.सू.१.१.७)

ज्ञानं निराकृत्य भक्त्याः स्थानं महत्वपूर्णरूपेण उद्घोषितं शाण्डिल्यमहर्षिणा नारदमुनिना च। *शाण्डिल्यभक्तिसूत्रे* शाण्डिल्यमुनिना निगदितम्—

तद्वतः प्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत्। (शा.भ.सू.१.१.९)

तद्वतो ज्ञानवतो भक्तिरूपप्रपत्तिशब्दात् ज्ञानं न मुख्यमिति। सा मुख्या लिङ्गविपरिणामेन अनुवर्तते। यागेषु यद्यपि स्वर्गादिसदृशः अधिकारः वर्तते तथापि तत्र स्नेहपूर्वकम् इति शब्दः आयाति। तथा च भगवति स्नेहविशेष-लक्षणप्रीत्यर्थं शास्त्रादिना माहात्म्यज्ञानं संपद्यते तदेव भक्तिसाधनवशाद् भक्तिः इत्युच्यते। प्रपत्तिशब्दस्तत्र न प्राप्त्यर्थकः किन्तु भक्तिपरः। आचार्यबलदेवोपाध्यायेन शरणागति-शब्दस्य षट्प्रकारत्वं निरूपितम्—अनुकूलसंकल्पः प्रतिकूलवर्जनं रक्षकरूपेण विश्वासो गोप्तारक्षकरूपेण वरणम् आत्मसमर्पणं कार्पण्यं च एतानि एव भगवच्छरणागमनकार्याय क्रमिकविकासमार्गरूपाः सन्ति। *श्रीमद्भगवद्गीता* भक्तिप्रतिपादकः महनीयग्रन्थः, यत्र शरणागतेः गुह्यतमसाधनं प्राप्यते, तत्र प्रपन्नशब्दः स्पष्टतः आत्मसमर्पणे लक्षितम् अस्ति—

कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः।
यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नम्।। (श्री.भ.गी. २.७) इति।

तस्मात्साक्षात्साधनं ज्ञानं, व्यवहितं साधनं भक्तिरिति। ज्ञानवान् मां प्रपद्यते इति ज्ञानवतो भजनार्थकप्रपत्तिशब्दाद् ज्ञानं न द्वारमिति भावः। ज्ञानमेव भक्तिद्वारेण कैवल्यहेतुः भवति। नान्यः पन्था इत्यनेन तु न व्यापारभूताया भक्तेः साधनत्वं व्यवच्छिद्यते किन्तु कर्मादेः एव भवति। ज्ञानं भक्तिः सममेव न, कारणं ज्ञानं विना अपि भक्तिः लभ्यते।

शाण्डिल्यमते–सा परानुरक्तिरूपा भक्तिः मुख्या। कुतः? इतरापेक्षितत्वात्। इतरैः आत्मज्ञानयोगगौणभक्तिभिः स्वस्य उपकार्यतया भक्तिः अपेक्षिता भवति। *छान्दोग्योपनिषदि*—

यो वै भूमा तत्सुखम् इत्याद्युपक्रम्याम्नायते—
आत्मैवेदं सर्वमिति। स वा एष एवं पश्यन्नेवं मन्वान एवं विजानन् आत्मरतिः आत्मक्रीड आत्ममिथुन आत्मानन्दः स स्वराड् भवति इत्यत्र पश्यन्निति सिद्धत्वेनेति भावः।। इति।

ज्ञानमार्गे तथा भक्तिमार्गे योगस्योपाया आवश्यिकाः भवन्ति। योगश्चित्तवृत्तिनिरोधो योगस्य स्वरूपं तु वैराग्यपूर्वकम् अभ्यासपूर्वकं च चित्तवृत्तिनिरोध एव। कर्मणा चित्तशुद्धिः योगेन चित्तैकाग्रता भक्तिः लक्ष्यं भक्तिः साध्यम्, आत्मसमर्पणस्य ज्ञानं च साधनं भवति। शाण्डिल्याचार्येण-

योगस्तुभयार्थमपेक्षणात् प्रयाजवत्। (शा.भ.सू.१.२.१०) इति।

श्रीमद्भागवतोक्तवचनानुसारं साङ्ख्योक्तानां पञ्चविंशतितत्त्वानाम् अनुलोमक्रमेण जगदुत्पत्तिचिन्तनं प्रतिलोमक्रमेण च प्रलयचिन्तनं तावदेव कर्तव्यं यावत् मनः निर्लिप्तं सत् भक्तियोग्यं न भवेत्। *श्रीमद्भागवते*—

निर्विण्णस्य विरक्तस्य पुरुषस्य पुरुषस्योक्तवेदिनः।
मनस्त्यजति दौरात्म्यं चिन्तितस्यानुचिन्तया॥ (श्री.भाग.११.२०.३०)

तेषामनुष्ठानेन पञ्चविपर्ययरूपा अशुद्धयः क्षीयन्ते तत्क्षयेन च सम्यग्ज्ञानम् अभिव्यज्यते। एतानि योगस्य अष्ट सोपानानि यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः अष्टौ अङ्गानि। यमाः पञ्चसंख्यकाः– अहिंसा सत्यम् अस्तेयो ब्रह्मचर्यम् अपरिग्रहश्च। नियमाचरणं मनसंयमस्य हेतुः। नियमा अपि पञ्च संख्यकाः- शौचः सन्तोषः तपः स्वाध्याय ईश्वरप्रणिधानं[17] च। प्रणिधानम् इत्यस्य अर्थो भक्तिविशेषो योगदर्शनानुसारं सर्वक्रियाणां परमगुरौ अर्पणं तत्फलसन्न्यासो ईश्वरप्रणिधानं वा कथ्यते। प्रशान्तमनसि ईश्वरं भावयित्वा सर्वं परिहरितुं चेष्टा कुर्युः इति एतादृश्या भावनया प्रत्येकस्मिन् कर्मणि कर्मफलाकाङ्खात्यागः ईश्वरार्थं सर्वकर्मसमर्पणं कथ्यते, इत्थमेव निश्चिन्तसाधकः शयनासनादिषु सर्वकार्येषु निजम् ईश्वरस्थं शान्तस्वरूपं वा ज्ञात्वा शरीरयात्रां निर्वहति। स्वस्य अन्तःकरणे चिद्रूपम् ईश्वरं चिन्तयति योगी। परंतु योगदर्शने ईश्वरो गौणः चित्तवृत्तिनिरोधश्च मुख्यः भवति। *शाण्डिल्यभक्तिसूत्रे*—

गौण्या तु समाधिसिद्धिः। (शा.भ.सू. १.२.११)

एवं गौणभक्तिः पराभक्तेः सहायका भवति। संसारे सुखं नास्ति, तदेव स्वात्मनि परब्रह्मणि ईश्वरे विद्यते। तपस्विभ्यः अधिको योगी, ज्ञानिभ्यः अपि अधिको योगी, तदुभयेभ्यो योगी श्रेयः। ज्ञानम् अत्र शास्त्रार्थपाण्डित्यं दर्शयति। अग्निहोत्रादि कर्म, कर्मिभ्यः अपि योगी विशिष्ठ एवं योगिनो माहात्म्यं प्रतिपादितम् अस्ति। *शाण्डिल्यभक्तिसूत्रे*—

तदेव कर्मिज्ञानयोगिभ्य आधिक्यशब्दात्। ( शा.भ.सू.१.२.१३) इति।

अतो ज्ञानमार्गो दुर्गमो दुःसंपाद्यः। श्रद्धावशात् शास्त्रपठनं, श्रद्धा न तु भक्तिः, साधनम् एकं सोपानं भवति। श्रुतौ वेदे ब्रह्मविद्याया यो उपदेशो प्राप्यते, तत्र भक्त्यार्थम् एव कारणं भवति, ज्ञानात् प्रेमवर्धनम् अपनापनं जायते, भक्त्याः चक्षुर्द्वयं वर्तते ज्ञानं वैराग्यं च। ज्ञानरूपि चक्षुः हृदि भक्तिं जागर्ति, प्रेमैव साध्यम् प्रेमैव साध्यम्, अतो *नारदभक्तिसूत्रे*—

तदेव साध्यताम्, तदेव साध्यताम्। (ना.भ.सू. ४२) इति।

सत्यं कामादिजनकं पुण्यापुण्यादिकं शरीरग्रहणकारणम्। तथापि कामप्रयुक्तो हि पुरुषः पुण्यापुण्ये कर्मणि उपचिनोति। कामनाविसर्जिते तु कर्मणो विद्यमाने सत्यपि पुण्यापुण्योपचयकरं न भवति। उपचिते अपि पुण्यापुण्ये कर्मणी कामशून्ये पुरुषे फलदायको न भवति। तस्मात् काम एव संसारस्य मूलम्। तथा चोक्तम् *अर्थर्वणे*—

कामान् यः कामयते मन्यमानः स कर्मभिर्जायते तत्र तत्र। (मु.उ. ३.२.२) इति।

मर्त्या लौकिकं पारलौकिकं वा कर्माणि अवश्यमेव आचरन्ति, श्रीकृष्णवचनानुसारं यथा—

न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्। (श्री.भ.गी. ३.६)

*शाण्डिल्यभक्तिसूत्रे*—

आयुश्चिरमितरेषां तु हानिरनास्पदत्वात्। (शा.भ.सू.३.२.५) इति।

भगवद्नामश्रवणसंकीर्तनाभ्यां कलिपापनाशेन सुकृतजनकत्वात् भगवत्कृपया पराभक्तिः लभ्यते। संसृतिरेषामभक्तिः..भक्त्या अभावात् संसारबन्धनं ततःपरं आसक्तिः, अतः अज्ञानं दूरीकर्तुं भक्तः स्वमायां वशीकृत्य बन्धनात् मुच्यते। शक्तिः वासनायुक्ता भक्तिस्तु वासनारहिता। *अनुभवसूत्रे* भक्तिस्वरूपं निरूप्यते—

यथामहानलज्वाला विभक्ता दीपिकाकृतिः
तथा महेश्वरी शक्तिर्विभक्ता भक्तिरूपिणी।। (अ.सू. २.२३)इति

अत एव निष्कर्षो भक्तिरेव गरीयसी भक्तिरेव गरीयसी।

उल्लेखपञ्जिः

---

1 भगवन्महिमादिज्ञानादनु। पश्चाज्जायमानत्वादनुरक्तिरित्युक्तम्। (स्वप्नेश्वर टीका)

2 न प्रत्यक्षप्रमाणम्। प्रत्यक्षं द्विविधम् आभ्यन्तरं बाह्यं च, न बाह्यमरूपिद्रव्यत्वात्। न आभ्यन्तरम् आत्मसुखदुःखादिव्यतिरिक्तत्वाच्च। परंतु क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात् घटवत्, इति अनुमानप्रमाणेन शब्दप्रमाणेन च ईश्वरास्तित्वसिद्धत्वात्। उपादान-गोचर-अपरोक्षज्ञान-चिकित्साकृतिमत्त्वं कर्तृत्वम्। उपादानं समवायिकारणम्। सकलपरमान्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वम्। 'यः सर्वज्ञः स सर्ववित्' इत्यादि आगमोऽपि तत्रैव भगवदस्तित्वे प्रमाणम्। Anamika Raychowdhury, *Tarkasaṅgraha (Dipikā tīkā)*. pp-34

3 राग एकः क्लेशः, *योगदर्शने* अविद्या-अस्मिता-राग-द्वेष-ऽभिनिवेशाः पञ्चक्लेशेभ्यः अज्ञान-अहंकार-ममता-वैमनस्य- मृत्यभयादयः दुःखानि प्राप्यन्ते।

4 रतिस्तु स्थायीभावः विरुद्धः अविरुद्धो वा यया भगवद्रसस्य आस्वादनं भवति। अपि च परमात्मनि अनुरागः सर्वेषां रसानां विलय एव सूच्यते, परमात्मनि दर्शनलोभो भजनं सर्वथा श्रेयस्कराय कल्याणाय भवबन्धनताडनाय च भवति।

5 देवताविषयकरतिर्भावः, मम्मटस्य *काव्यप्रकाशे* सुस्पष्टम्—रतिर्देवादिविषया व्यभिचारि तथा रञ्जितः।। भावः प्रोक्तः।। (*काव्यप्रकाशः*४.१२)। जगन्नाथाचार्येण *रसगङ्गाधरे*—भक्तेर्देवादिविषयारतित्वेन, भावान्तरगततया रसत्वानुपपत्तेरिति। इति।

6 कैयटेन स्पष्टीक्रियते—

नित्य: परमात्मा देवताविशेष: इह वासुदेवो गृह्यते इति विशेष:।

महाभाष्य: न ऐषा क्षत्रियाख्या। संज्ञैषा तत्र भवत:।। *अष्टाध्यायी*, ४.३.६८ भाष्यम् तथा प्रदीपः।

7 स्त्री-पुत्रादि-ज्ञानेन सुखविशेष उत्पद्यते, अतः तया विषयतया स्वविषयकं संवेदनादिनामकं प्रत्यक्षम् उत्पद्यते, तादृशं सुखमेव प्रीतिः उच्यते। सुखसंवेदने प्रियसंयुक्तात् तादृशसुखसंवेदनात्मिकायां प्रीतौ प्रियविषयतानियम इति ईश्वरविषयतानियमः ईश्वरभक्तिस्वरूपेण प्रीतिविशेषः।

8 टीकायां विश्वनाथ चक्रवर्ती लिखितवान्— यत् संरम्भी क्रोधी। भिन्नदृग् भेददर्शी स्वस्मिन् अपि परस्मिन् अपि सुखदु:खं समानं न पश्यति इति निरनुकम्प इत्यर्थ:। इत्यत्र भावशब्दस्य अर्थ: भक्ति:। Radhagovinda Nath. *Gauḍīya Vaiṣṅava Darśan* (3rd 4th and 5th Volume). pp-2123

9 केवलस्य निर्विशेषस्य ब्रह्मणः शुद्धजीवाभेदेन ज्ञानं कैवल्यम्। त्वम्पदार्थमात्रज्ञानस्य कैवल्यत्वा-नुपपत्तिः तत्पदार्थज्ञानसापेक्षत्वात्। सत्त्वयुक्ते हि चित्ते प्रथमत: शुद्धं सूक्ष्मं जीवचैतन्यं प्रकाशते। ततश्चिदेकाकारत्वाभेदेन तस्मिन् शुद्धं सूक्ष्मं ब्रह्मचैतन्यमपि अनुभूयते। तत: सत्त्वगुणस्यैव तत्र

कारणताप्राचुर्यात् सात्त्विकम् इति। Śrīla Jīva Goswāmī. *Śrī Bhakti Sandarbha*. Ed. Sri Prangopal Goswami. pp- 232

10 शास्त्रे युक्तौ च निपुणः सर्वथा दृढनिश्चयः।
प्रौढ श्रद्धोऽधिकारी यः स भक्तावुत्तमो मतः॥ भ.र.सि. १.२. १७

11 यः शास्त्रादिष्वनिपुणः श्रद्धावान् स तु मध्यमः। *तदेव* १.२. १८

12 यो भवेत् कोमलश्रद्धः स कनिष्ठो निगद्यते। *तदेव* १.२. १९

13 यो यः देवताकामी यां यां तनुं देवतामूर्तिं श्रद्धया जन्मान्तरवासनाबलप्रादुर्भूतया भक्त्या संयुक्तः सन्नर्चितुमर्चयितुमिच्छति प्रवर्तते चौरादिकस्यार्चयते। तस्य तस्य कामिनस्तामेव देवतातनुं प्रति श्रद्धां पूर्ववासनासशात् प्राप्तां भक्तिमचलां स्थिरां विदधाति देवता। *Śrīmadbhagavadgītā.* Edited by Dr. Nalinikanta Brahma. With Sans. Comm. *Gūḍhārthadīpikā* of Madhusūdana Sarasvatī, 7th chapter 21

14 अस्य विष्णुः एतां पृथिवीं लोकत्रयं मनुषे स्वस्मरणशीलाय भक्ताय देवगणाय क्षेत्राय निवासाय दशस्यन्, असुरेभ्योऽपहृत्य दास्यन्, विचक्रमे विक्रान्तवान् वामनावतारे देवैः स्तुत इति कृत्वा अपि तेभ्यस्त्रैलोक्यं दत्तवानित्याह—ध्रुवास इति। कीरयः कीर्तनशीलाः उरुक्षितिं महान्तं निवासिनं सुजनिमा सुजन्म कृष्णावतारैश्चकार। अनेन भगवतो भक्तवत्सलता सूच्यते तदा पुराणवचसां समूलत्वम्। Śrī Yogeswar. *Śāṇḍilya Bhakti Sūtra (*With Bhaktichandrikā by Nārāyana Tīrtha). pp- 53

15 यस्य विष्णोः त्रीणि मधुना पूर्णा पूर्णानि आनन्दरूपाणीत्यर्थः। त्रिस्त्वं पादप्रक्षेपत्रित्वात्। अक्षीयमाणा पादप्रक्षेपणे अक्षीणानि पदानि स्वधयाऽन्नेन उपलक्षणमेतत् सर्वफलेन मदन्ति मादयन्ति, हर्षयन्ति तदाश्रितजनानिति भाष्यकारैर्व्याख्यातम्। यः त्रिधातुः त्रिप्रकारं पृथिवी उत द्यां किं बहूक्त्या विश्वा विश्वानि सर्वाणि भुवनानि एको दाधार दधारेति॥ *Ibid.* pp-54

[16] यादृशेन कामेन यथाकामो भवति, तत्क्रतुर्भवति यत्क्रतुर्भवति तत्क्रतुना तत्कर्म कुरुते, यद्विषयः क्रतुः, तत्फलनिर्वृत्तये यद् योग्यं कर्म, तत्कुरुते निर्वर्तयति। यत्कर्म कुरुते तदभिसंपद्यते तदीयं फलमभिसंपद्यते। कर्म तु फलरूपेण आगमिष्यति, अतः सर्वमयत्वे अस्य संसारित्वे च काम एव हेतुरिति। Sanskrit Commentary by Śaṃkarācāya .*Bṛhadāraṇyaka Upaniṣad*. (Chapter 4.Brāhmaṇa 4th and 5th). pp-32

[17] प्रणिधानं तत्र भक्तिविशेषो विशिष्टमूपासन् सर्वक्रियणां तत्रार्पणम्। विषयसुखादिकं फलमनिच्छन् सर्वाः क्रियास्तस्मिन् परमगावर्पयति तत्प्रणिधानं समाधेस्तत्फललाभस्य च प्रकृष्ट उपायः। यो.सू. भोजवृत्तिः १.२३

# चतुर्थोऽध्यायः

## नारदभक्तिसूत्रविमर्शः

किं प्रमत्तस्य बहुभिः परोक्षैर्हायनैरिह।
वरं मुहुर्तं विदितं घटते श्रेयसे यतः।। *श्रीमद्भागवतम्* २.१.१२

We should know in perfect consciousness that human life is bestowed upon the conditioned soul to achieve spiritual success and the easiest possible procedure to attain this end is to chant the holy name of the Lord- *Śrīmadbhāgavatam.* 02.01.12

# चतुर्थोऽध्यायः
# नारदभक्तिसूत्रविमर्शः

## १. भक्तिलक्षणम्

### १.१. *नारदभक्तिसूत्रे* भक्तिलक्षणम्

महाभारतानुसारम् अखिलवेदज्ञो देवानां पूज्य इतिहासपुराणादिषु विशेषज्ञः अतीतकल्पज्ञो धर्मतत्त्ववेत्ता शिक्षाकल्पव्याकरणादिषु पण्डितप्रवरः संगीतविशारदो यथार्थमीमांसकः प्रभावशाली व्याख्यानदाता मेधावी स्मृतिमान् नीतिशीलः कविर्ज्ञानी तार्किको योगी मोक्षाधिकारिणां ज्ञाता तेजस्वी विद्यानिधिः अकारणप्रेमी सदाचाररक्षको विश्वहितकारी महान् भक्तः तथा आचार्य आसीद् देवर्षिः नारदः[1]।

भक्तिहेतुः परं ज्ञानं नारमित्यभिधीयते।
तद्दानोऽपि लोकेभ्यः नारदः समुदीरितः।। (*भक्तिदर्शनम्* ४०)

देव+ऋषि—देवर्षिः— इत्यत्र *श्रीमद्भगवद्गीतायां* षोडशाध्याये दैवस्तरे अधिष्ठितगुणानां[2] वर्णना प्राप्यते, येषाम् अनुशीलनेन शनैः शनैः तत्त्वज्ञानोपलब्धेः सर्वोच्चस्तरेण जातकाः उन्नतिं प्राप्नुवन्ति। देवर्षिः[3] आसीत् नारदमुनिः। देवर्षिः नारदः स्वभावेन जीवानां भगवद्भक्त्या उद्दीपक आसीत्। कथ्यते यस्य साक्षात्कारो नारदेन भवति तस्य भगवद्दर्शनम् अवश्यंभावि भवेत्। भक्त्याः आचार्येषु नारदस्य स्थानम् अपरिहार्यम्—

प्रह्लादनारदपराशरपुण्डरीकव्यासाम्बरीषशुकशौनकभीष्मदालभ्यान्।
रुक्मांगदार्जुनवसिष्ठविभीषणादीनेतानहं परमभागवतान्नमामि।। (पा.गी. १) इति।

*नारदपञ्चारात्रं नारदगीता* एतेषु सर्वेषु नारदस्य ज्ञानोपदेशं प्राप्यते, ज्योतिषशास्त्रस्य मूलभूतसिद्धान्तं *सूर्यसिद्धान्तं सूर्यहोराशास्त्रं* च विचारपूर्वकं दर्शनेन दृश्यते यत् तेषाम् अन्तःस्थले देवर्षेः नारदस्य ज्ञानोपदेशो विद्यते। देवर्षेः नारदस्य *नारदपञ्चरात्रं* प्रपत्तिमार्गस्य सर्वोत्कृष्टं शास्त्रम् अस्ति। गोस्वामी नाभादास-महोदयः उल्लिखितवान् –अप्रतिहतगतिः देवर्षिः नारदो भगवतः परमात्मनः मनः एव। *हरिवंशपुराणे* नारदस्य उत्पत्तिकथा वर्णिता अस्ति, सृष्टेः प्रारंभे ब्रह्मणः सप्तमानसपुत्रेषु एकः देवर्षिः नारदः परमो भगवद्भक्त आसीत्। दक्षप्रजापतेः शापप्रभावेण नारदस्य शरीरं नष्टं जातम्, कश्यप-

नारदस्य उत्पत्तिः *नारदपुराणे* वर्णिता अस्ति। नारदस्य कलहप्रियता प्रसिद्धिः न लोकप्रवादः शास्त्रीयाधारेण[4] अपि आधारिता अस्ति।

> कलिना सदृशः कोऽपि युगो नास्ति वरानने।
> तस्मिंस्त्वां स्थापयिष्यामि गेहे गेहे जने जने।। (श्री.भाग. २.१३) इति।

*नारदभक्तिसूत्रे* प्रथमसूत्रम्—

> अथातो भक्तिं व्याख्यास्यामः।। इति।

अथशब्दस्य साधारणः अर्थो भवति अधिकारः (intense desire), वेदान्ते तत् साधनचतुष्टयं कथ्यते। अथशब्दः प्रारंभवाचको मङ्गलवाचक आनन्तर्यश्च ध्वन्यते। भगवन्नामसु ॐ तथा अथ नामद्वयं माङ्गलिकम् अस्ति। *नारदस्मृतिः नारदपञ्चरात्रं* चेति ग्रन्थद्वयेन क्रमशः कर्मोपासनयोः अनन्तरं नारदमुनिना भक्तिः व्याख्यायते। 'अतः' शब्दस्य अर्थद्वयम् आपद्यते—अतः कारणात्, अतः प्रयोजनात्। 'अतः' शब्देन सूच्यते पातालाद् ब्रह्मलोकपर्यन्तं कुत्रापि भगवत्प्रेम विना यथार्थशान्तिः तथा सुखादिकं न लभ्यते, तदर्थं सुखप्राप्तिनिमित्ताय भक्तिं व्याख्यास्यामः। भक्त्या प्रयोजनं शास्त्रपाठेन शास्त्रानुध्यानेन परमाभक्तिप्राप्तिः, भक्तिरेव साध्यम् उद्देश्यं वा। भक्तिः इतरसाधननिरपेक्षा प्रेमरूपा, यत्र कर्मकाण्डस्य क्रियायोगस्य नास्ति आवश्यकता, केवलं भावेन भगवत्प्राप्तिः यत्र सिध्यति। यद्दृष्टं तन्नष्टम्, अखिलसृष्टिः विनाशी, केवलं परमात्मा विनाशरहितः। अतो विनाशि-अनित्य-दुःखरूप-भवसंसाराद् अविनाशि-सत्य-सुखस्वरूपस्य परमात्मनः प्राप्तिनिमित्ताय भक्त्या प्रयोजनम् अस्ति। ईश्वरे मनोनिवेश एव भक्तिमार्गस्य प्रथमः पर्यायः भवति। ईश्वरस्य आह्वानं न प्रतिरुध्यते—यदा वने बंशीधरेण श्रीकृष्णेन बंशी ध्वन्यते, तदा गोपबालानां हृदये चाञ्चल्यम् उदेति कृष्णसन्निधानम् अवगन्तुम्, एकदा अन्तर्गृहगता काश्चिद् गोप्यः विनिर्गमनाद् ते समर्थाः कृष्णमिलनार्थं स्थूलशरीरं परित्यज्य सूक्ष्मशरीरेण प्रभुसकाशं मिलितवन्त्यः[5]। यस्य अस्ति भगवति भक्तिः तत्र अखिलाः सद्गुणाः वर्तन्ते।

*नारदभक्तिसूत्रे* कतिविधं भक्तिलक्षणं प्राप्यते नारदाचार्यः तेषां भक्ताचार्याणां भक्तिलक्षणैः सह भक्तेः वैशिष्ट्यं परिभाषयति। वस्तुतस्तु श्रवणकीर्तनादिसाधनभक्तीनाम् अनुवृत्तौ भगवति परमप्रेमलक्षणरूपा अनुरागात्मिका फलभक्तिः परमप्रेमास्पदमूर्तिः स्फूर्तिश्च जायते।

नारदमुनिना *नारदभक्तिसूत्रे* भक्तिलक्षणं कृतम्—

सा त्वस्मिन् परमप्रेमरूपा।। (ना.भ.सू. २)

भक्तेः रूपं परमप्रेम।[6]

प्रेम इत्यस्य अर्थो यद्यानन्दो गण्यते तस्याः प्रकारत्रयं वर्तते— वैषयिकानन्दो भजनानन्दो ब्रह्मानन्दश्चेति। जागतिकेहलौकिकवासनामिश्रितः अनित्यभोगविलाससमन्वित आनन्द एव वैषयिकानन्दः, पठन-पाठन-मातृस्नेह-पुत्रकुटुम्ब-अर्थ-नाम-यश-प्रतिपत्ति-संपत्त्यादीनाम् अपि आनन्दः वैषयिकानन्दरूपेण परिगण्यते। शास्त्राध्ययनं यदा अर्थोपार्जनकारणाद् भवति तदा वैषयिकानन्दः परंतु शास्त्राध्ययनं यदा मानसिकसुखलाभार्थं तदा भजनानन्दरूपेण तद् आद्रियते। *श्रीमद्भगवद्गीतायां* सात्त्विकसुखस्य संज्ञायां प्राप्यते सत्त्वसुखं सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति। भजनान्दतो ब्रह्मानन्दं गमनं कठिनतरं विषयानन्दं गमनं च सहजतरं भवति। 'परमप्रेमरूपा' इत्यनेन ब्रह्मानन्द एव उपन्यस्यते। इष्टचिन्तनेन केवलं परमप्रेम ब्रह्मानन्दं प्राप्तुं शक्यते। *भगवद्गीतायां* मत्परो, मच्चित्तः, सर्वधर्मान् परित्यज्य मामेकं शरणं ब्रज—एतैः वचनैः परमप्रेम एव अभिव्यज्यते, 'तु' इत्यनेन गौणभक्त्यादीनां व्यावृत्तिः सूच्यते।

सूत्रे 'अस्मिन्' इति सर्वनामतः प्रयोगो ध्वन्यते, न ईश्वरशब्दस्य । 'अस्मिन्' इत्यनेन ईश्वर-ब्रह्म-आत्मा-राम-कृष्ण-इत्यादीन् प्रति भक्तिः परामृश्यते। सा भक्तिः तु अस्मिन् परमेश्वरे अविचलितः तीव्रतम अनुरागः एव सूच्यते। *ब्रह्मसूत्रे* ईश्वरस्य व्याख्यायां 'जन्माद्यस्य यतः' इति। परमशब्दो न केवलं परिमाणगतो गुणगतोऽपि, ममैव इति संबोधनं माधुर्यावरणमात्रं भवति, इत्यत्र ममैव न आत्मरतिः न वा अहंबोधः यतः सर्वैः एवं विज्ञायते— भगवान् न कस्यापि स्वस्य प्रेमास्पदं भविष्यति। पार्थिवप्रेम्णः अस्तित्वं ममत्वे एव ससीमम्। शुद्धं प्रेम अहेतुकी भवति, परमप्रेमव्यतीतं अन्यत् सर्वं प्रेम आत्मक्रेन्द्रिकं स्वार्थगन्धमिश्रितं च। पुत्रं प्रति मातुः प्रेम्णः केन्द्रविन्दुः एव अधिकारबोधः एकान्तनिजस्वभावना परामृश्यते, एतत् न कदापि परमप्रेम भवितुमलम्। वस्तुतो हरिः सत्यचिदानन्दरसात्मकः, ज्ञानवृत्त्या चित् भोगवृत्त्या सुखं प्रेमवृत्त्या च रसः अभिव्यज्यते। *श्रीमद्भगवद्गीतायाम्*— मद्गतेनान्तरात्मना, मय्यर्पितमनोबुद्धिः इत्यादीनि। *श्रीमद्भागवते* गोपीनां महत्त्वविषये उद्धवेन प्रोच्यते साधारणजनानां दान-व्रत-तप-होम-जप-स्वाध्याय-इन्द्रियसंयमादि-माङ्गलिक-कर्मानुष्ठानैः भगवन्तं श्रीकृष्णं प्रति स्वाभाविका भक्तिः जागरिता भवति।

दानव्रततपोहोमजपस्वाध्यायसंयमैः

श्रेयोभिर्विविधैश्चान्यैः कृष्णे भक्तिर्हि साध्यते।। (श्री.भाग. १०.४७.२४)

भक्त्याः बाह्यस्वरूपं परमप्रेमरूपा, भक्त्याः निजस्वस्वरूपम् आभ्यन्तरस्वरूपं तु अमृतस्वरूपा आनन्दस्य पराकाष्ठा भवति। अमृतस्य अर्थो यज्ञशेषो[7] वङ्गभाषायां प्रसाद इति। नास्ति मृतं मरणस्येति, अमृतं पीत्वा जीवः अमरो भवति। वेदेषु अमृतशब्दस्य मोक्षार्थं व्यवह्रियते। भक्तिलाभार्थं फलस्वरूपेण यदवशिष्यते तदमृतस्वरूपम्। भगवन्तं अर्पितो भोग एव अमृतः, चरणामृतप्रसादामृतादिकं अमृतशब्देन तथा भगवतः वंशीमाधुरी-रूपमाधुरी-लीलामाधुर्यादिकं लीलाचिन्तनादिकम् अपि अमृते एव पर्यवस्यति। भक्तिः मनः शुद्धं शान्तं च करोति। सर्वत्र भगवद्दर्शनेन भक्तानां सर्वेषु आत्मसु माहात्म्यदर्शनं भवति, तद् वस्तुतः साररूपः अमृतः इति ग्राह्यते। *नारदपञ्चरात्रे* प्रोच्यते यत् स्नेहपूर्वकं निरन्तरध्यानमेव भक्तिः। *नारदपञ्चरात्रे* मार्गद्वयेन भक्तिः व्याख्याता— प्रेम तथा उपासना, प्रेम इत्यर्थे भक्तिः एव गण्यते —

अनन्यममता विष्णौ ममता प्रेमसङ्गता।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः॥ (भ.र.सि. १.४.२) इति।

## १.२. पाराशर्यस्य भक्तिलक्षणम्

*नारदभक्तिसूत्रे* पराशरनन्दनस्य भक्तिलक्षणे प्रकृष्टरूपेण *भागवत्पुराणस्य* प्रभावः परिलक्ष्यते। अत एव भक्तिस्वरूपवर्णनावसरेण पाराशर्यस्य भक्तिलक्षणम् उपस्थापनेन तस्य अभ्यर्हितत्वं सूच्यते। *तैत्तिरीयारण्यके* सहोवाच व्यासः पाराशर्यः। (तै.आ. १.१.३.३७)। पराशरस्य[8] अपत्यं पुमान् इति पाराशर्यः महर्षिः वेदव्यासः, गीतामहाभारतादिनां रचनामाध्यमेन वैदिकरहस्यम् उद्घाट्य धर्मवेत्ता व्यासमुनिः न परां शान्तिं प्राप्तवान्, व्यासमुनेः तात्पर्यम् अवगम्य देवर्षिणा उच्यते— भगवतोऽमलं यश आश्रित्य वासुदेवस्य महिमानम् अवलम्ब्य तेन महोदयेन न किमपि अनुवर्णितवान्। मनुष्याणां तपस्या-वेदाध्ययन-यज्ञानुष्ठान-स्वाध्याय-ज्ञान-दानानाम् एकमेव प्रयोजनं भगवतः श्रीकृष्णस्य गुणलीलाद्यनुकीर्तनम्, अतो व्यासदेवो *भागवत्पुराणं* विरचय्य भगवतः सान्निध्यलाभद्वारा परां शान्तिं लब्धवान्।

*पाराशरस्मृतौ*— कलौ पाराशराः स्मृताः, इत्यत्र कृते युगे *मनुस्मृतिः* त्रेतायां *गौतमस्मृतिः* द्वापरे *शङ्खलिखितौ* कलौ तु *पाराशरस्मृतिः* पठनीया। *श्रीमद्भगवद्गीतायामपि* श्रीकृष्णः अर्जुनं प्रति कथितवान्— मुनिनामप्यहं व्यासः। इति। *नारदभक्तिसूत्रे* प्राप्यते—

पूजादिष्वनुराग इति पाराशर्यः॥ (ना.भ.सू. १६)

पूजायां रतिः अनुरागः एव भक्तिः। ईश्वरस्य प्रतीकरूपेण सगुणसाकारपूजायां कर्मेन्द्रियाणां प्रधानता विद्यते। आध्यात्मिकजीवनस्य लक्ष्यं धर्मीयम् आचारानुष्ठानादिकम् उत्सवपार्वणव्रतादिकं च। मन्दिरं मन्दिरं भास्कर्य-चित्रकला-स्थापत्यादिकम् अपि वैधीभक्तिं जनयति। *विष्णुरहस्ये* कथितम्— ये जना भुवि श्रीविष्णुं पुजयन्ति ते परमानन्दरूपं परमं पदं अभियान्ति। नूनं परमात्मनि व्यक्तिसत्तायाः भक्तिसहकारेण निमज्जनमेव पूजा अस्ति। ये ईश्वरं भजन्ति ते शाश्वतम् आन्दमयं पदं प्राप्नुवन्ति। भगवतः संमुखं नित्यकीर्तनध्यानयात्रामहोत्सवादिकार्याणां समावेशः पूजनक्रियासु अन्तर्भूयते। पूजकः पूजया परमात्मना एकीभूतो भवति तादात्म्यं स्थापयति वा। पूजायाः प्रकारद्वयं विद्यते बाह्यः मानसश्च। मानसपूजा अर्चनाङ्गस्य साङ्गत्वं ददाति। अर्जुनस्य बाह्यपूजापेक्षया भीमस्य मानसपूजा अतिशया शक्तिमती आसीत्। बाह्यपूजा इत्यनेन विधिपूर्वकं पूजनम् अभिव्यज्यते—मूर्तिस्थापना, प्राणप्रतिष्ठा, आह्वानम्, विधिपूर्वकं चित्रादिपूजनम्, आसनदानम्, अर्घ्यदानम्, आचमनम्, पाद्यनिवेदनम्, चन्दनलेपनम्, गन्धपुष्पमालाभूषणादीनामर्पणम्, विल्वपत्रार्पणम्, धूपदीप-प्रज्ज्वलनम्, आरतीक्रिया, नैवेद्यम्, स्तोत्रपाठादिकमपि पूजायां वर्तते। मूलतः पूजायाम् अनुरागः एव मानवानाम् अन्तःकरणं लौकिकविषयेभ्यः अपाकरोति।

## १.३. गर्गाचार्यस्य भक्तिलक्षणम्

वेदस्य रक्षायै वेदस्य विविधशाखानां संहिता यदा निर्मीयते तदा प्रथमतः ऋषेः गर्गस्य आश्रमे शुक्लयजुर्वेदस्य पठन-पाठनप्रक्रिया प्रारभ्यते। अत ऋषिः गर्गः प्रथमगोत्रकार आसीत्। गर्गाचार्यस्य आश्रमो वेदाध्ययनस्य प्रथमाश्रमः अभवत्। *नारदभक्तिसूत्रे* गर्गाचार्यस्य मतानुसारं भागवत्कथायां रुचिः भक्तिः इत्यभिधीयते। इत्यत्र 'कथा' इत्यनेन *भागवत्पुराणस्य* कीर्तन-तप-वेदाध्ययनादिकं हरिकथा-स्तोत्र-धर्मशास्त्रपाठादिकम् अपि संयुज्यते। नवविधेषु भक्तिषु कलियुगे संकीर्तनेन मुक्तिः भवति। भगवतो दिव्यलीलागुणादीनाम् एकाग्रचित्तेन कीर्तनं तथा श्रवणं भक्तेः प्रधानलक्षणम् अस्ति। उच्यते—

> कथादिष्विति गर्गः।। (ना.भ.सू. १७)

अतः हरिकथायाम् अनुरागः एव भक्तिः, इत्यत्र ज्ञानेन्द्रियाणां प्रधानता वर्तते। हरिकथाश्रवणेन ज्ञानोदयो भवति, तद्ज्ञानम् अप्रतिनिवृत्तगुणोर्मिचक्रमेव। हरिकथा आत्मप्रसादं जनयित्वा विषयेषु अनासक्तिं जनयति। लीलायाः स्फूरणार्थं भगवतः नामगुणादिश्रवणेन तत्परिकरश्रवणम् अपि कर्तव्यम्, विदूरमहाशयेन—

> श्रुतस्य पुंसां सुचिरश्रमस्य नन्वञ्जसा सुरिभिर्व्रीडितोऽर्थः।

तत्तद्गुणानुश्रवणं मुकुन्दपादारविन्दं हृदयेषु येषाम्।। (श्री.भाग. ३.१३.४) इति।

श्रीशुकदेवाद् *भागवतपुराणस्य* कथां राजा परीक्षितः श्रुतवान्। *भागवतपुराणस्य* कथां श्रूत्वा एव शनैः शनैः वैधीभक्त्या रागानुरागां भक्तिं प्रति भक्तो गच्छति। नारदमुनिं मिलित्वा दस्युरत्नाकरस्य मनः ईश्वरं प्रति गतवान्। श्रीचैतन्यमहाप्रभुः भगवतः नाम्ना ध्याने निमग्नः अभवत्। मन्त्रोच्चारणं निरन्तरजपनं च भगवति भक्तिं व्यनक्ति। गोपिनां कथाश्रवणप्रसङ्गेन *श्रीमद्भागवते*—

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम्।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति भूरिदा जनाः।। (श्री.भाग. १०.३१.९) इति।

## १.४. देवर्षेः नारदस्य भक्तिलक्षणम्

आन्तरिकभावेन प्रार्थना आध्यात्मिकस्तरे पवित्रतायाः मूर्तप्रतीको भवति। *नारदभक्तिसूत्रे* नारदमुनिना भक्तिलक्षणं कृतं यत्र समर्पण-निरन्तरस्मरण-परमव्याकुलताशब्दानां प्रयोगो ध्वन्यते——

नारदस्तु तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति।। (ना.भ.सू. १९)

जयपराजयसुखदुःखादिचिन्ताव्यतिरेकात्  फलासक्तित्यागेन अहंकारममतारहितेन प्रेमपूर्वकं केवलं परमाश्रयं परमगतिं परमसुहृद् भगवन्तम् अनन्यभावेन परमश्रद्धया तैलधारावत् सदैव नाम-रूप-कथा-गुण-माहात्म्यादीनां स्मरणेन निष्कामभावम् आश्रित्य भगवत्प्रीत्यर्थं परमानन्दप्राप्त्यर्थं यदि मनुष्यो दैहिक-वाचिक-मानसिककर्मभिः सदाचारं पालयेत्, इष्टदेवस्य  विस्मरणेन यदि परमव्याकुलता हृदि अनुभूयते तर्हि स स्वयं भक्तः, तस्य एषा अनुभूतिः भक्तिः इत्यभिधीयते।

'तदर्पित' इत्यनेन भगवतो भगवच्चरणेषु अखिलकर्मणां समर्पणमेव ध्वन्यते, भगवतो लीलास्वादनार्थं प्रेमास्वादनार्थम् आमित्वरक्षणं मूलतः अपरिहार्यतया वर्तते। आमित्वं शरणागतेः पराकाष्ठा। 'अखिलाचारता' इत्यनेन अखिलं कर्म नित्यकर्म –स यावज्जीवेत् श्रीकृष्णम् अर्चयेत् इत्यत्र श्रीकृष्णे समर्पणस्य भाव एव तस्य जनस्य द्योत्यते। व्याकुलतया परमेश्वरदर्शनं भवति, अखिलं कर्म वैदिकं तथा लौकिकं भगवति समर्प्यनीयम्, अनन्यमनसा निरन्तरं भगवच्चिन्तनीयम्। अविद्यमाने न तत्र विरहः जायते वरं च व्याकुलता जायते। विस्मरणं हि मरणम्। विपद्विस्मरणं विष्णोः संपन्नारायणस्मृतिः। स्मरणार्थम् अन्तरिन्द्रियस्य आवश्यकता वर्तते। जागतिकाभावाद् दुःखः तथा पारमार्थिकाभावाद् व्याकुलता जायते यत्र भक्तस्य आमित्वभावो न विद्यते। अस्माभिः मन्यते यद्

राधाराणी अतीव दुःखी परंतु राधाया नास्ति दुःखम्, अपि तु अस्ति श्रीकृष्णाय अतीव व्याकुलता। *भगवद्गीतायाम्*—

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत्। (श्री.भ.गी.९.२७)

विस्मरणेन चेत् परमव्याकुलता, स्मरणेन अवश्यमेव परमानन्दो भविष्यति। *भगवद्गीतायाम्*—

तस्मात् सर्वेषु कालेषु मामनुस्मर युध्य च।
मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयम्।। (श्री.भ.गी. ८.७) इति।

## २. पराभक्तिस्वरूपम्

### २.१. गौणभक्तिस्वरूपम्

भक्तिस्तु द्विधा विभज्यते गौणभक्तिः पराभक्तिश्च। गौणी पुनर्द्विधा विभज्यते—वैधी रागात्मिका च। वैधी पुनः श्रवणादिभेदेन नवधा रागात्मिका च हास्यरसादिभेदेन चतुर्दशधा विभज्यते। तथा वैधी-रागात्मिका-पराभेदाद् भवति भक्तिः त्रिविधा। साधनदशायां गौणी भक्तिः सिद्धावस्थायां पराभक्तिः च निगद्यते। अतः पराभक्तिप्राप्तये या साधनावस्था सैव गौणी प्रोच्यते। *भक्तिरसामृतसिन्धौ*—

तत्र वैधी यत्र रागानावाप्तत्वात् प्रवृत्तिरुपजायते। (भ.र.सि. १.५)

*नारदभक्तिसूत्रे*—

गौणी त्रिधा गुणभेदादार्तादिभेदाद् वा।। (ना.भ.सू. ५६)

गौणभक्तिः एव वैधी भक्तिः, सत्त्व-रजः-तमोभेदाद् गौणभक्त्याः विभागत्रयं वर्तते—

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु।। (श्री.भ.गी.१७.२) इति।

सर्वेषां श्रद्धा स्वसत्त्वानुसारं भवति, यो यत् शुद्धः स एव सः –यस्य यादृशो गुणो वर्तते स तथैव श्रद्धावान् भवति। गौणभक्त्यां श्रद्धात्रयं वर्तते—

सत्त्वगुणान्वित-सात्त्विकभक्तस्य भक्तिः एव सात्त्विकी भक्तिः।
रजोगुणान्वित-राजसिकभक्तस्य भक्तिः एव राजसी भक्तिः।
तमोगुणान्वित-तामसिकभक्तस्य भक्तिश्च तामसी भक्तिः इति कथ्यते।

साधना भक्तस्य मनः तमोगुणात् रजोगुणे रजोगुणात् च सत्त्वगुणे नीयते। *दैवीमीमांसादर्शने* त्रिगुणात्मिका भक्तिः सत्त्वरजतमानुसारं दशधा विभज्यते—

i. अन्यस्य श्रद्धया हरिभजनेन सा भक्तिः तामसाधमा।
ii. स्वैरिणी स्वपतिं यथा स्मरेत् तथैव कुटिलतया नारायणं भजनं तामसमध्यमा।
iii. देवपूजापरायणमपरं दृष्ट्वा मात्सर्येण या भक्तिः सा तामसोत्तमा।
iv. धनरत्नादिकं प्रार्थयन् परमश्रद्धया हरिभक्तिरेव राजसाधमा।
v. अखिललोकख्यातिकीर्त्यादिकमुद्दिश्य गोविन्दं परमभक्त्या भजनमेव राजसमध्यमा भक्तिः।
vi. सालोक्यादिपदं याचित्वा माधवं यदि भजेत्, तर्हि सा भक्तिः राजसोत्तमा।
vii. चेत् स्वकीयपापानां प्रायश्चित्तार्थम् अतीव श्रद्धया गोकुलनन्दनं पूजयेत्सा भक्तिः सात्त्विकाधमा।
viii. विष्णोरिदं प्रियमिति विचार्य कर्मानुष्ठानेनोदिता भक्तिः सात्त्विकमध्यमा।
ix. मानवकर्तव्यबोधेन चक्रपाणिनं यो दासवदर्चयेत् सा श्रेष्ठा भक्तिः सात्त्विकोत्तमा।
x. नारायणस्य महिमाश्रवणेन यो नरः तन्मयत्वेन प्रसन्नो भवति सा भक्तिः सात्त्विकोत्तमा।

मोह-प्रमाद-रागेभ्यो मुक्तये सत्त्वगुणेन रजःतमसी विजेतव्ये। सत्त्वगुणजनितप्रेम्णः प्रकाशे सति अनायासेन भगवतः आकृतिः चिन्तनक्रियया भक्तैः हृदि दृश्यते। भक्तोपरि भगवत्कृपायां ज्ञानदीपकेन अज्ञानान्धकारो दूरीभूयते, तत्त्वज्ञानाद् अमृतत्वप्राप्तिः भवति। *श्रीमद्भगवद्गीतायाम्*—

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता।। (श्री.भ.गी.१०.११)

*श्रीमद्भगवद्गीतायाम्* आर्त-जिज्ञासु-अर्थार्थि-ज्ञानि-भेदेन भक्तस्य भेदचतुष्टयं श्रीकृष्णेन प्रोच्यते।

चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुनः।
आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभः।। (श्री.भ.गी. ७.१६)

गौणी भक्तिः सुकृतीं ददाति, निरन्तरम् अभ्यासतो भगवत्कृपया सा गौणी भक्तिः भक्तं प्रेमभक्तिं प्रति नयति। ज्ञानी यः भक्तः स एव निर्गुणभक्तिं सेवते। अत्र *नारदभक्तिसूत्रे* आर्त-जिज्ञासु-अर्थार्थि-भेदेन गौणी भक्तिः त्रिधा विभज्यते। एतेषु आर्तः असहायवशात् मुक्तिहेतवे भगवन्तं सेवते, जिज्ञासुः तत्त्वज्ञानप्राप्तये चित्तशुद्धये च भक्तिं करोति, अर्थार्थिनो जागतिकभोग्यवस्तुनि आसक्तिः वर्तते। अर्थार्थी अपेक्षया जिज्ञासुः श्रेष्ठः, जिज्ञासुः अपेक्षया आर्तस्य भक्तिः श्रेष्ठा ग्राह्यते। भक्तिद्वारा ज्ञानमेव मोक्षजनने समर्थं भवति। भक्तिः ज्ञानाय कल्प्यते इति श्रुतिघटकभक्तिपदेन गौणी भक्तिः अभिधीयते। आरोग्यं भास्करादिच्छेद इत्यत्र आरोग्यलाभाय ईश्वरम् उपासते, अतः सा गौणी भक्तिः।

### २.२. प्रेमस्वरूपम्

प्रेमभक्त्यां तत् प्रेम किमिति प्रश्ने *नारदभक्तिसूत्रे* प्राप्यते—

अनिर्वचनीयं प्रेमस्वरूपम् मुकास्वादनवत्॥ (ना.भ.सू. ५१-५२)

प्रेम अनिर्वचनीयं भवति, तत् वाङ्मनसोऽगोचरम्, प्रेम वाचा न व्यक्तुं शक्यते। अत्र हृदि स्थिता प्रेमभक्तिः हृदिस्थाः कामा नश्यन्ति। प्रेम योगिनां मिलनसेतुरूपा योगसिद्धिः, अष्टाङ्गयोगनिरूपणं हरिभक्तलक्षणं ज्ञाननिरूपणं विष्णुदेवमाहात्म्य-स्तोत्र-कवच-ध्यान-पूजार्चनादिकं हरिसन्तुष्टिविधानं च हरिभक्तिरिति कथ्यते। *नारदभक्तिसूत्रे* प्रेमस्वरूपप्रसङ्गेन—

गुणरहितं कामनारहितं प्रतिक्षणवर्धमानम् अविच्छिन्नं सूक्ष्मतरम् अनुभवरूपम्॥ (ना.भ.सू. ५३) इति।

सत्त्वरजस्तमांसि इति गुणत्रयरहितं भवति प्रेम। कामः एव अग्निः—कामः संसारं जनयति, प्रेम तु रसः, प्रेम्णि सन्तुष्टि, आनन्दः, त्यागादयश्च वर्तन्ते, कथम् ?–

सा न कामयमाना निरोधरूपत्वात्॥ (ना.भ.सू. ७)

निरोधस्तु लोकवेदव्यापारन्यासः—जागतिक-लौकिक-वैदिककर्मणां न्यासः, निष्कामकर्म ईश्वरार्पणरूपया बुद्ध्या यत् कर्म क्रियते तत् सर्वं न्यासस्य अर्थः भवति। गोपाङ्गनां प्रेम एव शुद्धप्रेम, *श्रीमद्भागवते*—

न मय्यावेशितधियां कामः कामाय कल्पते। (श्री.भाग. १०.२२.२६)

प्रतिक्षणवर्धमानं प्रेम असीमं नित्यपरिवर्धनशीलं, अविच्छिन्नम् अखण्डं प्रेम आत्मनः स्वरूपम्, सूक्ष्मतरं प्रेम सूक्ष्माद् अपि सूक्ष्मतरम्, अनुभवरूपम् अनुभूत्या वेदनीयं भवति। द्वैतबोधो व्याकुलतां जनयति, भावेन भगवान् वशीभूयते, ब्रह्मज्ञानं स्वच्छान्त:करणेन विवेकवैराग्यसमन्वितं सिंहासनमासीनरूपं परंतु भक्तये सिंहासनं न आवश्यकम्। प्रेम स्वाभाविका वृत्तिः, भगवत्सौन्दर्यस्य आस्वादनात् प्रेम इदं मानवचेतसि स्वतःस्फुर्तभावेन उदेति। वैष्णवपदकर्तारः कृष्णान्तप्राणाः परमभक्ताः सिद्धपुरुषाः सन्ति। भगवद्भक्तेः स्वच्छप्रवाहम् अतिक्रम्य काव्यालोके तेषां चित्तम् उत्सार्यते। वैष्णवकवयः श्रीभगवत ऐश्वर्यवत्तायां विमोहिता भूत्वा न केवलं स्तूयन्ते, ईश्वरं प्रियरूपेण, सखारूपेण कल्पयित्वा रसतरङ्गे निमज्जिताः ते भक्ताः विगलितचेतसि भगवतः जयगीतिं गायन्ति। फलभक्तिविषये—

> एतावान् साङ्ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया।
> जन्मलाभः परः पुंसामन्ते नारायणस्मृतिः।। (श्री.भाग. २.१.६)

*नारदभक्तिसूत्रे* भक्तिलाभार्थं येषां साधनानाम् अपरिहार्यता वर्तते —

> तस्या ज्ञानमेव साधनमित्येके।।
> अन्योन्याश्रयत्वमित्यन्ये।। (ना.भ.सू. २८-२९)

भक्त्याः ज्ञानमेव साधनं भवति। को भगवान् किं तस्य स्वरूपमिति प्रश्ने वक्तुं शक्यते यत्—यः सर्वसाक्षी सर्वान्तर्यामी सर्वशक्तिमान् सर्वेश्वरः सर्वशासको निरतिशयज्ञानवान् सर्वज्ञः च अस्ति। यया भक्त्या मानवाः सकलदुःखविमुक्तो भूत्वा विशुद्धा भवन्ति। अतः भगवन्तं ज्ञातार्थं ज्ञानम् आवश्यकम् अस्ति। ज्ञानं परमात्मज्ञानं सर्वथा कामनारहितं भवति। परमात्मा भगवान् ज्ञानस्वरूपः, ज्ञानेन कर्मयोगी कर्मबन्धनात् मुक्तो भवति, प्राक्तनकर्मफलानां विनाशोऽपि भवति।

*नारदभक्तिसूत्रे* प्राप्यते फलरूपत्वात्, भक्तिः फलरूपा, न साधनरूपेण पराभक्तिः गण्यते। *नारदभक्तिसूत्रे*—

> स्वयं फलरूपेति ब्रह्मकुमाराः।। (ना.भ.सू. ३०)

व्रजगोपिकानां प्रेम एव फलरूपा— वास्तविकं प्रेम इन्द्रियतृप्त्यर्थं न, परमेश्वरे प्रेम चित्तविकृतिं नाशयति, बन्धनमुक्तं च करोति भक्तानाम्। कामपूर्तिः कदाचित् प्रेम उच्यते परंतु यदा कश्चन गुलाबे प्रेमप्रदर्शनं करोति तदा स गुलाबं न, अपि तु गुलाबे निहितं सौन्दर्यं प्रेम करोति। विश्वरूपं प्रति भक्तिः श्रूयते वेदेषु— विश्वतो मुखः। भक्तिमार्गेण ज्ञानं लब्ध्वा अभीष्टलक्ष्यं प्रापनाय साधनम् आवश्यिकम्

अस्ति। ज्ञानमार्गे ब्रह्मणा एकात्मतानुभवः एव लक्ष्यं, विवेकविचार एव तत्र मुख्यसाधनम् अस्ति। अतः साध्यं साधनं च द्वयमेव भक्तिः। *श्रीमद्भागवते*—

भक्त्या सञ्जातया भक्त्या बिभ्रत्युत्पुलकां तनुम्।। (श्री.भाग. ११.३.३१)

निरन्तरं विषयचिन्तनेन मनसि विषयासक्तिः वर्धते। मनुष्याणां कर्मेन्द्रियाणि ज्ञानेन्द्रियाणि च मनसा सह विषयभोगेषु धावन्ति, अतः परमात्मनि मनःनिवेशाय विषयत्यागेन सह आसक्तित्यागः एव आवश्यिकः अस्ति। विषयेषु अनुरागरहितं हृदयमेव भगवत्प्रेम्णो दिव्यधाम भवितुमर्हति। *नारदभक्तिसूत्रे*—

तत् तु विषयत्यागात् सङ्गत्यागाच्च।। (ना.भ.सू. ३५)
अभिमानदम्भादिकं त्यज्यम्।। (ना.भ.सू. ६४) इति।
तदर्पिकाखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम्।।
(ना.भ.सू. ६५)
*महाभारते* प्रोच्यते— त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च।।
*(महाभारतम् शान्तिपर्वः* १९२.१७ ) इति।

इष्टदेवस्य स्वरूप-प्रभाव-माहात्म्य-रहस्य-गुण-लीला-नामादीनां निरन्तरम् अविच्छिन्नभावेन भजनेन साधको भक्तिं लभते, तदेव भगवद्भजनम्—अव्यावृतभजनात्। (ना.भ.सू. ३६)। *श्रीमद्भागवते*—

भक्तिं लब्धवतः साधोः किमन्यदवशिष्यते।
मय्यनन्तगुणे ब्रह्मण्यानन्दानुभवात्मनि।। (श्री.भाग. ११.२६.३०) इति।

भक्तये सत्सङ्गः आवश्यकः, महत्कृपा ईश्वरस्य इच्छाव्यतिरेकेण कथमपि न भवति। ईश्वरे मायावर्धनाय सांसारिकमाया अवश्यमेव अतिक्रमणीया। इहलौकिकमायायाः अतिक्रमः मानवानां कथं भवति इति विषये *नारदभक्तिसूत्रे* चर्या भवति—

कस्तरति कस्तरति मायाम्, यः सङ्गांस्त्यजति
यो महानुभवं सेवते, यो निर्ममो भवति। (ना.भ.सू. ४६)

सङ्ग इत्यनेन दुसङ्गानां त्यागो द्योत्यते, महानुभवानां सन्तानां सेवा अपि बोध्यते, तथैव सांसारिकवस्तुनाम् अनित्यज्ञानेन त्यागः इत्यत्र ध्वन्यते। मायातिक्रमणाय निर्जनप्रियः त्रिगुणातीतः

प्राप्तिरक्षणाभ्याम् उदासीनो भवति स पुमान्। य जनः कर्मफलत्यागं कर्मन्यासं च करोति स अवश्यमेव संसारसागरं तरति, स तरति स तरति स लोकांस्तारयति।। (ना.भ.सू. ५०) इति।

## २.३. भक्तस्वरूपम्

यदा वैधीभक्तिं कुर्वन् भक्तस्य हृदये भगवन्तं प्रति एवंविधः अपूर्वः अनुरागः उत्पद्यते, यया भक्तो भगवद्भावसागरे निमग्नः अनाविलम् आनन्दं लभते तदानीं तस्य चेतसि तैलधारावद् आनन्दामृतसिञ्चनकरः अविच्छिन्नो भक्तिरसप्रवाहो विस्तार्यते, इयं दशैव रागात्मिका प्रोच्यते। अस्यां दशायां भक्तो मनोमधुप-रसास्वादनेन उन्मत्तो भूत्वा सर्वत्र प्रभुमेव पश्यन् निरन्तरम् आन्दनिमग्नः तिष्ठति। भक्तहृदयं सांसारिकेभ्यो विषयेभ्यो विरक्तं भूत्वा भगवति अहर्निशं लीनं भवति। एतत्परिपक्कदशा पराभक्तिरूपेण गण्यते। प्रारब्धं क्षीयते भोगात्। उपासकः परां भक्तिम् अभिगम्य न भोगमोक्षौ अभिलषति, भक्तिः ब्रह्मणः ऐक्यात् निर्विशेषसुखस्वरूपा। विशेषेण परिपक्का पराभक्तिः सद्यमुक्तिं साधयति। वैराग्यं ज्ञानस्य साक्षात्कारणं योगश्च साधनभक्त्याः साक्षात्कारणं भवति, अत एव वैराग्ययोगौ पराभक्तेः अङ्गत्वेन गण्येते। मद्भक्तानाञ्च ये भक्तास्ते मे भक्ततमाः स्मृताः। *भगवद्गीतायाम्*—

समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।।
ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम्।। (श्री.भ.गी.९.२९) इति।

*नारदभक्तिसूत्रे*—

भक्ता एकान्तिनो मुख्याः।। (ना.भ.सू. ६७)

ये अनन्या भक्ता एकान्तिनः ऐकान्तिकभावेन भगवन्तम् अनुरागं प्रदर्शयन्ति ते मुख्या इत्यभिधीयते। प्रभुर्हि केवलं एक एव, स एव नियन्ता, स एव मम स्वामी। तदतिरिक्तः कश्चन स्वामी नास्ति, नियामको नास्ति, भगवतः अन्यत् किमपि नास्ति अहमपि नास्मि— इत्येव अनन्यता। *श्रीमद्भगवद्गीतायाम्*—

अनन्यचेताः सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थः नित्ययुक्तस्य योगिनः।। (श्री.भ.गी. ८.१४)

भक्त अतीव पवित्रः, येषां अन्तकरणे कण्ठावरोध-रोमाञ्च-अश्रुपातादयः महाभावविकारादयः प्रेमरूपभावावेगाः प्रकाशिता भवन्ति, तेषां भक्तानाम् आध्यात्मिकशक्त्या न केवलं कुलम् अपि तु वसुन्धरा पुण्यवती भवति, *नारदभक्तिसूत्रे*—

नाकण्ठावरोधरोमाञ्चाश्रुभिः परस्परं लपमानाः पावयन्ति कुलानि पृथिवीञ्च॥
(ना.भ.सू. ६८)

इष्टदेवाय व्याकुलतया अश्रुपातो भक्त्यां वर्तते। 'क्रन्दनम्'— रामानुजाचार्येण तापः, श्रीचैतन्यमहाप्रभुणा व्याकुलता, वल्लभाचार्येण निसन्देहः, शंकराचार्येण च मुमुक्षा इत्यभिधीयते। सत्ययुगादौ बलि-विभीषण-भीष्म-कपिल-नारद-अर्जुन-अम्बरीषादीनां श्रीगोकुलवासिनां च सर्वत्र उभयपक्षेऽपि पूजादिकं भक्तिकार्यतया भक्तेः व्यंजकमिति भक्तिलक्षणे व्यवह्रियते, यत् स्वरूपतो भक्त्यन्तर्गतमिति ध्येयम्। प्रीतौ च ईश्वरविषयता ईश्वरत्वप्रकारिका बोध्या, ईश्वरत्वं च स्वप्रकाशः अखण्डः आनन्दमयो नित्यबुद्ध्यादिना इच्छाकृतिमत्त्वं कृष्णत्व-रामत्व-नरसिंहत्व-शिवत्व-दुर्गात्वादीनां परमात्मवृत्तित्वं च असाधारणधर्माणां बोधनात् भवति। *श्रीमद्भगवद्गीतायाम्*—

पुरुषः सः परः पार्थः भक्त्या लभ्यस्त्वनन्यया॥ (श्री.भ.गी. ८.२२)

एवं च व्रजसुन्दरीणां श्रीकृष्णे ईश्वरत्वज्ञानम् अन्तरेणापि श्रीकृष्णः कोटिकन्दर्पलावण्य इत्यादि ज्ञानयुक्ता अनुरक्तिः भक्तिः भवति। प्रीतिगर्भः सविकल्पको भगवत्समाधिः ज्ञानान्तर्गतो भक्त्यन्तर्गतश्च। निर्विकल्पकसमाधौ ज्ञानप्राधान्यवशात् तत्र ईश्वरत्वं न प्रकाररूपेण गण्यते। गोपीनां प्रेमभक्तौ आविष्टा भक्तिः सर्वोत्तमा, व्रजगोपीभ्य उत्कृष्टो हरिभक्तो जगति विरल इत्यनुभूतिः उद्धवस्य—

न गोपीभ्यः परो भक्तो हरेश्च परमात्मनः।
यादृशी लेभिरे गोप्यो भक्तिं नान्ये च तादृशीम्॥ (ब्र.वै.पु. ५.९४.८६) इति।

धर्मराजो युधिष्ठिरो भक्तं विदूरं प्रति प्रोक्तवान्—

भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो।
तीर्थीकुर्वन्ति तीर्थानि स्वान्तःस्थेन गदाभृता॥ (श्री.भाग. १.१३.१०)

एकादशप्रकारका प्रेमभक्तिः नारदाचार्यः *नारदभक्तिसूत्रे* कथितवान्—

गुणमाहात्मासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्ति-दास्यासक्ति-सख्यासक्ति-कान्तासक्ति-वात्सल्यासक्ति-आत्मनिवेदनासक्ति-तन्मयासक्ति-परमविरहासक्तादयः। (ना.भ.सू. ८२)

I. गुणमाहात्मासक्तिः भगवतः गुणमाहात्म्यादिनां प्रति भक्तानाम् आसक्तिवशात् जायते, श्रीहनुमतः भगवत्कथायां परमा आसक्तिः आसीत्—यत्र यत्र रघुनाथनामकीर्तनं भवति तत्र तत्र पवनपुत्रः नतमस्तकेन अश्रुसिक्तलोचनाभ्यां अञ्जलीं विधाय समुपस्थितामास, यथा—देवर्षिः नारदो, वेदव्यासः, शुकदेवः, याज्ञवल्क्यः, शौनकः, शाण्डिल्यः, पृथुः, जनमेजयः इत्यादयः भक्ताः।

II. भगवतः सौन्दर्यं प्रति यदि आसक्तिः अनुरागो वा वर्तते तर्हि सा रूपासक्तिः, *नारदभक्तिसूत्रे* भगवतः गुणमाहात्म्यज्ञानपूर्वक-रूपासक्त-भक्तस्य विषये उल्लेखः प्राप्यते— न तत्रापि माहात्म्यज्ञानविस्मृत्यपवादः। (*ना.भ.सू.* २२)। यथा—व्रजगोपिकादयः।

III. रूपासक्तिः मूलतो दर्शनेन भवति पूजासक्तिः तु सेवारूपायां भगवत्पूजायां तन्मयानां भक्तानाम् आचमन-आह्वानपुरःसरं स्तुति-पुष्पाञ्जलिपर्यन्तं या क्रिया वर्तते तासाम् अनुष्ठानेन पूजासक्तिः भवति, यथा— राजा, पृथुः, अम्बरीषश्च।

IV. निरन्तरं भगवतः स्मरणं स्मरणासक्तिः, जप-ध्यान-मन्दिरदर्शन-तीर्थपरिक्रमादयः परमेश्वरस्य स्मरणाय साधनानि भवन्ति, यथा—प्रह्लादः ध्रुवश्च।

V. दास्यं सार्वभौमभावः, भक्तो यदि दास्यभावेन भगवत्सेवायां स्वं नियोजयति तर्हि सा दास्यासक्तिः, यथा— अक्रुरः विदूरश्च।

VI. सख्यासक्तिः भगवति भक्तस्य सख्यभावाद् आगम्यते, यथा— उद्धवः अर्जुनश्च।

VII. परमपुरुषं प्रियतमज्ञानेन मधुरभावेन या रतिः जायते सा एव कान्तासक्तिः, यथा— अष्ट पटनार्य्यः।

VIII. वात्सल्याद् भक्तानां यः स्नेहः बालगोपाले उदेति सा वात्सल्यासक्तिः, यथा— कश्यपः अदितिश्च।

IX. अतीव अनुरागात् यदा स्वं भक्तो भगवति समर्पयति तदा सा आत्मनिवेदनासक्तिः, यथा—बलिः विभीषणश्च।

X. रासलीलायाम् अन्तर्धानं श्रीकृष्णं प्रति गोपिकानां तन्मयता एव तन्मयासक्तिः, यथा— शुकः कौण्डिन्यश्च।

XI. भगवत्प्राप्त्यर्थं या व्याकुलता विरहवशाद् भवति सा एव परमविरहासक्तिः, यथा— उद्धवः व्रजगोपिकादयश्च।

एवमेव यद्यपि भक्तिः अपरिणामिनी एकरूपा तथापि एकादशप्रकारका भक्त्या भेदा विद्यन्ते। गुणमाहात्मासक्ति-रूपासक्ति-पूजासक्ति-स्मरणासक्तिषु शान्तरसो वर्तते, आत्मनिवेदनासक्तौ

शान्तरसो नास्ति,कारणं शान्तरसे स्पष्टतः अहंकारो वर्तते परंतु आत्मनिवेदने समर्पणम् अस्ति। *दैवीमीमांसादर्शने*—

> हास्यादयो गौणा दास्यासक्ति-सख्यासक्ति-वात्सल्यासक्ति-
> कान्तासक्ति-आत्मनिवेदनासक्ति-गुणकीर्तनासक्ति-तन्मयासक्तयश्च मुख्याः।।
> (दै.मी.द. १.१७)

यथा भीष्मो वीररसेन, दशरथः करूणरसेन, वल्यर्जुनयशोदानां च विश्वरूपदर्शनार्थम् अद्भुद्रसेन कृष्णानुग्रहो भवेत्। गोपालबाला हास्यरसेन, कंसो भयानकरसेन, अघासुरो वीभत्सरसेन, देवराजः इन्द्रो रौद्ररसेन च स्थितिम् आप्तवान्। एवं काम-क्रोध-भय-स्नेह-ऐक्य-सौहृद्याद्येतैः भावैः भगवति तन्मयभावे सति सिद्धिः भवेत् परंतु अमी सप्त रसा न मुख्याः साक्षाद्रुपेण भक्तकल्याणासाध्यत्वात् भूयते। प्राकृत्याद् भगवन्तं यदा कोऽपि भक्तो दासभावेन कोऽपि वात्सल्यभावेन कोऽपि कान्ताभावेन कोऽपि आत्मनिवेदनभावेन कोऽपि गुणकीर्तनभावेन तन्मयासक्तिभावेन चाश्रित्य भगवन्तं सेवते स अवश्यमेव भगवद्राज्यम् आयाति। अन्तिमे तु परमानन्दपदं प्राप्नोति। भगवान् भक्ताधीनो भक्तैः भक्तजनप्रियः। विश्वरूपदर्शनात् श्रीकृष्णस्य यथार्थस्वरूपम् अवगम्य भक्त अञ्जलिबद्धः अर्जुनः अवदत्—

> अजानता महिमानं तवेदं मया प्रमादात्प्रणयेन वापि।।
> यच्चावहासार्थमसकृतोऽसि विहारशय्यासनभोजनेषु।
> एकोऽथवाप्यच्युत तत्समक्षं तत्क्षामये त्वामहमप्रमेयम्।।
> (श्री.भ.गी. ११.४१-४२) इति।

भगवतो विश्वरूपधारण-कालीयनागदमनादि-अलौकिककार्यसमूहानां प्रत्यक्षेण यशोदा-नन्द-गोपिकादयो वात्सल्यात्पुत्रभावेन कृष्णप्रीतिपरायणतया भगवन्तं प्राप्तवत्यः।

*श्रीमद्भगवद्गीतायां* भक्तियोगे नवत्रिंशत् गुणसमन्वितभक्ता एव भगवतः प्रियः इति उल्लिख्यते श्रीकृष्णेन—

> समः शत्रौ च मित्रे च तथा मानापमानयोः।
> शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः।।
> तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
> अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः।। (श्री.भ.गी. २.१७-१९) इति।

भगवान् अवश्यमेव भक्ताश्रितः शास्त्रप्रमाणतः। भक्तप्रह्लादस्य समीपं भगवान् नृसिंहरूपेण, ध्रुवभक्तस्य समीपं श्रीहरिरूपेण, उद्धवस्य समीपं श्रीकृष्णः ज्ञानिरूपेण, कंसस्य कारागारे वासुदेवरूपेण भगवान् प्रकटितवान्।

प्रेम्णि सत्त्वं रजः तमः किमपि गुणो नास्ति। ज्ञानिनो लक्षणकथनावसरेण उच्यते निस्त्रैगुण्यम्, यस्य निर्मलहृदि भक्तिः प्रकाश्यते स मानवः त्रिगुणम् अतिक्राम्यति। भक्तो रजोगुणस्य ऊर्ध्वं वर्तते इत्यस्य अर्थः न निष्क्रियता द्योत्यते, कारणम्— स भक्तः सततम् ईश्वरचिन्तायां निमज्जनकारणाद् बहिर्जगतः कर्मणि न लिप्यते उदासीनत्वात्। भक्तो न स्थाणुवत् निष्क्रियः वरं च ईश्वरप्रेम्णः अनुभूतौ सदा जाग्रतः अस्ति। *नारदभक्तिसूत्रे* प्राप्यते—

> इत्येवं वदन्ति जनजल्पनिर्भया एकमता कुमार-व्यास-शुक-शाण्डिल्य-
> गर्ग-विष्णु-कौण्डिन्य-शेष-उद्धव-आरुणि-बलि-हनुमद्-विभीषणादयो भक्ताचार्याः॥
> (ना.भ.सू. ८३)

सनतकुमारः भक्तिमार्गस्य प्रधानः प्रवर्तकः आसीत्, व्यासदेवेन विरचितं *भागवत्पूराणं* मूलतः उच्चमार्गाश्रितो भक्तिसमृद्धो ग्रन्थः, शुकदेवेन *भागवत्पुराणे* भक्तिमूलका अमृतकथा प्रोक्ता, शाण्डिल्याचार्येण विरचिते *शाण्डिल्यभक्तिसूत्रे* विस्तारिततया भक्तिविषयका आलोचना प्राप्यते, गर्गचार्यविरचिते *गर्गसंहितायां* भक्तिः एव मूख्यरूपेण दर्शिता, विष्णुः स्मृतिकार एव, कौण्डिन्यस्य भगवति तन्मयासक्तिः भक्तिः, शेषस्य हरिभक्तिः अतुलनीया, उद्धवो भगवतः श्रीकृष्णस्य सखा आसीत्, आरुणिः निम्बार्काचार्य एव य मूलतः भक्तिसंप्रदायस्य आचार्य आसीत्, बलिः यस्य श्रीकृष्णं प्रति आत्मनिवेदनं भक्तिभावस्य निदर्शनं वहति, हनुमतो रामभक्तिः *रामायणे रामचरितमानसे* च याथार्थ्येन उपस्थापिता, रामचन्द्रं प्रति पवननन्दनस्य हनुमतो दास्यासक्तिः प्रसिद्धा। दास्यासक्त्या सेवकरूपेण भक्तो भगवत्सेवायाम् आत्मानं समर्पयति। विभीषणो भक्तिहेतोः सख्यरूपेण रामचन्द्रं प्राप्तवान्— एवमेव भक्तिशास्त्रस्य सर्वेषाम् आचार्याणां भक्त्याः सर्वश्रेष्ठता निर्विवादेन नारदाचार्येण *नारदभक्तिसूत्रे* निगदिता अस्ति। हनुमद्विभीषणादीनां भक्ताचार्याणाम् उल्लेखेन वैष्णवपदमेव भगवत्शब्दस्य अर्थे अतीव युज्यते।

## ३. *नारदभक्तिसूत्रस्य* उपादेयता

भक्तिस्तु मातृस्वरूपा। संसारो दुःखदायकः संघर्षदायकश्च, सांसारिकाः सर्वे प्राणिनो दुःखसंघर्षादिना व्याकुलाः भवन्ति, व्याकुलताया अवसादस्य च भिन्नता वर्तते अवसादो जागतिककारणाद् व्याकुलता च पारमार्थिककारणाद् अवगम्यते। प्रेम्णि दाता ग्रहीता च उभययोः शुद्धिः प्रपद्यते, शुद्धिकरणं सोपानस्य निम्नतमाद् ऊर्ध्वपर्यन्तं रूपायते, एतदेव माधुर्यं भक्तिमार्गस्य। भक्त्या उपादेयताविषये चर्या *नारदभक्तिसूत्रे* प्राप्यते—

यल्लब्ध्वा पुमान् सिद्धो भवति अमृतो भवति तृप्तो भवति।। (ना.भ.सू. ४)

भगवत्येकीभवनमेव अमृतस्य लक्षणम्। भक्तिरूपिणम् अमृतं लब्ध्वा, 'लब्ध्वा' इत्यनेन ईश्वरीयकृपा बुध्यते। तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेत्। (श्री.भाग. ७.१.३१)। यत् नपुंसकशब्दः अतः 'यत्' इत्यनेन परमप्रेम निर्दिश्यते। 'पुमान्' इत्यनेन भक्तिः सार्वजनीना इति ध्वन्यते। इदं परमप्रेम्णः लभ्यमाने सति पुमान् सिद्धो भवति ऐश्वर्यं लभते। सिद्धस्य अर्थः ईश्वरे संपूर्णतया समर्पणं तन्मयता आदर्शचरितार्थता च। सिद्धभक्तौ तुलसीदास-सुरदासौ आस्ताम्। *मूण्डकोपनिषदि* प्राप्यते— ब्रह्म वेद ब्रह्मैव भवति। यः ब्रह्म जानाति स ब्रह्मणि तन्मयो भवति। यदा भक्त्यां भक्त इष्टेन सह एकीभूतो भवति तदा भक्तस्य अमृतत्वप्राप्तिः भवति।

यत्तदग्रे विषमिव परिणामेऽमृतोपमम्।
तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्।। (श्री.भ.गी.८.३७)

तृप्तिः एव जीवनमुक्तिः, 'अमृतोपलब्धिः' इत्यनेन विदेहमुक्तिः परामृश्यते। धर्मे तृप्तिः वर्तते. विविधयागयज्ञानाम् अनुष्ठानेन इच्छापूर्तिः भवति, योगेन च अन्तरिन्द्रिय-बहिरिन्द्रियाणां निग्रहो भवति। ज्ञाने सति ज्ञानामृतं सन्तुष्टिं ददाति, ज्ञानं तु अज्ञानं नाशयति। *कुब्जिकामतन्त्रे*—

ज्ञानामृतस्य तृप्तस्य कृतकृत्यस्य योगिनः।
न चास्ति किञ्चित् कर्तव्यमस्ति चेन्न स सत्त्ववित्।। (कु.त. २५.१७१)

अतः *नारदभक्तिसूत्रे* उच्यते—

यत् प्राप्य न किञ्चिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति।।
(ना.भ.सू. ५) इति।

वंशपरम्परायां सन्तगुरुकृपया भगवद्कृपावशाद् वा भजनेन चित्तशुद्धेः अनन्तरं भक्तिं प्राप्य भक्तो जीवन्मुक्तो भवति। तदर्थम् उच्यते—

तस्मिन्ननन्यता तद्विरोधिषूदासीनता च॥ (ना.भ.सू. ९)

अनन्यमनसा अन्यत् सर्वं परित्यज्य केवलं श्रीकृष्णः परमात्मा एव चिन्तनीयः। *भगवद्गीतायाम्*—

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ (श्री.भ.गी.९.२) इति।

*ब्रह्मसूत्रे*—तदनन्यत्वमारम्भणशब्दादिभ्यः। (ब्र.सू. २.१.१४)। परमात्माव्यतीतं द्वितीयं किमपि वस्तु नास्ति। धर्म-अधर्म-ईश्वर-जगत्-जीवादिकं सर्वमेव परब्रह्मणि अधिष्टितम् अस्ति। भक्तः न किंचिद् वाञ्छति, भक्तो मोक्षस्य इच्छा अपि न काङ्क्षति। श्रीरूपगोस्वामी *भक्तिरसामृतसिन्धौ* प्रोक्तवान्—

श्रीकृष्णचरणाम्भोज सेवा निर्वृतचेतना।
एषां मोक्षाय भक्तानां न कदापि स्पृशा भवेत्॥ (भ.र.सि. १.२.२५)

भक्तः गुणत्रयम् अतिक्राम्यति—जीवदेहे सत्त्वगुणस्य उदये चैतन्यशक्तेः प्रकाशः बोधशक्तेश्च उदयो भवति, ज्ञानं सुखं च सत्त्वगुणस्य विषयः। तमोगुणस्य प्रभावात् प्रमाद-मोह-आलस्य-निद्रादिगुणाः उत्पद्यन्ते। शोकः तमोगुणजातः। यस्य कामना इच्छा नास्ति तस्य कथं शोक उत्पद्यते। न देष्टि—भक्तो जानाति सर्वमेव ईश्वरेच्छया भवति, अतः कस्योपरि भक्तस्य द्वेषो नास्ति। न रमते—जागतिकानन्दो तस्य नास्ति। न उत्साही भवति— रजोगुणस्य प्रभावात् लोभ-प्रवृत्ति-आसक्ति-कामना-स्वार्थयुक्तानां कर्मणाम् आरम्भः संपद्यते। रजोगुणात् तृष्णा उद्यमश्च जायेते, भक्तो भगवति समर्पितं निष्कामं कर्म करोति एतेन स्वार्थाभावात् तस्य उत्साहः अपि विलुप्यते। *श्रीमद्भगवद्गीतायां* भक्तलक्षणप्रसङ्गेन द्वाद्वशाध्याये— यो न हृष्यति इष्टप्राप्तौ न द्वेष्टि अनिष्टप्राप्तौ न शोचति प्राप्तेविष्टयोगे न काङ्खति अप्राप्तेष्टसंयोगे सर्वारम्भपरित्यागी इति विवृणोति। शुभाशुभे सुखसाधनदुःखसाधने कर्मणा परित्यक्तुं शीलमस्य इति शुभाशुभपरित्यागी भक्तिमान् यः स भगवतः प्रियो भवति।

अपि च *नारदभक्तिसूत्रे*—

यत् ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो भवति॥ (ना.भ.सू. ६)

भक्तिं ज्ञात्वा भक्तो मत्तो परमानन्देन विभोरो भवति, भक्तः स्तब्धो शान्तो भवति, भक्त आत्मारामो भवति अकामः निष्कामः आप्तकामः आत्मकाम स एव जनः परमात्मानं लभते, तस्मिन् तन्मयो

भवति, परमात्मनि रमते सन्तुष्टिं लभते भक्तः। भगवत्प्रेम अतीव शुद्धं निस्वार्थं च। श्रीराधा नित्या स्वयमेव श्रीकृष्णो नित्यः गोपबालाः श्रीकृष्णस्य कार्यव्युहरूपाः सन्ति। गोपिनां प्रेम्णि महत्त्वकारणं वस्तुतः अभिमानशून्यता-दैन्यत्यागादि-गुणाः वर्तन्ते, परंतु इत्यत्र 'मानम्' इत्यस्य अर्थो लीला। त्यागो हि प्रेम्ण आधार उदयो वा, त्यागे वर्धमाने प्रेम्णो विकाशः अपि वर्धितो भवति। गोपिकानां स्वसुखवासना लेशतो नास्ति, परसुखसुखित्वम् अस्ति। *नारदभक्तिसूत्रे*—

नास्त्येव तंस्मिस्तत्सुखसुखित्वम्। (ना.भ.सू. २४) इति।

भक्तः अनन्यभक्त्या त्रिभुवनं कथं पवित्रीकरोति इति विषये *श्रीमद्भागवते*—

वाग् गद्गदा द्रवते यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति।। (श्री.भाग. १०.१४.२४)
इति।

भक्त्यां सर्वेषाम् अधिकारः अस्ति। अतः भक्तेः व्याख्या कर्तव्या। परमात्मनः प्राप्त्यर्थं भक्त्या महिमा अपारः अस्ति। श्रुतिः आह—भक्तिरेवैनं नयति। भक्तिरेव भगवत्समीपं नयति भक्तिरेव भगवन्तं दर्शयति भक्तिरेव भगवतो ज्ञानम् अवगमयति परमपुरुषो भगवान् भक्तिवशः तथा हि भक्तिः महती। भजनं नाम रसनम्, भगवतः लीलागुणमहिमारूपसत्सङ्गकथादीनां पुनः पुनः श्रवणेन वारं वारं स्मृतिरोमन्थनेन च रसास्वादनमेव भजनम्। भगवते चेदस्ति व्याकुलता चित्तं द्रवीभूयते, भगवतो रूपदिव्यगुणलीलामाहात्म्यादीनां स्मरणेन भवति। द्रवीभूते हृदये श्रीकृष्ण-श्रीराम-नारायणादीनां चित्राङ्कनं करणीयम्। *भक्तिरसायने*—सर्वेश्वरे द्रवीभूतस्य मनसः एकाकारा वृत्तिः एव भक्तिः निगदिता।

नश्वरजगतो नश्वरत्वात् तदाश्रयः विनश्वर एव। परंतु भक्तिः तद्विलक्षणा, यतः सा भक्तिः अविनश्वरे परमात्मनि अलौकिकप्रीतिरूपा भवति। लौकिकं व्यवहारम् अनुसृत्य मित्रपुत्रकलत्रादिभिः सह यः स्नेह-प्रेम-श्रद्धादिसंबन्धो भवति स नश्वरो बन्धनकारकश्च। यतो हि तत्मूले मोहस्य काममूलक-ममत्व-बुद्धिसद्भावाद् जीवानां मुक्तिः न लभ्यते। अतः परित्राणाय शास्त्रेषु विविधाः क्लेशबहुला मार्गा आसन्। धर्मानुष्ठानादिषु नियमसंयमसामग्र्यादिनाम् एकत्रकरणेन कर्मक्लेशः, योगे अपि आसन-प्राणायाम-यमादीनां क्लेशः, ज्ञाने च शमदमादीनां क्लेशः विद्यते। शंकराचार्यः *ब्रह्मसूत्रभाष्ये* उपासनां ज्ञानप्राप्तौ महत्त्वरं स्थानं प्रदत्तवान्—महते हि फलाय ब्रह्मोपासनमिष्यते।

*बौद्धदर्शने* चित्तैकाग्यरूपा समाधिः प्रज्ञाया उदयार्थम् आवश्यकरूपेण गण्यते। देवर्षेः नारदस्य पिता प्रजापतिः ब्रह्मा नारदम् आदिष्टवान् यथा हरौ भगवति नृणां भक्तिः भविष्यति संकल्पेन। काम-आसक्ति-सुख-काम-प्रतिष्ठा-वासनादयः सर्वे अस्मान् लोके रज्जुवत् बध्नन्ति। सांसारिकवस्तून् प्रति वैराग्यं भक्त्याः श्रेष्ठं दानं भवति, पाद्यार्घ्य-नैवेद्य-धूप-दीपप्रभृतिभिः देवताभ्यः समर्प्य आहुतिद्वारा देवानां सुखिनं कृत्वा स्वार्थनिर्वहणार्थं प्रयत्नशीलाः भवन्ति भक्ताः। भक्तो हवनेन आत्मत्यागस्य फलस्वरूपं निरपेक्षशान्तिपदं लब्ध्वा ब्रह्मणि स्थितिलाभस्य योग्यो भवति। लभ्यते निरपेक्षशान्तिः ईश्वरप्राप्तिश्च। *नारदभक्तिसूत्रे* भक्त्या महिमाप्रसङ्गेन—

सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतकरा।। (ना.भ.सू. २५)
अन्यस्मात् सौलभ्यं भक्तौ।। (ना.भ.सू. ५८) इति।

भक्तिस्तु वेदान्तार्गता तस्माद् भक्तिः *उपनिषत्श्रीमद्भगवगद्गीताब्रह्मसूत्राणाम्* अवलम्बते। *भगवद्गीतायाम्*—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्। (श्री.भ.गी.५.१२)

ज्ञानसाधनं यमनियमादिकं नीरसं भक्तिसाधनं श्रवणकीर्तनादिकं च सरसम् अस्ति। भक्तिः अतीव सुलभा। 'परमप्रेमरूपा' इत्यनेन ब्रह्मानन्द एव गीयते। मीरावाईस्य श्रीकृष्णं प्रति अनुरागः एव परमप्रेम। भगवदनुग्रहं विना परब्रह्मप्राप्तिः न संभवपरा भवति। तादृशश्चानुग्रहो भक्तिमात्रसाध्यः—

न साधयति मां योगो न साङ्ख्य धर्म एव च।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता।। (श्री.भाग. ११.१४.२०) इति।

अत्र योगो ध्यानयोगः, साङ्ख्यम् अध्यात्मविचारः, धर्मो यज्ञादिः, स्वाध्यायः अध्ययनम्, तपः कृच्छादिः, त्यागः सन्न्यासः, अर्जिताभ्यासेन वृद्धिं गता भक्तिः यथा श्रीकृष्णं साधयति वशीकरोति न तथा योगादय इति। तत्सिद्धं भक्तिः कर्तव्यतारूपेण ग्राह्यते। भक्तेः तात्पर्यम् आश्रयत्वम्। अव्यक्तस्य उपासना निर्गुणनिराकारस्य उपासनायाः कठिनतरा भवति। भक्तियोगः सगुणसाकारः नामरूपादिभ्यः लीला यत्र आस्वाद्यते। यथा श्रीकृष्णनामोच्चारणद्वारा निकुञ्जविहारिमूर्तिं दृष्ट्वा भक्तैः सत्त्वगुणोपेतां लीलाम् आस्वाद्यते। निर्गुणनिराकारस्य साधको ज्ञानी, सगुणसाकारस्य साधको भक्त इत्याख्यायते। साङ्ख्यैः माया इत्यस्य अर्थः प्रकृतिः घोषिता। मायोपहितायां ब्रह्मणि तल्लीलाविग्रहः मायिकः इति। शुद्धस्य इव ब्रह्मणो मायोपहितः लीलाविग्रहो भक्तानुग्रहार्थ इति तदादरः क्रियते।

रामानुजाचार्य-माध्वचार्य-वल्लभाचार्यैः एतत् न स्वीक्रियते भगवतो नारायणस्य निर्गुणनिराकारस्वरूपः अपि अस्ति। तेषां नये नारायणस्य निराकाराभिधा मायारूपा, सगुणरूपमेव वास्तविकम् अस्ति। गीताभाष्ये शंकराचार्य आह— यः सगुणसाकारः तथा यो भगवान् तस्य षडैष्वर्यगुणाः सदा सन्ति, मायाम् आश्रित्य विविधावताराः सन्ति। अतो नारायणपूजा तथा श्रीकृष्णपूजा अनयोः भेदाभावात्। ज्ञानभक्तिभ्याम् आत्मनि प्रबुद्धे सति भगवत्प्रेमलक्षणा आनन्दचिन्मयी रसस्वरूपा सर्वोत्तमा भक्तिः उदेति। *ब्रह्मसंहितायां* श्रीकृष्णः ब्रह्माणं कथितवान्—

> प्रबुद्धे ज्ञानभक्तिभ्यामात्मन्यानन्दचिन्मयी।
> उदेत्यनुत्तमा भक्तिर्भगवत्प्रेमलक्षणा।। (ब्र.सं. ५८) इति।

*श्रीमद्भागवते* अपि भगवान् श्रीकृष्णः उद्धवं कथितवान्— ज्ञानविज्ञानसंपन्नो भज मां भक्तिभावतः— एतेन भज अन्यत् सर्वं त्यज इत्यर्थः आयाति। नारदमहोदयेन प्रोच्यते—

> प्रमाणान्तरस्य अनपेक्षत्वात् स्वयं प्रमाणत्वात् च।।
> शान्तिरूपात् परमानन्दरूपाच्च।। (ना.भ.सू. ५९-६०)

भक्तः स्वयं भक्तिसूखम् अनुभवति। ब्रह्मणो रसस्वरूपस्य आस्वादनमेव सर्वोत्तमम्। माधुर्यसंपन्नः सर्वगुणाकरः अखिलरसामृतसिन्धुः श्रीकृष्णो रसरूपः रसास्वादकश्च। स्वह्लादिनीशक्तेः वृत्तिविशेषः प्रेम, परमरसिकशेखरः कृष्णः आनन्दमयः स्वरूपशक्तेः अन्तर्गतह्लादिनीशक्तेः प्रेमरसास्वादनरूपः अस्ति। कृष्णरतिः भागवती प्रीतिः स्वरूपत आनन्दरूपा— रतिरानन्दरूपैव। (भ.र.सि. २.१. ४)

आनन्दोऽयं चिन्मयानन्दो ब्रह्मानन्दः अपि तत्सकाशे तुच्छीकृतो भवति, आनन्दरूपायाः भक्त्याः आस्वादनेन भक्तिरसः चमत्कृतिं धारयति। श्रीहरिभजनेन यथा पुरुषाणां चित्तं शाम्यति न तथा योगबलेन भवति, अतो भजनस्य प्राधान्यं विद्यते। भक्तिः शान्तिरूपा आनन्दरूपा च। शुद्धस्वरूपे परमेश्वरे सार्वकालिके अनिर्वचनीये प्रेमसंस्थिते सति परमा शान्तिः समुत्पद्यते, एतेन भक्तानां जीवन्मुक्तिः ततःपरं प्रारब्धस्य अपगमे सति देहवियोगाद् विदेहमुक्तिः, अनन्तकालव्यापिनी शान्तिः विराजते। सर्वत्यागे जाते मोक्षप्राप्तिः परंतु मोक्षात् श्रेष्ठं वस्तु भगवत्प्रेम पञ्चमपुरुषार्थरूपेण अभिधीयते। भगवतः सेवया यद्यपि सालोक्यादिमुक्तिचतुष्टयं[9] वर्तते तथापि भक्ताः ग्रहीतुं न इच्छुकाः भवेयुः।

भक्त्या अधिकारी— भक्त्या गरिम्णा भगवतः ऐक्यलाभाद् गोत्रम्, कुलोत्पन्नः, पण्डितः, धनी च इत्यादयः देहानुबन्धि मिथ्या अहंबोधो वा विदूरिताः भवन्ति। भक्तिलाभाय व्याकुलताम्

आन्तरिकेच्छाम् एकनिष्ठाग्रहं शास्त्रजिज्ञासां च विना भक्तिशास्त्रस्य अधिकारी कोऽपि न भवितुमर्हति। नातिसक्तः नातिनिर्विन्न एव अधिकारी। *नारदभक्तिसूत्रे*—

नास्ति तेषु जाति-विद्या-रूप-कुल-धन-क्रियादि-भेदः।। (ना.भ.सू. ७२)

*श्रीमद्भगवद्गीतायाम्*

इदं ते नाऽतपस्काय नाऽभक्ताय कदाचन।
न चाऽशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति।। (श्री.भ.गी.१८.६७)

नारदाचार्येण सर्वसाधारणोपयोगी त्रिंशत्लक्षणसंपन्नः [10] सनातनधर्मः व्याख्यायते। शुकदेवेन श्रीवेदव्यासविरचिते *श्रीमद्भागवतपुराणे* भक्त्याः प्रचारः नारदीय-भक्ति-मार्गोपरि आश्रितः अस्ति। परम्परागतं प्राप्तेषु नारायणीयधर्म-पञ्चरात्रशास्त्र-सात्त्वतधर्म-भागवतधर्मेषु ऐकान्तिकभक्त्या प्रपत्तिनाम्ना च प्रसिद्धः सुन्दरः सरलः परमकल्याणप्रदः मार्गः एव नारदीय-भक्ति-मार्गः, यस्य सर्वव्यापी प्रचारः अस्ति। *श्रीमद्भगवद्गीतायाः* द्वादश अध्याये भगवान् कथितवान् अव्यक्ते ईश्वरे देहिनः मनःनिवेशनं अतीव क्लेशकरं भवति—

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।। (श्री.भ.गी. १२.५)

अव्यक्तधर्मस्य कठिनतया सह व्यक्तोपासनारूपिणः भक्तिमार्गस्य श्रेष्ठता तथा सुलभता *श्रीमद्भगवद्गीतायां* स्पष्टीकृता अस्ति—

राजविद्या राजगुह्यं पवित्रमिदमुत्तमम्।
प्रत्यक्षावगमं धर्मों सुसूखं कर्तुमव्ययम्।। (श्री.भ.गी. ९.२) इति।

उल्लेखपञ्जिः

---

1 नार शब्दस्यार्थः जलं सर्वदा तर्पणकारणात् नारद इति नाम अभवत्।
नारं तत् परमं प्रेम यो ददाति स नारदः। नरस्य धर्म्यं नालं च तदनन्ततृषात्मकम्।
प्रेम अलंरहितं अनन्तव्यासरूपम्, नार- अज्ञानं द- नाशकः स एव नारदः। *भक्तिदर्शनम्*

2 अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम्।।
अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुपत्वं मार्दवं ह्रीरचापलम्।।
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।
भवन्ति संपदं दैवीमभिजातस्य भारत।। श्री.भ.गी. १६.१-३ इति।

3 ऋषिशब्द ऋष्धातोर्निष्पद्यते, सर्वत्र वैखरीद्वारा परातत्त्वं प्राप्तुं ये योग्या आसन् ते ऋषिपदवाच्याः। मुनिदृष्टेषु मन्त्रेषु लयदर्शनं च शोभते, न शक्यं मन्त्रार्थसिद्धिं विना तालमनुवर्तनम्। *मनुस्मृतौ* ऋषीणां महत्त्वं देवानां समकक्षरूपेण गण्यते, ऋषति गच्छति अर्थात् गतिशीलो भवतीति ऋषिः। उच्चैः मनुते जानाति यः स मुनिः।

4 साङ्ख्ययोगविभागज्ञो निर्विवित्सुः सुरासुरान्।
युद्धगान्धर्वसेवी च सर्वत्राप्रतिघस्तथा।।

5 अन्तर्गृहगता काश्चिद्गोप्योऽलब्ध विनिर्गमाः।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः।।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबन्धनाः।। (श्री.भाग. १०.२९.९-११)

6 प्री धातोः प्रकारत्रयेण गणभेदेन प्रेमशब्दो निष्पद्यते— 'प्रीङ् प्रीतौ' दिवादिगणे 'प्रीञ् तर्पणे कान्तौ च' त्र्यादिगणे 'प्रीञ् तर्पणे' च चुरादिगणे।—प्रियस्य भावः प्रेम— परमः प्रेमा रूपा यस्याः सा परमप्रेमरूपा।

7 यज्ञशेषस्यार्थः अमरत्वम्, आख्यायिकायाः शुक्राचार्यकथायामात्मज्ञानस्य आकारेङ्गित-समावेशेन आत्मज्ञानम् अमरत्वमेव। अमृतस्वरूपम् इत्यनेन भक्तिः आत्मज्ञानं च सममेव।— अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते। इति (क.उ.२.३.१४)

8 श्रुतौ पराशरपुत्रत्वमुपजीव्य व्यासस्य स्तुतत्वात्। यदा सर्वसंप्रतिपन्नमहिम्नो वेदव्यासस्यापि स्तुतये पराशरपुत्रत्वमुपजीव्यते तदा किमु वक्तव्यचिन्त्यमहिमा पराशर इति। किंच वाजसनेयिशाखायां वंशब्राह्मणे वेदसंप्रदायप्रवर्त्तकगुरुशिष्यपरम्परायां पराशरस्य पुत्रपौत्रौ श्रुयेते। मैत्रावरुणि-वसिष्ठस्य पौत्रः महर्षिः पराशरः ऋग्वेदादेः मन्त्रद्रष्टा बृहत्पराशरहोराशास्त्र-लघुपाराशरी-पराशरस्मृति- पाराशरीय-वास्तुशास्त्रादिग्रन्थानां च प्रणेता आसीत्।

[9] सालोकसार्ष्टि-सामीप्य-सारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जना:।। (श्री.भाग. ३.२९.१३)

[10] सत्यं दया तप: शौचं तितिक्षेक्षा शमो दम:।
अहिंसा ब्रह्मचर्य स्वाध्याय आर्जवम्।।
संतोष सम्यक्सेवा ग्राम्येहोपरम: शनै:।
नृणां विपर्येहेच्छा मौनमात्मविमर्शनम्।।
अन्नाद्यादे: संविभागो भूतेभ्यश्च यथार्हत:।
तेष्वात्मदेवताबुद्धि: सुतरां नृषु पाण्डव।।
श्रवणं कीर्तनं चास्य स्मरणं महतां गते:।
सेवेज्याऽवनतिर्दास्यं सख्यमात्मसमर्पणम्।।
नृणामयं परो धर्मस्सर्वेषां समुदाहृत:।
त्रिंशल्लक्षणवान् राजन् सर्वात्मा येन तुष्यति।। (श्री.भाग. ७.११.८-१२) इति।

# पञ्चमोऽध्यायः

## सर्वसाधनश्रेष्ठा भक्तिः

भक्तिर्महत्तरा शुद्धा सुसूक्ष्मा शोभना परा।
सच्चिदानन्दरूपा स्याद् भक्तिमुक्तिफलप्रदा।। (अ.सू.२.२६)

# पञ्चमोऽध्यायः

# सर्वसाधनश्रेष्ठा भक्तिः

## १. भक्तियोगस्य महत्त्वम्

### १.१. आध्यात्मिकतायां भक्तियोगः

वैदिकार्याणां धर्मजीवनस्य केन्द्रविन्दुः आसीद् यज्ञः, परंतु क्रमेण केनचित् स्वीकार्यते यागयज्ञे दुःखं न विनश्यति नापि शान्तिः प्राप्यते। अतः एकत उपनिषदो ज्ञानवादिनी ऋषीणां ब्रह्मविद्यामूलका साधना, अपरतः तु भक्तिमार्गानुकूला उपासना परिलक्ष्यते। ब्रह्मविद्या इयं कदापि एकाश्रिता कदापि वा अन्यन्याश्रिता, एतदर्थं ब्रह्मविद्यायाः आनुषङ्गिकरूपेणैव सनातनधर्मे प्रेममूलको भक्तिधर्म आरभ्यते। त्याग-बलिदान-प्रज्ञा-सन्तोष-मननचिन्तनाद्याध्यात्मिकमूल्यानां द्योतकशब्दाः भक्तिसूत्रेषु प्राप्यन्ते। भक्तिस्तु उपासनायाः प्राणः, नापि भक्तिं विना यज्ञादिकर्म अनुष्ठातुं शक्यते। *शाण्डिल्यभक्तिसूत्रे*—जीव-ईश्वरयोः एकता विनिगद्यते— पराभक्त्या जीवानाम् उपाधिबुद्धिहाने सति पुनः एकत्वमेव अवशिष्यते। *शाण्डिल्यभक्तिसूत्रे* आध्यात्मिकतायाः[1] प्राचुर्यम् अस्ति। सुप्राचीन-भारतीयानाम् आध्यात्मिकजगतः सर्वश्रेष्ठसम्पद् प्रणवब्रह्म तथा ब्रह्मगायत्री[2] आसीत्। विश्वविराट्स्वरूपो मुख्यतः परमात्मनः स्वरूपं भवति। श्रुतिरपि स्वरूपावस्थानं मोक्षप्रदत्वेन अङ्गीक्रियते। परमज्योतौ उपनीतवशात् जीवः स्वीयस्वाभाविकस्वरूपम् आयाति। स्वरूपावस्थानं तथा मोक्षः एकमेव तत्त्वम् अस्ति।

सूर्यः चन्द्रः जीवः पञ्चमहाभूतानि च विराट्स्वरूपस्य अष्टौ अङ्गाः सन्ति। जीवेश्वरयोः एकता अस्ति परंतु जीवस्य बहुत्वं तथा ईश्वरस्य एकत्वं च उपाधिना पृथक् क्रियते। शाण्डिल्यमते पराभक्ति-ब्रह्मज्ञानयोः ऐक्यं वर्तते –

> तदैक्यं नानात्वैकत्वमुपाधियोगहानादादित्यवत्। (शा.भ.सू. ३.२. १)
> पृथगिति चेन्न परेणासम्बन्धात् प्रकाशानाम्। (शा.भ.सू. ३.२.२)

जीवः अल्पज्ञः ईश्वरश्च सर्वज्ञः उपाधिवशात् परंतु तत्त्वतः अनयोः अभेदो वर्तते। सुखदुःखादिकम् अन्तःकरणस्य स्वभावः, अतः न आत्मनः सुषुप्त्यवस्थायां सुखदुःखादिकम् अनुभूयते। आत्मा तपसा पवित्रायते, तपो हि विशुद्धसाधनं, अध्यात्मशक्तेः विकाशत्वात् शुद्धचेतसि तत्त्वज्ञानम् अभिजायते। धर्मसाधनं तत्त्वज्ञानेन अपि भवति। आध्यात्मिक-आधिभौतिक-आधिदैविक-दुःखत्रयस्य निवृत्यर्थं तत्त्वज्ञानेन प्रयोजनम् अस्ति, अतः तत्त्वज्ञानमेव एकमात्रध्येयं सर्वश्रेष्ठम् उद्देश्यम्

अस्ति। धर्मसाधनेन तथा तत्त्वज्ञानप्राप्तिवशाद् अनिर्वचनीयं महासुखं परमानन्दः अवाप्यते। आरण्यके ज्ञानयोगस्य तथा अध्यात्मविद्याया यः सूत्रपात उपनिषद एव तस्य पराकाष्ठा इति विनिगद्यते। *महाभारते* मोक्षधर्माध्याये लिखितम् अस्ति यत्—जीवः कर्मणा बध्यते ज्ञानेन च मुच्यते। *बृहदारण्यकोपनिषदि*—

> तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः।
> नानुध्यायाद्बहूञ्छब्दान् वाचो विग्लापनं हि तदिति।। (बृ.उ. ४.४.२१)

भक्ताः तीर्थानि पवित्रीकुर्वन्ति एतेन तीर्थानां माहात्म्यं वर्धन्ते, अतः भक्त्यर्थं तीर्थमाहात्यम्[3] आवश्यिकरूपेण गण्यते, यो मनुष्यः शतैरपि योजनानां गङ्गा गङ्गा इति ब्रूते स सर्वपापेभ्यो विमुच्य विष्णुलोकं गच्छति। हरिनिष्ठप्रीतेः भक्तिः, हरिः भक्तिम् अभिलषति। *नारदभक्तिसूत्रे*—

> तीर्थीकुर्वन्ति तीर्थानि, सुकर्मीकुर्वन्ति कर्माणि, सच्छास्त्रीकुर्वन्ति शास्त्राणि।
> (ना.भ.सू. ६९) इति।

ध्यानयोगेन भगवतः देवीशक्तिः दृश्यते, *श्वेताश्वतरोपनिषदि*—

> ये ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम्। इति।

स्वामीविवेकानन्देन उच्यते religion begins from tremendous dissatisfaction within present state of affairs.... संसारे विरक्तिः असन्तोष एव मानवान् धर्मे चालयति। रामकृष्णो जिज्ञासुः ज्ञानी सांसारिक-वैराग्यवशाद् ईश्वरस्वरूपम् अनुभूय परमात्मनि एकीभूतः अभूत्। गीतायाः भाष्ये आद्यन्तं शंकराचार्येण साङ्ख्ययोग-कर्मयोगयोः व्याख्या प्राप्ता। आचार्याणां मते भक्तियोगः कर्मयोगे अन्तर्भवति। अद्वैतज्ञानं यथा मनोवृत्तिरूपं तद्वदुपासना अपि तथैव च। अद्वैतं अज्ञानभेदज्ञानस्य निवर्तकम् उपासना तु चित्तवृत्तेः एकाकारप्रवाहः यत्र ध्येयविषयभिन्नम् इतरविषकं ज्ञानं न उत्पद्यते। उपासना सत्त्वगुणवर्धनहेतुत्वात् तत्त्वप्रकाशका भवति। इयम् उपासना तत्त्वज्ञानलाभस्य सहायका सुखबोध्या भवति। ॐ तत् सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः।

ननु कोऽसौ भगवान् येन भक्तिः आद्रियते। तथा हि— यः असौ सर्वस्य वशी सर्वस्येशान सर्वमिदं प्रशस्ति, यः सर्वज्ञः सर्ववित्, यो ब्रह्माणं विदधाति पूर्वम्, अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः, यो रुद्रो विश्वा भुवनानि विवेश—इत्यादिवाक्येषु पुरुषसुक्ते विष्णुसुक्ते रुद्रानुवाके अन्तर्यामिब्राह्मणादौ अष्टादशपुराणेषु पञ्चरात्राद्यागमेषु च नारायणस्य स्वरूपो निरूप्यते। बालगोपाल एव परमेश्वर इति सर्वजनप्रसिद्धः अस्ति। केषुचित् *लिङ्गपुराणादिषु* रुद्रः एव जगदीश्वरो

*विष्णुपुराणादिषु* विष्णुः *देवीपुराणादिषु* च देवी जगदीश्वरत्वेन निरूप्यते। न च जगदीश्वरा बहवः संभवन्ति। न च कस्यचित् पुराणस्य अप्रामाण्यम् अस्ति। अत्र तार्किकाः समादधते—एक एव जगदीश्वरः तत्लीलाविग्रहैः उपहितो रुद्रविष्ण्वादिशब्दैः व्यपदिश्यते। रुद्रस्य आराधनविशेषतया विष्णोः अपकर्षवचनं *लिङ्गपुराणादिषु* तथा विष्णोः आराधनविशेषतया रुद्रस्य अपकर्षवचनं *विष्णुपुराणादिषु* वर्तते। आनुकूल्येन कृष्णानुशीलनं भक्तिः उत्तमा भक्त्या स्वरूपलक्षणरूपेण गण्यते। अन्याभिलाषिता शून्या ज्ञानकर्माद्या न आवृता इति भक्त्याः तटस्थलक्षणम्। शुद्धाभक्ति सा भक्तिः परमा शुद्धा कृष्णदास्यप्रदा च।

तावत कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथा श्रवणदौ वा श्रद्धा यावन्न जायते।। ( श्री.भाग. ११.२०.९)

भक्तिः भक्तसापेक्षा—

न तथा मे प्रियतम आत्मयोनिर्न शंकरः।
न च संकर्षणो न श्रीर्नैवात्मा च यथा भवान्।। (श्री.भाग. ११.१४.१५)

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम्।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः।। (श्री.भाग. ११.१४.१६) इति।

अतः श्रीकृष्णः उद्धवम् उक्तवान् मम भक्तो मम यादृशः प्रियः तत्सदृशः कोऽपि न मे भवितुम् अर्हति। अहं सदा भक्तान् अनुब्रजामि। शाण्डिल्यमतेन प्रथमतः ब्रह्मज्ञानं पश्चात् भक्तिः उदेति –

प्रागुक्तं च। (शा.भ.सू. १.२.७)

प्रश्ननिरूपणाभ्याम् अपि भक्तस्य श्रेष्ठता ध्वन्यते। भक्तचित्तं भगवति निविष्टे सति भगवतो रसास्वादनाद् भक्तहृदये परमानन्दज्योतिः उदेति। ईश्वरो भावगम्यः भावस्तु शब्दव्यक्तः, तस्मात् कार्यब्रह्म नामरूपात्मकम् अस्ति। यत्र भावः अस्ति तत्र रूपः अपि वर्तते, अपि च भावे सति शब्दः अपि भवितव्यः। भावाद् रूपं शब्दात् च नाम प्राकट्यते। वाग्मनबुद्ध्यातीते सत्यपि भावुकः साधकः केवलं भावेन भगवन्तं साक्षात्करोति। भावेन लभ्यते सर्वं भावेन देवदर्शनं भावेन परमं ज्ञानं लभ्यते भावाधीनम् इदं जगद्, भावं विना न जायते सिद्धिः तस्माद्भावावलम्बनस्य गुरुत्वं विधीयते। निखिलशास्त्राणाम् अध्ययनतो मुख्यफलरूपेण श्रीभगवद्भक्तेः एव अवश्यकर्तव्यता विद्यते। वासुदेवपरा वेदा वासुदेवपरा समाख्या इत्यादि—भगवान् ब्रह्म कार्तस्न्येन इत्यादि। तथा च श्रीभगवद्भक्त्याः आवावश्यकता *पद्मपुराणस्य बृहत्सहस्रनामस्त्रोत्रे* सुस्पष्टरूपेण उल्लिख्यते—

स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्।

वैष्णवागमे वासुदेवः ब्रह्म। *श्रीमद्भगवद्गीतायाम्*—

वासुदेवस्सर्वमिति स महात्मा सुदुर्लभ:।।

मधुसूदनसरस्वतीमहोदयेन *भक्तिरसायने* निगद्यते—

वासुदेवातिरिक्तं सर्वं सत्यन्नस्ति मादिकत्वात्।
वासुदेव एवात्मत्वात् प्रियतमस्सत्य इत्यर्थ:।। इति।

*विष्णुपुराणे* वासुदेवशब्दस्य व्याख्यानसमये उच्यते—यः सर्वत्र वसति, सर्ववस्तुनि च यत्र निवसन्ति स विद्वद्भिः वासुदेव इति कथ्यते—सर्वत्रासौ समस्तं च वसत्यत्रेति वै यत:। तत: स वासुदेवेति विद्धद्यि: परिपट्यते।। भगवान् श्रीकृष्णः कीर्तिप्रियः आसीत्, तस्य नामजपादिकं तन्मयतासिद्ध्यर्थं, सेवा आचारशुद्ध्यर्थं व्यवह्रियते, स्तुतिश्च मनसः प्रसन्नाय क्रियते। पूजया भक्त्या अविच्छेद्यः संबन्धः अस्ति, पराभक्त्या भगवतः आराधनयाः मनोवाक्कायकर्मभिः साधकः सर्वं दुःखम् अतिक्राम्यति, अत एव सः भक्त इत्युच्यते।

भजनात् परया भक्त्या मनोवाक्कायकर्मभि:।
तरत्यखिलं दु:खानि तस्माद्भक्त इतीरित:।। (श्री.भ.गी. १७.२९) इति।

भगवन्तं प्रति अपारम् अनुराग एव भक्तिः। भक्तिमार्गस्य शर्तत्रयम् उपलभ्यते—

प्रथमशर्तम् आर्तित्वम्—ईश्वरं प्रति गभीरार्तिः।
द्वितीयशर्तम्— शक्तत्वं भक्त्याः अनुशीलनाय अर्हत्वम्।
तृतीयशर्तम्—पर्युदस्तत्वं सुविधा च।

रूपरसगन्धस्पर्शशब्देभ्यो भगवतो लीलामाधुर्यम् आस्वाद्यते, लीलास्वादनम् एव भक्तेः मूलम्। आत्माव्यतिरिक्तम् अखिलं नश्वरं ज्ञानमार्गे, भक्तिमार्गे तु सर्वं खलु भगवतो रूपम् भवति। आमित्वनाशः तथा अहंकारनाश एव मार्गद्वयस्य सादृश्यं दर्शयति। भक्तो भगवन्तं विना किमपि अन्यत् न पश्यति, अस्यां भक्त्यां सविकल्पसमाधिरेव विद्यते। ईश्वरः सर्वशक्तिमान्, ईश्वराशीर्वादवशाद् भक्तो ज्ञानी अपि भवितुम् अर्हति, भक्तिमार्गे भक्तिज्ञानयोः समवेतत्वात्। वयं कलावत् अन्नगतप्राणा अतो ज्ञानमार्गाणाम् अनुशीलनं दुःसाध्यम् अस्ति अस्माकं कृते।

## १.२. विविधसाधनमार्गेषु भक्तिमार्गः

*श्रीमद्भगवद्गीताया*ं भक्त्या सह योगस्य अन्तर्भावः प्रतिपाद्यते, मधुसूदनसरस्वती आह—साधनमार्गा सर्वे योगेनिहिताः सन्ति।

> कर्मयोगोऽष्टाङ्ग योगो ज्ञानयोगो भक्तियोग इति चत्वार: प्रमर्थत्वेन प्रसिद्धा: योगा:।। इति।

*योगदर्शने* अष्टाङ्गयोगेषु नियम इति अङ्गेन व्यक्तिगतनैतिकता प्रदर्श्यते। शौच-सन्तोष-तप-स्वाध्याय-ईश्वरप्रणिधानि इत्यत्र ईश्वरो न मूख्यरूपेण ध्वन्यते। क्लेश-कर्म-विपाक-आशयैः अपरामृष्टः पुरुषविशेष ईश्वरः, जीवानां कर्मफलानुसारं जगद् ईश्वरेण निर्मीयते। कर्म ज्ञानं भक्तिः तथा योगः भगवत्प्राप्तेः साधनानि भवन्ति, भक्तिस्तु साधनचतुष्टयेषु श्रेष्ठा भवति। भक्त्यां स्त्री-पुरुष-ब्राह्मण-शूद्राणां समेषां समः अधिकारो वर्तते। वेदस्य परभागो ब्रह्मकाण्डो भक्तये, अपि च ज्ञानकाण्डवर्णनं सामान्यतः पूर्वमेव आलोच्यते। यदि ज्ञानस्य उत्कृष्टता परिलक्ष्यते तर्हि श्रुतिषु ज्ञानकाण्डस्य पूर्वं भक्तिचर्या न दृश्यते। व्यासदेवेन *श्रीमद्भागवत्पुराणे* योगस्य भेदत्रयम् अङ्गीक्रियते, तेषु एतत् त्रयम्—कर्म ज्ञानं भक्तिश्च।

> योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया।
> ज्ञानं कर्म च भक्तिश्च नोपायोऽस्ति कुत्रचित्।। (श्री.भाग. ११.२०. ६) इति।

भक्तिः एकः योगः[4]। *श्रीमद्भगवद्गीतायां* यत्र प्राप्यते—

> एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु। ( श्री.भ.गी. २. ३९) इति।

इत्यत्र साङ्ख्ययोगो बुद्धियोगः च लभ्येते, बुद्धियोगः कर्मयोगे एव रूपान्तरितो भवति। साङ्ख्यस्य मूलम् एकत्वबोधो योगस्य मूलं द्वैतबोधश्च। मधुसूदन-सरस्वती कर्मयोगस्य भक्त्यां सार्थकताविषये उक्तवान्, एवमेव वक्तुम् शक्यते कर्मयोगः अन्तःकरणं शुद्धं करोति निर्वेदस्य कृते च सहायकम् अपि भवति।

> कर्मयोगोऽन्त:करणशुद्धिसाधनत्वेन तावत्पर्यन्तमनुष्ठेय:। इति।

अतः सकलं कर्मादिकं कर्तुम् असमर्थानां मनुष्याणां मनसः प्रसादाय चित्तप्रशान्तये परमानन्दप्राप्तये च समाधिसुखस्य इव ज्ञान-कर्म-भक्तीनां भक्तिसुखस्य अपि स्वतन्त्रपुरुषार्थत्वाद् भक्तियोगः अपि

परमपुरुषार्थरूपेण अभिप्रेतो भवति। अत एव जीवनमुक्तानां ज्ञानिनामपि भक्त्या आवश्यकताविषये प्रतिपादिता *श्रीमद्भागवते*—

> आत्मारामाश्च मुनयो निर्ग्रन्था अप्युरुक्रमे।
> कुर्वन्त्यहैतुकीं भक्तिमित्थंभूतगुणो हरिः।। (श्री.भाग. १.७.१०) इति।

भक्त्या भक्तो आराध्यम् ईश्वरं प्रति यावत् पुलकिताङ्गो द्रवीभूतहृदयो विगलितानन्दाश्रुः च न भवति तावदान्तरिकीं पवित्रतां न आसादयति। यदा समाधिद्वारेण चेतसः समताधिगमात् मानसिको भावो विषयेभ्यः समूलम् अपहरति, तदा भगवद्भक्त्या साकं परमानन्दस्य संबन्धसत्त्वात् पापराशिः प्रणश्यति। तदनन्तरं यथा अग्निना सुवर्णं निर्मलं सत् स्वकीयं स्वाभाविकं स्वरूपं प्रतिपद्यते, तथा जीवः अपि भगवद्भक्त्या गलितः अमलिनसंस्कारः सन् नैजं स्वाभाविकं स्वरूपम् आसाद्य शाश्वतीं शान्तिम् अनुभवति।

*श्रीमद्भगवद्गीतायाम्* उच्यते तपस्विभ्यः अधिको योगी, ज्ञानिभ्यः अपि अधिको योगी, कर्मिभ्यश्चाधिको योगी। अतः अर्जुनः त्वं योगी भव इति श्रीकृष्णस्य कथनम् अस्ति। नारदाचार्येण भावद्योतकं सूत्रं ग्रथितम्—

> सा तु कर्मज्ञानयोगिभ्योप्यधिकतरा। (ना.भ.सू. १५)

ये ज्ञानमार्गे विचरन्ति ते अहम् ईश्वरः अथवा ब्रह्म इत्यनेन ईश्वरेण सहितम् अभेदभावनया ते ज्ञानिनः स्थलनपतनाभ्याम् ईश्वरस्य अनुग्रहलाभार्थं न सचेष्टन्ते परंतु भक्तिमार्गे साधकः स्वं श्रीहरेः दासः—श्रीहरेः अनुग्रहेण एव सर्वं भवितव्यम्—श्रीहरिः एव स्वस्य प्रभुः इति चिन्तयति। ये कर्ममार्गे विचरन्ति ते सकामिनः, तस्मात् कर्मिणां हृदयेषु परश्रीकातरतायां पूर्णवशाद् यदि कः अपि कर्मसाधनेन उन्नतिलाभार्थं चेष्टते तर्हि तान् प्रति विविधा बाधा उत्पद्यन्ते। *भगवद्गीतायाम्* उच्यते— अहंकार विमूढात्मा कर्ताहमिति मन्यते। (श्री.भ.गी. ३.२७) इति। श्रीनारद उवाच—

> भक्तियोगस्तु निर्विघ्नो योगमार्गाद्द्विजोत्तमाः।
> यतो विष्णुसनाथस्य दुर्ज्जयं नास्ति कञ्चन।। (ह.भ.सु. २०.१) इति।

भक्तिपथे ये विचरन्ति ते स्वस्वार्थं न अवलोक्य श्रीहरिं भजन्ते, तान् भक्तिसाधकान् प्रति सदैव करुणामयस्य सहृदयदृष्टिः तिष्ठति, फलतो भक्तिमार्गः सर्वथा अकुतोभयो मङ्गलस्वरूपः अस्ति। ज्ञानमार्गो यथा असहायतादोषेण दुष्टः कर्ममार्गः च यथा परश्रीकातरतादोषेण दुष्टः परंतु भक्तिमार्गः दोषद्वयरहितो भवति। यतो यस्मिन् शास्त्रे वर्णाश्रमाचारादिकं दान-व्रत-तपस्या-होम-जप-स्वाध्याय-

इन्द्रियसंयमैः विधीयते तस्यापि अनुपमचरितं फलं भक्तिः एव गण्यते। दानादिभिः श्रीकृष्णाय समर्पणं विधीयते। *विष्णुपुराणे* हिरण्यकशिपु-रावणयोः परमेश्वरविरोधात्, चैद्यस्य कृष्णसायुज्यप्रस्तावे चैद्यस्यैव कथं मुक्तिरिति प्रश्ने द्वेषेण निरन्तरं श्रीकृष्णस्य तु अहंकारयुक्तं नामकीर्तनमेव तत्फलम् अभिव्यज्यते। भगवति चित्तानुरागात् च भगवतो गुणगानस्य कर्तव्यता श्रोतव्यता च विज्ञायते।

अपि च भक्तिरसप्राबाल्येन जनानां मनसि पूजास्थाननिर्माणस्य आकुलता जागर्ति यत्र वास्तुकारस्य क्रान्तिकारिपरिवर्तनद्वारा अनिर्वचनीयरूपेण सुन्दरशिल्पकला उद्भूतवती। यथा भक्तिप्रवृत्तिं वर्धितवान् तथैव संपूर्णे भारते अनेकानि मन्दिराणि देवविग्रहाः शिल्पानां सौन्दर्यं च अलङ्कृतानि सन्ति अपरपक्षे भारतवर्षस्य चित्रकला प्रस्तूयते स्म। त्रयोदशशताब्ध्यां उडीसादेशस्य कोरानकनगरे निर्मितं सूर्यमन्दिरम्, एकादशशताब्ध्यां तामिलनाडुराज्ये निर्मितं गोपुरमहेश्वरमन्दिरम्, त्रयोदश-शताब्ध्यां तामिलनाडुराज्ये निर्मितं ऐरावतेश्वरमन्दिरम्, पश्चिमबङ्गस्य बरानगरे भुवनेश्वरमन्दिरम्, नवमशताब्ध्यां उत्तरप्रदेशराज्ये बद्रीनाथमन्दिरम् च मन्दिराणां स्थापत्यकला चित्रकला च अतीव प्रभावशालिनी अस्ति तथा तादृशी कला भक्तिभावावेगम् आश्रित्य साकारमूर्तिं प्रति भक्तान् प्रेरयति, एषा वस्तुतो वैधीभक्तिं दर्शयति।

अतो भक्त ईश्वरस्य ऐश्वर्येण न विमूढो भवति। येन ज्ञानेन भक्तो भगवन्तम् अभिजानाति न तत् पूर्णाङ्गभूतम्, कारणं ज्ञानेन भगवतो भगवत्तां प्रत्यक्षीक्रियते न तु रसवत्ताम्। रसरूपता एव भगवतो यथार्थस्वरूपा भगवतः प्रेममयरूपा वा, इमां रसरूपताम् अवगतां विना ईश्वरं यथार्थरूपेण न ज्ञायते। इदं रसस्वरूपम् अविमिश्रभावेन परमशुद्धभक्त्या ज्ञायते। परममधुरा ईश्वरोपासना तदा एव संभवपरा भवति यदा भगवतः माधुर्यमयीं सत्तां रूपसीमया ग्राह्यते। युगे युगे भक्तसाधारणः निरूपाधिकप्रीत्या असीमं ससीमं कृत्वा, रूपहीनं रूपान्वितं कृत्वा निरूपाधिकं सोपधिकं कृत्वा स्तौति। ईश्वर एकाधारेण असीमः ससीमः रूपातीतः रूपान्वितश्च।

> स एव विग्रहव्यापी परिच्छिन्नः स एव हि।
> एकस्यैवैकदा चास्य द्विरूपत्वं विराजितः।। इति।

अखिलकर्म यज्ञे एव रूपान्तरितं भवति, भगवान् अपि कर्म करोति आनन्दप्राचुर्य्यात् न तु अभावात्, भगवतः कर्तव्यं त्रिषु लोकेषु किंचन, कर्माणि न मां लिप्यन्ति न में कर्मफले स्पृहा, कर्मभिः न मां बध्यते— इत्येव गीतायाः कर्मसिद्धान्तः अस्ति। यस्मिन् कस्मिन् अपि ज्ञानस्य पूर्णताप्राप्तिरेव भगवत्प्राप्तिः, पूर्णपवित्रताप्रापनम् एव भगवत्प्रेम तदेव पूर्णरूपेण विश्वसनीयम् अस्ति।

> Any knowledge raised to the power infinity is the knowledge of God; any love raised to the power infinity is the love of God; any activity done in the perfect way is the real jñāna of Para-Sadhana.

### **१.३. भक्तिसूत्रेषु भक्तियोगः सर्वोत्तमः**

तथा हि सृष्टेः क्रमः वर्णितः अस्ति व्युत्क्रमाद्। भक्तिसाधनेषु विषयत्याग-सङ्गत्यागयोः उपस्थितिः विद्यते।

> त्यागे कर्मफलत्यागोऽपि वर्तते। (ना.भ.सू. ६५)
> योे विविक्तस्थानं सेवते, यो लोकबन्धमुन्मूलयति,
> निस्त्रैगुण्यो भवति, योगक्षेमं त्यजति।
> यः कर्मफलं त्यजति, कर्माणि संन्यस्यति, ततो निर्द्वन्द्वो भवति। (ना.भ.सू. ४७-४८)

महर्षिः शाण्डिल्यः उक्तवान्— कर्मिज्ञानियोगिभ्यः कोऽपि श्रेष्ठः भवितुम् अर्हति परंतु श्रेष्ठतमः भक्तः एव भवति। यद्यपि पूर्णकामः आप्तकामः आत्मारामः परमनिष्कामो भगवान् परमस्वतन्त्रः तथापि भक्तप्रेम्णि पराधीनता भगवतः स्वभावरूपेण गण्यते। *नारदभक्तिसूत्रे*—तस्मिन् तज्जने भेदाभावात्। भगवत्संमिलनस्य उत्कटोत्कण्ठा जन्मजन्मान्तरस्य युगयुगान्तरस्य च पुण्यपुञ्जेन प्राप्तिः संभवा। *बृहदारण्यकोपनिषदि*—

> तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन। (बृ.उ. ४.४.२२) इति।

षाड्गुण्यात् परमात्मा प्राकृतिकगुणचिद्गुणात्मकस्वरूपाद् विरोहितो भूत्वा निरन्तरं सगुण एव तिष्ठति। ज्ञानं परमात्मनः स्वरूपम् अस्ति। भक्तिसूत्रेषु नारदपञ्चरात्ररचनाकारस्य नारदस्य वैचारिकदृष्टौ भेदः प्रतीयते कारणं नारदस्य *भक्तिसूत्रे* वेदान् प्रति अतीव श्रद्धा न अभिव्यज्यते—

> वेदानपि संन्यस्यति केवलमविच्छिन्नानुरागं लभते। (ना.भ.सू. ५९)

*शाण्डिल्यभक्तिसूत्रे*—

> तदेव कर्मज्ञानयोगिभ्यः आधिक्यशब्दात्। ( शा.भ.सू. २२)

इत्यत्र भक्त्याः आधिक्यशब्दः तस्या उत्कर्षं दर्शयति। साधनायाः विविधमार्गेषु ज्ञान-योग-कर्म-तपस्या-उपासनादयः वर्तन्ते। भक्तिसाधनायां कर्म-ज्ञान-योगादयः गौणरूपेण स्वीक्रियते। ज्ञानकर्मणोः

पृथकसत्ताया विद्यमाने अपि ज्ञानं कर्मणः परिपक्वफलम्, परस्परं परस्परस्य परिपूरकम् अस्ति। विषयासक्तग्रस्तं मनः कर्मफलात् न मुच्यते। आसक्ते मनसि प्रकृतं तत्त्वज्ञानं न उदेति। आत्मतत्त्वज्ञानाय निष्कामकर्मोपदेशस्य दार्शनिकविवेचनम् अस्ति। कर्मत्यागे सति सन्न्यासावलम्बनं केवलं कष्टसाध्यम् अस्ति। सत्याचरणे अन्तःकरणस्य संयम आवश्यिकः, आत्मा एव संयमसाधनाय कारणं भवति। कर्तव्यज्ञानेन कर्मकरणं तथा अकर्तव्यज्ञानेन कर्मवर्जनं तथा निष्कामत्वं परमधर्मत्वेन समीहते। कर्मयोगः कर्मकरणे नियोजयति, ज्ञानयोगः कर्मत्यागे नियोजयति साङ्ख्ययोगः तथैव च। आसक्तित्यागो यज्ञार्थानुष्ठानम् ईश्वरार्पणबुद्धिः एतत् त्रयं कर्मयज्ञस्य लक्षणम्। संपृक्तभावात् काम्यकर्मणा वैचारिकविश्लेषणम् अस्माकं मननं समृद्धीकरोति। धर्मसाधने स्वकर्तृत्वाभिमानं नास्ति, कर्तव्यकर्मबोध एव प्रकृतधर्मबोधः।

*श्रीमद्भगवद्गीतायां* मार्गत्रयेषु भक्तिमार्गस्य श्रेष्ठत्वं प्रदर्शितम्। भगवद्भक्तयोः संबन्धः प्रेमरूपः अस्ति, कर्मकाण्डप्रधान-वेदाधारितसंस्कारानुसारिभिः वेदान्तसंबलित-ज्ञानानुयायिभिः च भक्तः श्रेष्ठः। नारदः प्रोक्तवान्— भक्त्यां निरोधः आवश्यकः अर्थात् लोकिकाचारादीनां तथा वैदिकानुशासनादीनां च त्यागः आवश्यकः अस्ति—

निरोधस्तु लोकवेदव्यापारन्यासः।

भगवतः मायया जीवः बद्धो भवति भगवत्कृपया च मुक्तो भवति। भगवतः कृपाप्राप्तये चतुर्विधसाधनम् अस्ति— जपः हवनः ध्यानं पूजा च। शंकराचार्येण ब्रह्मसूत्रभाष्येषु (२-२-४२,४३) भागवतमतं खण्डितम्, अतः भागवतमतेन अद्वैतवादस्य भिन्नत्वं प्रतिपाद्यते, *छान्दोग्योपनिषदि* नारदमुनिः ऋषिं सनत्कुमारम् अवदत्— मया वेदवेदाङ्गेतिहासपुराणादीन् पठितं परंतु आत्मतत्त्वानुभूतिः न भूयात्—इत्यत्र वेदः न विरोधी, आत्मज्ञानस्य महिमानं प्रतिपादयति। तद्वत् शाण्डिल्यस्य भक्तिसूत्रं न वेदविरोधी, भक्तिशास्त्रस्य महिमानमेव उद्घाटयति। श्रीकृष्णः *श्रीमद्भगवद्गीतायां* अर्जुनं प्रोक्तवान्—

त्रैगुण्यविषया वेदा निरत्रैगुण्य भवार्जुन—किम् एतत् वचनं वेदविरूद्धमस्ति?

ज्ञानात् सत्त्वगुणः ऐश्वर्याद् रजोगुणः शक्तितः तमोगुणश्च इति *लक्ष्मीतन्त्रे* प्राप्यते। जडप्रकृतेः त्रिविधक्रियाप्रतिक्रियाप्रभावात् जडजगतः सर्वाणि कार्याणि सिध्यन्ति। भगवतः श्रीकृष्णस्य प्रियसखाशिष्यत्वेन अर्जुनः उपदिष्टः—*वेदान्तदर्शनस्य* सारं गृहीत्वा पराप्रकृतिं धारयितुम् अत्र उपदेशः प्रदीयते। वेदस्य कर्मकाण्डे जागतिक-कामतृप्ति-संबद्धानां कार्याणां समाप्तेः अनन्तरम् उपनिषदा भगवद्तत्त्वं निर्देशितम् अस्ति। यथा उपनिषदि वेदानां मर्मार्थो विद्यते तथैव *श्रीमद्भगवद्गीता*

*महाभारतस्य* भागः अस्ति। सुपक्वभक्त्या कालेन योगी वैष्णवो भवेत्। *महाभारते गीतायां श्रीमद्भागवते विष्णुपुराणादौ* च सदाचारस्य अतीव महत्त्वं प्रदीयते, वैष्णवानां कृते निर्धारितेन आचारसंहितामाध्यमेन चर्यापदं वैष्णवागमस्य योगपादं च द्वयोः महत्त्वम् अधिकं वर्तते। इन्द्रियाणि संयम्य जीवनयापनं भक्तिसाधनायाः प्रथमः नियमो वर्तते। भक्तिसूत्रकारेण नारदाचार्येण –

> तदर्पिताखिलाचारः सन् कामक्रोधाभिमानादिकं तस्मिन्नेव करणीयम्। (ना.भ.सू. ६५)
>
> अहिंसा-सत्य-शौच-दयास्तिक्यादि-चरित्र्याणि परिपालनीयानि। ( ना.भ.सू. ७८)

*नारदभक्तिसूत्रे* प्रेमभक्त्याः प्राचुर्यं परिलक्ष्यते— *श्रीमद्भागवते* उच्यते भक्त्या उत्पत्तिः द्राविडदेशे, इदानींतनकाले दक्षिणवङ्गे। अत एव महामुनिना कपिलेन स्वमातरं देवाहूतिं प्रति *श्रीमद्भागवते* भक्तेः महिमानं वर्णनावसरे सा भक्तिः ज्ञानकर्मणोः अपेक्षया श्रेष्ठरूपेण प्रतिपादिता अस्ति। देवर्षिणा नारदेन अपि ज्ञानवैराग्ययोः भक्तेः सन्तानत्वं समर्थयता व्रत-तपो-यज्ञादिभ्योः भक्तिः श्रेयसी कथ्यते। *शाण्डिल्यभक्तिसूत्रे नारदभक्तिसूत्रे* च *श्रीमद्भागवतमहापुराणस्य* अनुसारं ज्ञान-कर्म-योगेभ्यो भक्तिः श्रेयसी अभिमता। साधकः स्वाध्यायाद् उत्पन्नसदाचारस्य सौन्दर्यस्य मननस्य निदिध्यासनस्य च अन्तिमं लक्ष्यकेन्द्रं भगवन्तम् एव मन्यमानः परोपकारकार्येषु कलाकारकृतिषु दर्शनचिन्तनेषु आदर्शबलिदानेषु देशभक्तौ समाजसेवायां च प्रभुमेव पश्यन् तदुपासको भवति। वल्लभाचार्येण *ब्रह्मसूत्रस्य अनुभाष्ये* ज्ञानमार्गः तथा भक्तिमार्ग भिन्नरूपेण अभिधीयते। ज्ञानमार्गस्य फलं केवलम् अक्षरब्रह्मणः स्वरूपज्ञानं ततश्च मोक्षः परंतु भक्तेः फलं पुरुषोत्तमे प्रवेशः। भक्तिमार्गो ज्ञाननिरपेक्षकः परंतु प्रेमभक्त्या समुत्पन्नस्य पुरुषोत्तमस्य ज्ञानं तत्लीलाप्रवेशाय साधकम् अस्ति।

## २. दार्शनिकनयेन वैष्णवभक्तिः

भारतीयदर्शनस्य इतिहासः वस्तुतः वैदिक-उपनिषदिक-उत्तरवैदिकेषु युगत्रयेषु विभज्यते यत् दार्शनिकचिन्ताविकासस्य प्रतिनिधित्वं करोति। वैदिकदर्शनं मूलतः *ऋग्वेदसंहितायां* निहितं दार्शनिकचिन्तनं यत् तु उपनिषद्भिः अनुवर्तते। अतःपरम् उपनिषदिकदर्शनं परमात्माविषयकम् आध्यात्मिकचिन्तनं निर्दिशति। वेदोत्तरकालीनदर्शनं व्यवस्थितकालः इति कथ्यते यस्मिन् बौद्धजैनदर्शनाभ्यां षड् आस्तिकदर्शनानां विकासः परिलक्ष्यते। बौद्धजैनाभ्याम् ईश्वरे अस्वीकृते सत्यपि संस्थापकानां व्यक्तित्वम् ईश्वरस्य अस्तित्वं प्रति नीयते। साङ्ख्यं द्वैतवादी मीमांसा च कर्मवादी, न्यायवैशेषिकदर्शनाभ्याम् यद्यपि ईश्वरः स्वीक्रियते तथापि तेषां नये ईश्वरो मुख्यतत्त्वरूपेण

न उपस्थाप्यते। तत्र तत्त्वतः वेदानाम् अस्तित्वम् अङ्गीक्रियते एव। *पूर्वमीमांसा* संस्कारात्मकः, उपनिषदां पुष्ट्यार्थं *उत्तरमीमांसा वेदान्तो ब्रह्मसूत्रं* वा बादरायणमहोदयेन विरच्यते। ब्रह्मसूत्रग्रन्थम् आश्रित्य ईश्वर-जगत-आत्मा-मुक्तिसंबद्धानां दार्शनिकावधारणानां विविधानि भाष्याणि भारतस्य अनेके आचार्याः लिखितवन्तः, मुख्यतया ब्रह्मसूत्रव्याख्यानां मध्ये अद्वैतं द्वैतं द्वैताद्वैतं च वर्गत्रयेषु दार्शनिकचिन्ताधारा परिलक्ष्यते।

अद्वैतनये — शंकरावतारेण शंकराचार्येण प्रणीतं केवलाद्वैतदर्शनम्।
शेषावतारेण रामानुजाचार्येण विशिष्टाद्वैतदर्शनम्।
वैश्वानरावतारेण वल्लभाचार्येण शुद्धाद्वैतदर्शनम्।
द्वैतनये— वाय्ववतारेण माधवाचार्येण द्वैतदर्शनम्।
द्वैताद्वैतनये — हंसावतारेण निम्बार्काचार्येण द्वैताद्वैतदर्शनम्।

विविधदार्शनिकसंप्रदायाः प्रारंभे नास्तिकाः आसन् परंतु व्याख्याकाराणां धर्मीयमतवादानां प्रभावेण अन्ते आस्तिकरूपेण परिणताः सन्ति। न्यायवैशेषिकदर्शनयोः भाष्यटीकापर्यालोचनेन द्रष्टुं शक्यते यत् अनेके भाष्यकाराः शैवा आसन्।[5] निरीश्वरधर्मत्वेन सुप्रसिद्धं *साङ्ख्यदर्शनं* वैष्णवधर्मविश्वासेन सह बहुधा एकात्मो भूत्वा महाभारत-भागवत्पुराणयोः सेश्वरवादे परिणमते।

धर्मः हि जगतः एकमात्रम् उद्देश्यं समाजस्य धारकः अस्ति, परमात्मनो ध्यानभजनादिकं धर्मस्य सर्वोच्चसाधनम् आसीत्। प्राचीनकाले वर्णवैषम्याधारिते ब्राह्मणप्रधानवैदिकधर्मे अन्धविश्वासाद् वेदोपनिषदानां काठिन्यतया च एतेषां तात्पर्यम् अवगतं सामान्यजनानां कृते कठिनम् अस्ति, फलतः तेषां धर्मविश्वास-पूजा-पार्वणादिकं सरलतया अवगन्तुम् आस्तिकनये भक्त्या प्रयोजनं स्वीक्रियते। अतः शैव-वैष्णवसंप्रदायाः उद्भूता आसन्। अष्टमशताब्देः सनातनवैदिकधर्मरक्षार्थं पतितभारतवर्षस्य उद्धारहेतवे भगवान् शंकराचार्यो भारतभूमौ अवतीर्णः अभवत्। शंकराचार्यो बौद्धधर्मं दूरीकृत्य तत्र कल्याणमय-सत्यसनातन-वैदिकधर्मं पुनर्स्थापितवान्। अतः सनातनधर्मावलम्बिनं शंकराचार्यं शंकरावताररूपेण परिगण्यते। आध्यात्मिकप्रतिभाया असाधारण-व्यक्तित्ववान् ज्ञानमार्गी शंकराचार्यः स्वस्य जीवद्दशायां ज्ञानभक्तिकर्मणां समन्वयं साधितवान्। माध्व-गौडीय-सनक-रुद्रादिसंप्रदायानां विकाशाद् अनन्तरं प्रायः द्वादशशतकतः पञ्चदशशतकपर्यन्तं काले वैकुण्ठस्य स्थाने गोलोको नित्यवृन्दावनं वा प्रसिद्धिम् आजगाम।

## २.१. शंकराचार्यस्य नये भक्तिः

केरलप्रदेशस्य कालाडिग्रामे नाम्बुदिनाम्नि ब्राह्मणपरिवारे ख्रिस्टपूर्वे अष्टमशतके एव शंकराचार्यस्य आविर्भावः अभवत्। शंकराचार्य आसीत् केवलाद्वैतवादस्य प्रवर्तकः। शंकराचार्यः सगुणब्रह्मणः तथा ईश्वरस्य याथार्थ्येण गुरुत्वं स्वीकृतवान्। ईश्वरं प्रति श्रद्धोपासना एव ब्रह्मज्ञानलाभस्य सोपानम् इति तेन स्वीकार्यते। अविद्यया अनात्मवस्तुनः सत्यत्वे अपि विचारविमर्शाद् अनन्तरम् आत्मा सच्चिदानन्दस्वरूपं ब्रह्म केवलं नित्यम्, एतदेव मनसि चिन्तनम् अद्वैतनये भक्तिः। शंकराचार्येण—

स्वस्वरूपानुसन्धानः भक्तिरुच्यते। (वि.चू.) इति।

शंकराचार्यस्य *विवेकचूडामूणौ* प्राप्यते जीवात्मनि परमात्मनः अनुसन्धानं तथा जीवस्य स्वरूपोपलब्धेः प्रयास एव भक्तिः। स्वस्वरूपस्य अनुसंधानं कथं क्रियते, वैराग्येण विचारेण वा अनित्यविषयं तिरस्कृत्य अन्तःकरणस्य अन्तस्थले सत्स्वरूपं चैतन्यस्वरूपं परमानन्दस्वरूपं परमात्मानम् अन्वेषणेन एव भूयते। तदन्वेष्टुं ऐकान्तिकः अनुरागः तथा निष्ठा परमात्मनः समीपं नयति।

ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः। इति।

भक्तिः स्वात्मतत्त्वानुसंधानं करोति, स्वस्य आत्मा तत् इति कथ्यते, एवम् आत्मज्ञानप्रयास एव स्वात्मतत्त्वानुसन्धानं भक्तिः। तीव्रवैराग्यवशाद् एव स्वरूपज्ञानस्य योग्यता जागर्ति। या हृदयवृत्तिः अस्माकं स्वरूपानुसंधानस्य सहायका भवति, यया अस्माकम् आत्मतत्त्वज्ञानं लभ्यते। *विवेकचूडामणौ*—

मोक्षकारणसामग्र्यां भक्तिरेव गरीयसी। (वि.चू. ३१)

भक्त्या स्वरूपज्ञानं लभ्यते इत्यत्र भक्त्याः श्रेष्ठत्वं ग्राह्यते। तीव्रे वैराग्ये सति संसारो विषादमयः इति अनुभूयते। तीर्त्वा भवाम्भोधिं परमानन्दमाप्स्यति। गीताभाष्ये शंकराचार्यः अद्वैत-ब्रह्मज्ञाननिष्ठा-चरमब्रह्मसाक्षात्कार एव परमभक्तिः इति निरूपिता। शंकराचार्यकृते अद्वैतनये भक्तिः साधनरूपेण ग्राह्यते न तु साध्यरूपेण, ज्ञानं साक्षात्मुक्तेः साधनतया स्वीकार्यते महोदयेन। भक्तेः अतीव महिमा विद्यते परंतु भक्तिदर्शनं मोक्षाय न अनिवार्यम्। भक्तिः अन्तःकरणस्य मलिनतां प्रक्षालितुं समर्था भवति आत्मसाक्षात्काराय तु ज्ञानम् आवश्यकम् अस्ति। शंकराचार्यस्य अद्वैतवादेन वल्लभाचार्यस्य अद्वैतवादस्य भेदो वर्तते। अद्वैतनये स्वरूपतो जीवनम् एव सदा मुक्तः, ब्रह्मवित्तमः अहं श्रेष्ठं ब्रह्मविद्, अहमेव अद्वयब्रह्म इत्येव सिद्धान्तो धारयितव्यः। शंकराचार्येण मन्यते— निर्गुणब्रह्म न जगतः स्रष्टा, मायोपाधियुक्तं ब्रह्म तथा सगुणब्रह्म उपास्यं ब्रह्म वा ईश्वरो वा जगद् असृजत्।

भगवान् शंकराचार्यः आवृत्तिसकृदुपदेशात्[6] इति सूत्रस्य व्याख्यायां सानुग्रहो आदेशानुवर्तनम् अविच्छिन्नध्यानं लक्षीकृत्य राजानं प्रति प्रजायाः भक्ति तथा पतिं प्रति पतिव्रतायाः स्त्रियः ध्यानं 'भक्तिः' इति कथितवान्। पुनः भगवान् शंकरः अस्य पुरुषतत्त्वस्य स्वगतभेदं दूरीकृत्य निर्विशेषाद्वैततत्त्वम् उपलब्धवान्, तत् निर्विशेषतत्त्वं शक्तिमतः पूर्णसामञ्जस्यव्यतीतम् अन्यत् किमपि न। शंकराचार्येण रचितानां भक्तिभावसंबलितानां स्त्रोत्राणां पठनादेव अवगम्यते तस्य भक्तिसुलभमानसिकतायाः। शंकराचार्येण शिव-विष्णु-देवी-गणेशादीनां विविधानि भक्तिरस-संबलितानि स्त्रोत्राणि विरचितानि, यथा—*अच्युताष्टकम्*—

अच्युतं केशवं रामनारायणं कृष्णदामोदरं वासुदेवं हरिम्।
श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे।। इति।

*श्रीकृष्णाष्टकम्*—

भजे व्रजैकमण्डनं समस्तपापखण्डनं स्वभक्तचित्तरंजनं सदैव नन्दनन्दनम्।
सुपिच्छगुच्छमस्तकं सुनादवेणुहस्तकमनङ्गरङ्गसागरं नमामि कृष्णनागरम्।। इति।

*श्रीगोविन्दाष्टकम्*—

सत्यं ज्ञानमनन्तं नित्यमनाकाशं परमाकाशं गोष्ठप्राङ्गणरिङ्खणलोलमनायासम्।
मायाकल्पितनानाकारमनाकारं भुवनाकारं क्ष्मया नाथमनाथं प्रणमत गोविन्दं परमानन्दम्।। इति।

*श्रीकृष्णाष्टकं गोविन्दाष्टकं प्रबोधसुधाकरश्च* स्त्रोत्राणां स्तुतिप्रसङ्गे स्पष्टरूपेण *श्रीमद्भागवतपुराणस्य* प्रभावः परिलक्ष्यते। *गणेशपञ्चरत्नम्, जगन्नाथाष्टकम्, भजगोविन्दम्, गङ्गाष्टकम्, काशीपञ्चकम्, अर्धनारीश्वरस्त्रोत्रम्, सौन्दर्यलहरी, महिषासुरमर्दिनीस्त्रोत्रम्, अन्नपूर्णाष्टकम्, कालभैरमाष्टकं* च इत्यादीनि। अतः पार्थिवमनुष्याणाम् आध्यात्मिकविकाशाय भक्तिप्रवर्धनाय च शंकराचार्यो हिमालयात् कन्याकुमारिपर्यन्तं भातवर्षस्य चतुर्प्रान्ते धर्मप्रचारस्य मन्दाकिनीरूपं लीलाक्षेत्रं मठचतुष्टयं स्थापितवान्, यथा— महीशूरस्य तुङ्गभद्रानदीतीरं शृङ्गेरीमठम्, द्वारकायां गोमतीनदीतीरं सारदामठम्, पूर्य्यां समुद्रोपकूलं गोवर्धनमठम्, वद्रीनाथे च अलकानन्दानदीतीरं ज्योतिमठम्।

## २.२. रामानुजाचार्यस्य नये भक्तिः

शंकराचार्यात् परं भक्त्यान्दोलनस्य प्रसिद्धव्यक्तित्वं रामानुजाचार्यः आसीत्, समयकालः एकादशशताब्दी। रामानुजाचार्यस्य दार्शनिकसिद्धान्तः भक्तिसिद्धान्तपोषकः अस्ति। रामानुजाचार्यानुसारं ब्रह्मणा सह जीवजगतः अस्तित्वं सत्यं परंतु परमेश्वराधीनम्। अङ्गी परमेश्वरः परमसत्ता च, अङ्गत्वं जीवजगतोः सिध्यते। रामानुजाचार्यः अद्वैतवादी परंतु रामानुजाचार्यस्य परब्रह्मवादो न निर्गुणो निर्विशेषः चिन्मात्रम्, वरं च सविशेषः सगुणः परमेश्वर इति ग्राह्यते। रामानुजस्य तत्त्वं मूलतः अद्वैतं तथापि तत्र कति विशेषणानि वर्तन्ते, भक्तिः ज्ञानविशेषा, एनया विशिष्टतया अयं मतवादो विशिष्टाद्वैतवाद इति कथ्यते। रामानुजः चिदचिद्विशिष्ट ब्रह्मवादी। परमेश्वरः अन्तर्यामी विश्वस्य आत्मा, जीवः तथा जगत् तस्य शरीरम्। यथा शरीरम् आत्माधीनं तथा जीवजगतः अस्तित्वम् अपि परमेश्वराधीनम् अस्ति। परमेश्वरः सगुणत्वाद् उपास्यः, जीवनस्य परमसाध्यं तु परमेश्वरप्राप्तिः। तादात्म्यरूपस्य अभावात् मोक्षो न ज्ञानेन लभ्यो भक्त्या साध्यः भवति। अतो रामानुजनये भक्तिः मोक्षस्य परमसाधनरूपा, ज्ञानं कर्म च मोक्षस्य सहायके साधनार्थम्। रामानुजाचार्यो मायां न स्वीकृतवान्। विशिष्टाद्वैतमते, जगद् वास्तविकम् ईश्वरसृष्टं, ईश्वरो न मायोपहितमपरं ब्रह्म, वरंच साक्षात्परब्रह्म, परमेश्वर एव पारमार्थिकं सत्यम्। श्रीरामानुजाचार्यमते उपासना तथा भक्तिः समपर्यायः। *तत्त्वटीकायाम्*—

स्मृतेर्ध्रुवत्वं विसदृशबुद्धिव्यवधानरहितप्रवाहत्वम्। इति।

भक्तिविषये रामानुजाचार्येण निगदितम् –भक्तिरपि निरतिशयप्रियानन्यप्रयोजनस्वेतरवैतृष्णयावह-ज्ञानविशेष एव। (*वेदार्थसंग्रहः*) इति। अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थं प्रियत्वेन स्वयमप्यत्यर्थं प्रिया यस्य स एव परमात्मना वरणीयो भवति इति तेनैव लभ्यते परमात्मा इत्युक्तं भवति एषा रूपा ध्रुवानुस्मृतिः एव भक्तिशब्देन अभिधीयते। भक्तिस्वरूपविषये *श्रीभाष्ये* प्रोच्यते—

ध्रुवानुस्मृतिरेव भक्तिशब्देनाभिधीयते।
उपासनापर्यायत्वाद्भक्तिशब्दस्य।
अत एव श्रुतिस्मृतिभिरेवमभिधीयते।।

भक्तिः प्रपत्तिश्च इति भागद्वयेन साधनां प्रदर्शितवान् रामानुजाचार्यः। प्रपत्तिमार्गे भक्तः ईश्वरशरणागतिं प्राप्नोति। आत्मनो मोक्षार्थं कर्मयोगेन तदनन्तरं ज्ञानयोगेन भक्तो भक्त्यां पर्यवस्यति। देवपूजातपश्चर्यायज्ञदानतीर्थयात्रादिरूपं कर्म कर्तव्यपालनं कर्मफलत्यागेन अनुष्ठातव्यम्, निरन्तरं कर्मयोगी एव ज्ञानयोगी भवितुमर्हति, ज्ञानेन मनुष्यो भक्तिं प्राप्तवान्।[7] रामानुजमते भक्तिः

परमानन्ददायिनी अनुरक्तिः न, भक्त्याः तात्पर्यं ब्रह्मणो निरन्तरं ध्यानम्। पवित्रभोजन-जितेन्द्रियता-पूजन-भजन-दान-दया-अहिंसा-सत्यादयः भक्तिप्राप्तये सहायका भवन्ति। उपासनया तथा भक्त्या परमेश्वरप्राप्तिः भवति, ज्ञानं भक्तेः सहायकं भवति। परमेश्वरस्य दिव्यगुणज्ञानाद् भक्तिः उत्पद्यते, जीवत्काले मोक्षस्य असंभवाद् रामानुजाचार्यो विदेहमुक्तिं स्वीकृतयामास।

रामानुजानुसारं भक्तियोगस्य सप्त साधनानि सन्ति—विवेकः विमोकः अभ्यासः क्रिया कल्याणम् अनवसादः अनुद्धर्षश्च। भक्तेषु कतिपयनियमावली रामानुजाचार्येण सन्निवेशिता—मस्तके तिलकधारणं महामन्त्रजपनं भक्तसेवनं एकादशीव्रतरक्षणं चरणामृतग्रहणं देवमूर्तिषु तुलस्यर्पणं भोगार्पणं च। रामानुजः केवलं नारायणस्य उपासकः परंतु शिष्यपरंपरायां रामपूजनस्य प्रचलनं दृश्यते। देवाचार्य-हर्यानन्द-राघवान्द-रामानन्दक्रमेण शिष्याः बहवः सन्ति। । रामानुचार्यस्य *वेदार्थसंग्रहे*—

> जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्ततप्राप्तिफलः।

रामानुजस्य परमेश्वरः अद्वैतनिर्गुणब्रह्मणः अवैयक्तिकं परमतत्त्वमात्रं न, अपि तु परमेश्वरो दिव्यव्यक्तित्ववान् परमपुरुषः। दिव्यं वैकुण्ठं तस्य मुख्यं निवासस्थलं यद्यपि श्रीमान् नारायण एव सर्वेषां जीवानाम् अन्तर्यामिरूपेण तिष्ठन् सर्वेषां नियमनं करोति, करुणामयस्य उपासनैव मनुष्याणां वैकुण्ठप्राप्तेः निदानं, यतः तद् वैकुण्ठम् अनन्तानन्दप्राप्तिस्थलम् इति विचार्यते। विशिष्टाद्वैतमते, भगवतो लोकप्राप्तिरेव मोक्षः। रामानुजाचार्येण ब्रह्मण आविर्भावः पञ्चरूपेण स्वीक्रियते—

> प्रथमरूपम्, वैकुण्ठे शेषनागोपरि विराजिता लक्ष्मी भू लीलावृता शङ्खचक्रादिविभूषिता, यस्या दर्शनं मुक्तात्मनः केवलं भवति। सृष्टेः उत्पत्त्यर्थं द्वितीयरूपं व्यूहः ज्ञानबलप्रकाशकं संकर्षणरूपम् ऐश्वर्यवीर्यप्रकाशकं, प्रद्युम्नरूपं शक्तितैजसप्रकाशकम् अनिरुद्धरूपं ज्ञान-बल-ऐश्वर्य-वीर्य-शक्ति-तैजस्षड्गुणप्रकाशकं वासुदेवरूपं च।

रामानुजानुसारं मनुष्याणाम् आत्मा ईश्वरस्य अंशो भगवत्प्रेरितः शासितश्च। अयं संप्रदायः श्रीसंप्रदायः इति अभिधीयते। मुक्ताफलग्रन्थस्य हिमाद्रिनाम्ना कैवल्यटीकायां वोपदेवेन उच्यते यत् परप्रकर्षप्राप्तायां सति भक्तिः रसौ परिणमति— सैव प्रकर्षरेखामापन्ना रसः। सामाजिका भक्तिरसेन आह्लादयन्ति, भक्तिरसः उपयुक्तसामग्रीविशिष्टः, अतः प्रत्याख्यानं न संभवपरं भवति। ईश्वरे मनोनिवेशनमेव स्थायीभावः, भक्तचरित्रश्रवणम् अनुभावो, धृतिः व्यभिचारिभावश्च।

रामानुजाचार्यस्य नारायणमूर्तिः तथा *श्रीमद्भगवद्गीतायां* विश्वरूपपुरुषोत्तमतत्त्वं समष्टितत्त्वस्य आभासं ददाति, एतदेव विशिष्टाद्वैततत्त्वस्य साररहस्यम् आयाति। सनातनधर्मस्य अखिलपूजातत्त्वं साधनरहस्यं च समष्टितत्त्वसमन्वितमेव, यत्र तत् तथा त्वम् इत्यनयोः स्वरूपसंबन्धः संमेलनेन अवधार्यते। प्राचीनार्यसभ्यतायाः मुख्यलक्ष्यं समष्टितत्त्वम् एव अस्ति।

### २.३. निम्बार्काचार्यस्य नये भक्तिः

रामानुजाचार्यात् परं निम्बार्काचार्यस्य समयकालः द्वादशशताब्दी। निम्बार्काचार्यो दाक्षिणात्यः आसीत्। निम्बार्काचार्यो बालगोपालस्य उपासनायां प्राधान्यं ददाति। निम्बार्कसंप्रदायः ब्रजस्य प्राचीनतमो राधाकृष्णनिष्ठः संप्रदायः। भगवद्नारायणमुखात् सनकादिकुमारक्रमेण देवर्षेः नारदात् गोपालमन्त्रदेवस्य उपासनाद्यपदेशं निम्बार्काचार्यः प्राप्तवान्। निम्बार्काचार्यः द्वापरयुगस्य अन्ते श्रीकृष्णसमये सुदर्शनचक्रस्य अवताररूपेण प्रकटितवान्। द्वैताद्वैतवादे निम्बार्काचार्यस्य मतानुसारं पुरुषोत्तमः श्रीकृष्णः एव ब्रह्म, ब्रह्मणः ध्यान-स्मृति-पराभक्त्यादिना ब्रह्मज्ञानप्राप्तिः तथा श्रवण-मनन-निदिध्यासनेन ब्रह्मप्राप्तिः उल्लिखिता। निम्बार्कमते चित्, अचित्, ब्रह्म च पदार्थत्रयं विद्यते। चित् तथा अचित् ब्रह्मणः भिन्ने सति अभिन्नं वर्तते। अस्य संप्रदायानुसारं भेदाभेदाश्रयः श्रीकृष्णः एव वेदान्तस्य विषयः। निम्बार्कभाष्ये जीवपरमात्मनोः भेदाभेदसिद्धान्तः निर्दिश्यते यथा—

> अंशांशीभावात् जीवपरमात्मनोर्भेदाभेदौ दर्शयति, परमात्मनो जीवोऽशः
> ज्ञाज्ञौ द्वावजावीशनीशौ इत्यादिभेदव्यापदेशात्, तत्त्वमसि इत्याद्यभेदव्यपदेशाच्च।
> इति

निम्बार्कसंप्रदायानुसारं ब्रह्मप्राप्तिः एव जीवानां मुख्यम् उद्देश्यं भवति, यत्र शरणागतिः एव मुख्यः उपायः वर्तते। भगवत्पूजायाम् उपासना अस्य संप्रदायस्य आवश्यिककर्तव्यरूपेण *दशश्लोकी* इति ग्रन्थे निम्बार्काचार्येण उच्यते—

> उपासनीयं नितरां जनैः सदा प्रह्मणयेऽज्ञानतमोऽनुवृत्ते। (*दशश्लोकी* ६)

उपासना साधनरूपा अपराभक्तिः प्रेमलक्षणरूपा उत्तमाभक्तिश्च इति भेदद्वयेन द्विधा विभज्यते। श्रवणकीर्तनादीनां क्रमशः पालनेन साधकः प्रेमलक्षणायाम् उत्तमाभक्त्यां पर्यवस्यति। *भागवत्पुराणे* –सर्वं ब्रह्मात्मकं तस्य विद्ययात्ममनीषया। परिपश्यन्नुपरमेतसर्वतोमुक्तसंशयः॥(*वेदान्तकामधेनुः* ६) निम्बार्काचार्येण उपर्युक्त श्लोकस्य समर्थनात् श्रुतिविषये तथा स्मृतिविषये आलोचना प्रोच्यते—

> सर्वं हि विज्ञानमतो यथार्थकं श्रुतिस्मृतिभ्यो निखिलस्य वस्तुनः।

ब्रह्मात्मकत्वादिति वेदविन्मतं त्रिरूपाऽपिश्रुतिसूत्रसाधिता।। (*वेदान्तकामधेनुः* ७) इति।

निम्बार्कसंप्रदाये व्यष्टिसमष्टिरूपाभ्यां भगवतो उपासना प्रचलिता। जडचेतननिर्विशेषेण सर्वेषु प्रेमप्रदर्शनं भगवदुपासनायां सर्वोच्चस्तरेण भक्तानां नयति। द्वैताद्वैतव्याख्यानावसरेण निम्बार्काचार्येण उपास्य-उपासक-साधनभक्ति-भक्तिरस-मायाभेदेन पञ्च साधनाया विषया उल्लिखिताः सन्ति, *दशश्लोकी* इति ग्रन्थे—

> उपास्यरूपं तदुपासकस्य च कृपाफलं भक्तिरसस्ततः परम्।
> विरोधिनो रूपमथैतदाप्तेर्ज्ञेया इमेऽर्था अपि पञ्च साधुभिः।। (*दशश्लोकी* १०)

निम्बार्काचार्येण *श्रीराधाष्टकम्—प्रातःस्मरणस्तोत्रम्* इत्यादीनि भक्तिमूलकस्तोत्राणि विरचितानि।

## २.४. मध्वाचार्यस्य नये भक्तिः

श्रीमतो मध्वाचार्यस्य कालः त्रयोदशशताब्दी, पञ्चविंशतितमे वर्षे अच्युतप्रकाशनाम्ना अद्वैताचार्यात् मध्वः दीक्षां गृहीत्वा पूर्णप्रज्ञ इति नामकरणम् अभवत् मध्वाचार्यस्य। शंकराचार्यप्रणीतस्य विशुद्धाद्वैतवादस्य विपक्षे रामानुजाचार्याद् भिन्नमतवादं मध्वाचार्यः गठितवान्। शंकराचार्यस्य निर्विशेषदर्शनस्य विरुद्धे *पूर्णप्रज्ञाभाष्ये वेदान्तदर्शनं* तेन महोदयेन प्रतिष्ठितं, यत् द्वैतवाद इत्याख्यायते।

मध्वाचार्यमते— भक्तिरेव मुक्तेः साधनम्, त्यागः भक्तिः ईश्वरानुभूतिश्च मुक्तेः साधनानि सन्ति। श्रीभगवतः सेवा एव प्रकृष्टसाधनरूपेण गण्यते। सेवा त्रिधा अङ्कनं नामकरणं तथा भजनम्। येन अङ्कनेन भगवान् नारायणः सदा स्मर्यते, अतः नारायणस्य शस्त्राणां प्रतीकाः (यथा दक्षिणहस्ते सुदर्शनचक्रं वामहस्ते च शङ्खचिह्नं) भक्ताः शरीरस्य विशिष्टाङ्गेषु अङ्कनं कुर्वन्ति। *पूर्णप्रज्ञाभाष्ये*—

> सा च सेवा अङ्कन-नामकरण-भजनभेदात् त्रिविधा। तत्राङ्कनं नारायणायुधादीनां तदुपस्मरणार्थमपेक्षेतार्थसिद्ध्यर्थं च। नामकरणं पुत्रादीनां केशवनाम्ना व्यवहारः सर्वदा तन्नामानुस्मरणार्थम्। भजनं दशविधं – वाचा सत्यं हितं प्रियं स्वाध्यायः, कायेन दानं परित्राणं परिरक्षणं, मनसा दया स्पृहा श्रद्धा चेति। अत्रैकैकं निष्पाद्य नारायणे समर्पणं भजनम्। इति।

वैष्णवभक्तः शरीरस्य द्वादशस्थानेषु ऊर्धपूण्डतिलकं रचयित्वा केशवादिद्वादश भगवतः नामानि उच्चारयित्वा क्रमशः तिलकं स्पृश्य द्वादशकेशवादिरूपं ध्यायेत्। एतेषु द्वादशस्थानेषु ललाटे केशवः, उदरे नारायणः, वक्षसि माधवः, कण्ठे गोविन्दः, दक्षिणकुक्षौ विष्णुः, दक्षिणबाहौ मधुसूदनः, दक्षिणस्कन्धे त्रिविक्रमः, वामकुक्षौ वामनः, वामबाहौ श्रीधरः, वामस्कन्धे ऋषिकेशः, पृष्ठे पद्मनाभः, कटिभागे च दामोदरः इति द्वादशमूर्तयः ध्यायिष्यन्ति।

मध्वाचार्येण स्वीक्रियते कायवचनमनोभिः भजनदशकम् अनुष्ठानेन भक्त्या उत्कर्षसाधनेन अहंकारः भक्तानाम् अन्तःकरणाद् विलुप्यते। अमलाभक्तिः मोक्षसाधनं भवति। इयं भक्तिः साधारणी भक्ति, परमा भक्ति स्वरूपभक्तिः च त्रिविधा भवन्ति। मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्। सद्गुरुसमीपे शास्त्रश्रवणपूवं या भक्तिः उत्पद्यते सा साधारणी भक्तिः उच्यते। अपरोक्षज्ञानाद् ईश्वरं दृष्ट्वा या भक्तिः उत्पद्यते सा परमाभक्तिः, कर्मलिप्सारहितत्वाद् अमलाभक्तिः इत्यपि उच्यते, मोक्षात् परं जीवस्य स्वरूपेण या नित्यभक्तिः वर्तते सा स्वरूपभक्तिः साध्यभक्तिः वा।

श्रवणं मननञ्चैव ध्यानं भक्तिस्तथैव च।
साधनं ज्ञानसम्पत्तौ प्रधानं नान्यदिष्यते।।इति

न केवलं श्रवणादिभिः गुरुप्रसादेनैव च ब्रह्मदर्शनम्, किन्तु भक्त्या च एवमेव भक्त्या महिमा गीयते। मध्वाचार्यः भक्तिसंज्ञाप्रसङ्गेन—

माहात्म्यज्ञानपूर्वस्तु सुदृढसर्वतो धिकः।
स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा।। (भ.र.सि. १.४.१२)

श्रीविष्णोः विविधरूपेषु श्रीनारायण-श्रीरामचन्द्र-श्रीनृसिंहदेवादयः वर्तन्ते पूर्णाङ्गरूपेषु च श्रीराधाकृष्णः वर्तते। माध्वगौडीयमते श्रीराधाकृष्णो वैष्णवानां परमोपास्यः कारणं श्रीराधाकृष्ण एव श्रीविष्णोः प्रकृतस्वरूपम् अस्ति, अवशिष्टानि रूपाणि श्रीकृष्णस्य स्वांशप्रकाशश्च। गङ्गा तुलसी सत्सङ्गो हरिकीर्तनम् अनसूया हि अहिंसा इति एतैः समेषां पापानां ध्वंसो भवति। कर्माणि विष्णौ अर्पितानि चेत्सफलानि भवन्ति, अन्यथा भस्मनि हुतं हव्यमिव निष्फलानि भवन्ति।

*शाण्डिल्यसंहितायां* तथा *तैत्तिरीयोपनिषदि* विशुद्धद्वैतवादस्य समर्थने श्रुतिः प्राप्यते। स्मृत्यानुसारं द्वैतवादमते परमेश्वरः अस्य जडजगतः ऊर्ध्वं विद्यते, जडजगत् तस्य अपराप्रकृतिः। जीवे जीवे पार्थक्यम् अस्ति। जडजगत् भगवतः अपराशक्तेः फलम्, जीवः तस्य पराशक्तेः अंशः। जीवः चेतनः जगत् च अचेतनम्। विविधजडविषयेषु परिमाणगत-गुणगतभावेन भेदो दृश्यते। मध्वाचार्यः स्पष्टतो

द्वैतवादी। मध्वाचार्येण स्वतन्त्ररूपेण परमेश्वरः परतन्त्ररूपेण च जीवः स्वीक्रियते। माया भगवतः इच्छा, मोक्षश्च विष्णुप्रसादम् अन्तरेण न लभ्यते। रामानुजाचार्यः तथा मध्वाचार्य उभयमेव श्रौतदार्शनिकः, आस्तिकमतावलम्बिनौ तौ स्मृतिमाधारीकृत्य *पञ्चरात्रम्* उपजीव्येते। शंकराचार्यमते ईश्वरजीवयोः भेदः औपाधिकः मध्वाचार्यमते भेदस्तु पारमार्थिकः। मध्वाचार्येण जीवस्य अल्पज्ञत्वं ईश्वरस्य च सर्वज्ञत्वम् अङ्गीक्रियते। श्रुत्यामपि विष्णोः सर्वज्ञत्वादिगुणानाम् उल्लेखः प्राप्यते। अनुव्याख्यानस्य टीकायां *न्यायसुधायां* श्रीजयतीर्थेन प्रोच्यते—

> परमेश्वरभक्तिर्नाम निरवधिकानन्तानवद्यकल्याणगुणत्वज्ञानपूर्वकः,
> स्वात्मात्मीयसमस्तवस्तुभ्योऽनेकगुणाधिकः अन्तरायसहस्रेणाप्यप्रतिबद्धो
> निरन्तरप्रेमप्रवाहः॥ (*न्यायसुधा* १.१.११)

सर्वात्मभावो मुख्यभक्तिः। भजनानन्दः फलम्। श्रवण-कीर्तन-भक्तिमार्गाणां ज्ञानमार्गस्य च भजनापेक्षया गौणत्वं सिध्यति। तत्त्वज्ञानं भक्तिफलं, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् इति। द्वैतवादे द्रव्यात्मकयज्ञः, विशिष्टाद्वैतवादे द्वैताद्वैतवादे च भावनात्मकयज्ञः अद्वैतवादे च केवलात्मकयज्ञ आभासिताः भवन्ति। लीलारसस्वादनार्थं प्रसिद्धः श्लोकः *बोधसारे*—

> द्वैतं मोहाय बोधात् प्राक् प्राप्ते बोधे मनीषया।
> लीलार्थं कल्पितं द्वैतमद्वैतादपि सुन्दरम्॥ (*बोधसारः*) इति।

## २.५. गौडीयवैष्णवमते भक्तिः

पञ्चदशशताब्द्यां भक्त्यान्दोलनस्य अन्यतमं पथिकृद् आसीत् श्रीचैतन्यमहाप्रभुः। गौरवर्णीयो गौराङ्गः १४८६ तमे वर्षे फेब्रवरिमासस्य १८ दिनाङ्के चन्द्रग्रहणस्थपूर्णिमातिथौ नवद्वीपे अजायत। तस्य पिता जगन्नाथमिश्रः माता च शचिदेवी।

पश्चिमवङ्गस्थे नदीयाप्रदेशस्य तामिलवैष्णवसाधकानां भक्तितत्त्वस्य अनुरूपा कृष्णचिन्ता-कृष्णगुणकीर्तन-कृष्णरूपदर्शन-विह्वलता-इत्यादयो भावाः परवर्तिनि काले पञ्चदशशताब्द्याम् आविर्भूते भक्तिप्रवरे कृष्णदर्शिनि श्रीचैतन्ये प्रतिभाति इति गण्यते। श्रीचैतन्यः शंकराचार्यप्रवर्तित-दशनामी-सन्न्यासीसंप्रदायभुक्त-श्रीकेशवभारत्याः सकाशाद् यथाविधि सन्न्यासं तथा दशनामीसंप्रदायभुक्तस्य श्रीईश्वरपुर्याः च मन्त्रदीक्षाम् अपि गृहीतवान्।

वृन्दावनदासेन लिखितम्— अद्यापि इह वैष्णवमण्डले श्रीचैतन्यस्य ध्वनिः ध्वन्यते। चैतन्यमहाप्रभुः कश्चन वैष्णवगुरुः आसीत्। श्रीकृष्णस्य माधुर्यलीलाविकाशनमेव श्रीचैतन्यदेवस्य जीवनस्य साधना, श्रीचैतन्यदेवस्य भावजीवनस्य मूलतत्त्वं तथा वैष्णवसाहित्यस्य मूलसूत्रं यैः उद्घाट्यते तेषु पञ्चजनेषु चत्वारो दक्षिणापथवासिनो गोपालभट्ट-रूप-जीव-सनातनगोस्वामिनः आसन्। तस्य अनुगामिनां तीर्थोद्धार-विग्रहप्रतिष्ठा-शास्त्रसंकलनादिभिः श्रीचैतन्यकर्तृकप्रवर्तितधर्ममतस्य भित्तिमूलं सुदृढकरणाय वृन्दावनप्रवासिषु सनातनगोस्वामी तथा रूपगोस्वामी सर्वापेक्षा प्रसिद्धिः प्राप्ता। अपि च जीवगोस्वामी गोपालभट्टगोस्वामी रघुनाथदासगोस्वामी रघुनाथभट्टगोस्वामी इति चत्वारः पण्डिताः सन्ति। षड्गोस्वामिषु सनातनस्य अकुण्ठितशास्त्रनिष्ठा, श्रीरूपस्य प्रगाढरसमाधुर्यनिष्ठा, श्रीजीवस्य गभीरतत्त्वनिष्ठा, गोपालभट्टस्य सुतीव्राचारनिष्ठा वैष्णवधर्मदृढीकरणस्य मूलम् अस्ति। एतेषाम् ऐकान्तिकचेष्टया गौडीयवैष्णवधर्मे मुलतत्त्वस्य भक्तिवादस्य भित्तिभूमिः रचिता। एषां षण्णाम् एकत्रीकरणस्य कृतित्वं मूलतः श्रीचैतन्यदेवस्य आसीत्।

श्रीचैतन्यलीला सत्यं दूरवगाहः अस्ति। तत्कृपाभिन्नं लीलासमुद्रमवगाहनं कल्पनातीतम्। श्रीमहाप्रभुसाधनायां लीलायाः ऐश्वर्यात् माधुर्यरीतिः लभ्यते। श्रीकृष्णलीलात्मक-महापुराणेन *श्रीमद्भागवता* सह *श्रीचैतन्यभागवतस्य* सादृश्यमपि आश्चर्यजनकं परिगण्यते। भगवान् श्रीचैतन्यदेवः चतुर्णां वैष्णवसंप्रदायानां वैज्ञानिकमपूर्णतां दूरीकृत्य विज्ञानसंमतं शुद्धभक्तिसिद्धान्तं अचिन्त्यभेदाभेदवादम् उपदिष्टवान्। केवलं भेदवादः अभेदवादः तथा शुद्धाद्वैतवादो विशिष्टाद्वैतवादश्च श्रुत्याः शास्त्रस्य यदि वा एकदेशसंमतः तथापि अन्यदेशविरुद्धः, अचिन्त्यभेदाभेदवादस्तु वेदस्य सर्वदेशसंमतः अस्ति। अचिन्त्यभेदाभेदवादे जीव एव तटस्थाशक्तेः परिणामविशेषः, ईश्वरेण सह भेदो यथा वर्तते तथा अभेदः अपि वर्तते, अत्र परतत्वेन ईश्वरेण सह जीवजगतोः यः अचिन्त्यः युगपत् भेदाभेदयोः संबन्धः वर्तते। अचिन्त्यशब्दस्य अर्थः चिन्तातीतं तर्कातीतम्। ईश्वर-जीव-जगताम् इति तत्त्वत्रयेषु यः भेदाभेदसंबन्धः अस्ति ईश्वरकृपया एव तद् अवगन्तुं शक्यते।

गौडीयवैष्णवमते कृष्णप्रेम पञ्चमपुरुषार्थरूपेण गण्यते। प्रेम प्रेमभक्तिः भक्तिः साध्यभक्तिः एताः समार्थकशब्दाः वर्तन्ते। *श्रीमद्भागवतपुराणस्य* 'दुर्लभो मानुषो देह' इत्यादिश्लोकस्य दीपिकादीपनटीकायाम्—

> भक्तेः पञ्चमपुरुषार्थत्वं गौतमीये श्रीनारदेनोक्तम्। भद्रमुक्तं भवद्भिस्तु मुक्तिर्तुर्या परात्परा। निरहं यत्र चित्सत्ता तुर्य्या सा मुक्तिरुच्यते।। पूर्णाहन्तामयी भक्तिस्तुर्यातीता

निगद्यते। इति श्रुतेश्च।। सर्वदैनमुपासीत।। मुक्तानामपि भक्तिर्हि परमानन्दरूपिणीत्यादिका।। (भ.र.सि. १.२.१३१)

गौडीयसंप्रदायमते व्रजेन्द्रनन्दनः श्रीकृष्णः एव परब्रह्म, व्रजे श्रीकृष्णस्य प्रेमसेवा एव मुख्यम् उद्देश्यम्। इत्यत्र ब्रह्मजीवयोः सेव्यसेवकसंबन्ध एव स्वीक्रियते। श्रीकृष्णोपासनासिषये *नारदपञ्चरात्रे*—

परं श्रीकृष्णभजनं ध्यानं तन्नामकीर्तनम्।
तत्पादोदक नैवेद्यभक्षणं सर्ववाञ्चितम्।। (ना.पञ्च. १.२.६४)

*भक्तिरसामृतसिन्धौ*—

इष्टे स्वारसिकी राग: परमाविष्टता भवेत्।
तन्मयी या भवेद्भक्ति: सात्र रागात्मिकोदिता।।
विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु।
रागात्मिकामनुसृता या सा रागानुरागोच्यते।। इति।

श्रीमता चैतन्यमहाप्रभुणा *चैतन्यभागवते*—

সেই কৃষ্ণ প্রাপ্তি হেতু ত্রিবিধ সাধন। জ্ঞান যোগ ভক্তি তিনের পৃথক্ লক্ষণ।।
তিন সাধনে ভগবান তিন স্বরূপে ভাসে। ব্রহ্ম পরমাত্মা ভগবত্ত্বে প্রকাশে।।
ব্রহ্ম আত্মা শব্দে যদি কৃষ্ণ কে কয়। রূঢ়িবৃত্তে নির্বিশেষ অন্তর্যামী কয়।।
জ্ঞানমার্গে নির্বিশেষ ব্রহ্ম প্রকাশে। যোগমার্গে অন্তর্যামী স্বরূপেতে ভাসে।।
রাগভক্তি বিধিভক্তি হয় দুই রূপ। স্বয়ং ভগবত্ত্বে প্রকাশ দ্বিরূপ।।
রাগভক্ত্যে ব্রজে স্বয়ং ভগবান পায়। বিধিভক্ত্যয়ে পার্ষদ দেহে বৈকুণ্ঠে যায়।। ইতি।।
(श्री.चै.च. २.८.७२)

*शिक्षाष्टके* श्रद्धाभक्ति: द्योत्यते—

न धनं जनं न सून्दरीं कवितां वा जगदीशकामये।
मम जन्मनि जन्मनीश्वरे भवताद्भक्तिवहैतुकी त्वयि।। ( *शिक्षाष्टकम्* ४)

भगवतः प्रेमभक्तिः प्रोच्यते—

नयनं गलदश्रुधारया वदनं गद्गदरूद्धया गिरा।

पुलकैर्निचितं वपु: कदा तव नामग्रहणे भविष्यति।। ( *शिक्षाष्टकम्* ६)

राधाशब्दस्य का महत्वम्—रा शब्दोच्चारणाद्भक्तो भक्तिं मुक्तिं च राति स:। धा शब्दोच्चारणे नैव धावत्येव हरे: पदम्।। अपि च कृष्णशब्दः *शब्दकल्पद्रुमे* — कर्षति आत्मसात्करोति आनन्दत्वेन परिणमयतीति मनो भक्तानां इति यावत् कृषेर्वर्णे। (*शब्दकल्पद्रुमः* काण्ड २)। कृषिर्भूर्वाचक: शब्दो णश्च निर्वृतिवाचक:।। तयोरैक्यं परंब्रह्म कृष्ण इत्यभिधीयते।। इति।

गौडीयवैष्णवाः सालोक्यादिषु प्रेमसेवा सर्वोत्तमा इति स्वीकृतवन्तः—

> सालोक्यादिस्तथाप्यत्र भक्त्या नातिविरुध्यते।।
> सुखैश्वार्योत्तरा सेयं प्रेमसेवोत्तरेत्यपि।
> सालोक्यादि र्द्विधा तत्र नाद्या सेवाजुषां मता।। (भ.र.सि. १.२ .२८-२९)

*नारदपञ्चरात्रे*—

> हरिभक्तिमहादेव्या: सर्वा मुक्त्यादिसिद्धय:। इति।

अतः देवर्षिणा नारदेन प्रोच्यते *नारदभक्तिसूत्रे* मोक्षाय इच्छुका भक्तये अधिकारिणः भवेयुः कारणं भक्त्यर्थं पार्थिववस्तूनां त्यागः आवश्यकः अस्ति। *नारदभक्तिसूत्रे*—सा एव ग्राह्या मुमुक्षुभिः। (ना.भ.सू.)

श्रीचैतन्यदेवस्य अवस्थात्रयं वर्तते—बाह्यावस्था—तदा स्थूले तथा सूक्ष्मे मनः वर्तते, अर्धबाह्यावस्था— यदा कारणशरीरे कारणानन्दे मनः विद्यते, अन्तर्दशा—यदा महाकारणे मनसः लयो भवति। एतेन वेदान्ते पञ्चकोशैः सादृश्यमस्ति—स्थूलशरीरः—अन्नमयकोषः प्राणमयकोषश्च, सूक्ष्मशरीरः—मनोमयकोषः विज्ञानमयकोषश्च, कारणशरीरः—आनन्दमयकोषः। पञ्चकोषातीते महाकारणे यदा मनसः लयो भवति, तदा अयं समाधिः निर्विकल्पः इति कथ्यते।

पञ्चदशशताब्दी एव *भक्तिरसामृतसिन्धोः* रचनाकालः, *भक्तिरसामृतसिन्धौ* श्रीरूपगोस्वामी प्रोक्तवान्— कृष्णविषयिनी रतिः विभावादिना परिपूरयति भक्तिरसे परिणमते च। कृष्णविषयिनी रतिरेव भक्तिरसस्य अद्वितीयः स्थायीभावः भवति। रतिरियं भक्तविशेषेण सख्य-दास्य-मधुर-हास्य-करूणादिविविधरसरूपेण प्रतीयते। रसिकशेखरः परब्रह्म श्रीकृष्णः शान्तभावः दास्यभावः सख्यभावः वात्सल्यभावः मधुरभावश्च— एते पञ्च भावैः भक्तानां प्रेमरसम् आस्वादयति। शान्तभावस्य गुणः कृष्णे एकनिष्ठता, दास्यभावस्य गुणद्वयं वर्तते— कृष्णे एकनिष्ठता सेवा च, सख्ये

दास्यापेक्षया प्रेमकरुणायाः प्राचुर्यम् अस्ति आधिक्येन गौरवबुद्धिहीनता अस्ति, वात्सल्ये आधिक्येन लाल्य-पाल्य-अनुग्राह्यादिबुद्धिः वर्तते, अपि च प्रेमाधिक्येन रुक्मिन्यादीनाम् अष्टमहिषीणां तथा व्रजवासिनां गोपिकानां कान्ताभावः यत्र वर्तते तत्र  सर्वाधिकगुणत्वात् आस्वाद्यत्वात् च अयं कान्ताभावः मधुरभाव इति कथ्यते।

रसः लोकोत्तरचमत्कारस्वरूपत्वाद् ईश्वरविषयी चर्वणनिष्पन्नो भक्तिरस एव केवलं रसपदवीवाच्यः। *भक्तिरसामृतसिन्धौ* श्रीरूपगोस्वामिणा भक्तिशब्दस्य अर्थः प्रोच्यते सर्वकामनां परित्यज्य श्रीकृष्णप्रीतिविधाननिमित्तं या क्रिया सा भक्तिः। अन्यादिकम् अभिलाषादिकं त्यक्त्वा ज्ञानकर्माद्यनावृतं केवलं कृष्णानुशीलनम् उत्तमा भक्तिः। परं च शान्त-दास्य-वात्सल्य-सख्य-मधुरभावपञ्चकेन भगवति भक्तिः प्रदर्शिता। परतत्त्वस्य रूचात्मकं भावमयं चेष्टामयम् अनुशीलनमेव भक्तेः स्वरूपम् अस्ति। तदनुशीलनं यद्युपाधिरहितं भवेत् तर्हि सा उत्तमाभक्तिः। उत्तमाभक्तेः प्रकारद्वयं वर्तते साध्यं साधनं च। साध्यभक्तिः प्रेममयी भावमयी, अपि च साधनभक्तिः चेष्टामयी भवति। *भक्तिरसामृतसिन्धौ* शुद्धभक्त्याः लक्षणाष्टकम् उल्लिखितम्—

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा।
सान्द्रानन्दाविशेषात्मा श्रीकृष्णाकर्षिणी च सा। (भ.र.सि. १.१.१७) इति।

कृष्णरतिः स्थायीभाव-विभावादि-सहयोगेन भक्तिरसे परिणमति—

सामग्री परिपोषेण परमा रसरूपता।
विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः।।
स्याद्यत्वं हृदि भक्तानामानीता श्रवणादिभिः।
एषा कृष्णरतिः स्थायीभावो भक्तिरसो भवेत्।। (भ.र.सि. २.१.५) इति।

वैष्णवमते मूलरस एव भक्तिरसः। लौकिकरसे शृङ्गारादौ विषयावच्छिन्नस्य इव चिदानन्दांशस्य स्फुरणाद् आनन्दांशस्य न्यूनत्वं, भगवदाकारेण उक्तचेतोवृत्तिलक्षणे भक्तिरसे तु अनवच्छिन्न-चिदानन्दघनस्य भगवतः स्फुरणाद् अत्यन्ताधिक्यमान्दस्य समावेशाद् भगवद्भक्तिरस एव लौकिकरसान् उपेक्ष्य परमरसिकैः सेव्यते। अत एव अनुभववाक्यम्—

अमृतं दिवि किल मधुरं भवति च भुवि काव्यनाटकं मधुरम्।
मधुरादपि मधुरतरं वल्लभस्य नाम यद्गीतम्।। इति।

षोडशशताब्देः वैष्णवसंस्कृतग्रन्थ एव *भक्तिसन्दर्भः*, रचनाकारः श्रीमान् जीवगोस्वामी। वस्तुतः आत्मसुखेच्छासंबन्धसंयुक्तत्वाद् मोहमिश्रिताः लौकिकानुरागरूपाः स्नेहप्रेमश्रद्धादयः सत्त्वोन्मुखरजःप्रधानाः, भगवतः अनुरागरूपिणी भक्तिस्तु मोहातीता अलैकिकी शुद्धसत्त्वगुणमयी च प्रोच्यते। अतो भगवतो हृदयविहारिणी साक्षात् मुक्तिप्रदायिनी एव भक्तिः। अतः परमेश्वरविषयके अलौकिके अनुरागे तु कामाभावाद् ईश्वरे स्नेहादिव्यवहारो नूनमेव भक्तिपदवाच्यः। *भक्तिसन्दर्भे* श्रीजीवमहोदयेन—परिपूर्णसर्वशक्तिविशिष्टो भगवान् इति।

स्वदत्तयैव स्वपदाब्जभाजा भक्त्या स्वयं तारयसे भवाब्धिम्।
भक्तिः सेवागौणवृत्त्योः भङ्ग्यां श्रद्धाविभागयोः॥ इति।

श्रीजीवगोस्वामिना उच्यते भक्तिः स्वरूपतः ह्लादिनीप्रधानशुद्धसत्त्वस्य वृत्तिविशेषत्वात् तस्याः स्वकीयानन्दो विद्यते। अयम् आनन्दः कृष्णरतिस्वरूपवशाद् इतरानन्दात् सहस्रगुणेन आधिक्येन विद्यते। लौकिकानन्दः  अनित्यत्वात् परिणामतः दुःखे पर्यवस्यति। भक्तिरसस्य आनन्दः अशेषसुखतरंगसुधाकरः ब्रह्मानन्दात् प्रशस्यतरश्च। भक्तिभावस्य धर्मो न त्यागो ग्रहणं च। चित्तवृत्तेः नित्यचञ्चलावेदनं हेयज्ञानेन वर्जयित्वा निरूपाधिकं समावस्थकं सृजनं न भक्तिभावस्य उद्देश्यम् अस्ति, भक्तिः परमरमणीयाक्लिष्टमधुरदिव्यभावेन निखिलचित्तवृत्तिं परिवर्तयति। एतेन चिरस्थिरपरमबोधेन संयुज्य चित्तवृत्तेः शाश्वतावेदनप्राप्तिकारणाद् भक्तिरसो मधुरः सुन्दरश्च।

उल्लेखपञ्जिः

---

[1] परमाक्षरं ॐ हि ब्रह्म, जीवात्मानमध्यात्मनाम्ना ज्ञायते। अधि+आत्मन्—अध्यात्म, अध्यात्म+ठञ् प्रत्ययेन आध्यात्मिकशब्दो  निष्पद्यते। उत्पत्तिविनाशसमन्वितोऽखिलः पदार्थ एवाभिभूतः, हिरन्मयः पुरुष एवाधिदेवः, वासुदेवोऽधियज्ञः चान्तर्यामी। अध्यात्मस्य जीवात्मनो विषये चिन्तनमननादिकं हि आध्यात्मिकचिन्तनम्। जीवात्मा परमात्मनोऽशभूतत्वात् परमात्मनः चिन्तनरूपेण गण्यते। आध्यात्मिकचिन्तनकारणादेव जीवात्मा परमात्मानं प्राप्यते। परमात्माप्रापनं जीवानां परमलक्ष्यम्। Narayana Chandra Goswami. *Sāṁkhyatattvakaumudī*

[2] गायत्रीमन्त्रजपं केवलं धार्मिकमोक्षकामिनां न, अपि तु सुखानन्दप्राप्तेः साधनम्। या गायकम् अविद्यायाः संसारचक्रात् त्रायते सा गायत्री। गायत्रीसाधनायां सिद्धायां सत्यां ब्रह्मचैतन्यजीवचैतन्ययोः ऐक्यसाधनं संभवति। उपलब्धिरियं साधनसापेक्षा, गायत्रीमन्त्र एव साधनाया अस्तित्वमस्ति। Sri. Sachinath Chattopadhyay. *Brahmarūpinī Gāyatrī & Trīvedīya Sandhyā Vidhi*. Introduction

[3] तपयज्ञदानतीर्थानां पावनत्वं स्मृतं मनुष्यतीर्थादार्षतीर्थमुत्तमम्, आर्षतीर्थादासुरतीर्थं श्रेष्ठम्, असुरतीर्थात् पुण्यप्रदं देवतीर्थं सर्वमनोरथसाधकम्। न कार्तिकसमो मासो न कृतेन समं युगम्। न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम्।। स्क.पु.—२.१.३७

[4] योगशब्दः युज्धातोः निष्पद्यते— युज् समाधौ इत्यत्र दिवादिगणीय युज्धातोः अर्थः समाधिः, युजिर् योगे रुधादिगणीय युज्धातोः अर्थः संयोगः, युज् संयमने चुरादिगणीय युज्धातोः अर्थः संयमनम्। व्यासदेवेन प्रोच्यते—योगः समाधिः। *साङ्ख्यदर्शने*— पुरुषप्रकृत्योऽतियोगेऽपि योग इत्यभिधीयते। *वैशेषिकदर्शने*—तदनारम्भ आत्मस्ये मनसि शरीरस्य दुःखाभावः संयोगः।

[5] नैयैयिकाः सदा शिवभक्तत्वात् शैव इत्युच्यन्ते, वैशेषिकास्ते पाशुपता इति… तेन नैयैयिकशासनं शैवमाख्यायते—*षड्दर्शनसमुच्चयः*

[6] तथा हि लोके गुरुमुपास्ते राजानमुपास्ते इति च यस्तात्पर्येण गुर्वादीनानुवर्तते स एवमुच्यते। तथा ध्यायति प्रोषितनाथा पतिमिति या निरन्तरस्मरणा पतिं प्रति सोत्कण्ठा सेवनमभिधीयते। (ब्र.सू.) श.भा. ४.१.१

[7] तद्धि वासुदेवाख्यं परं ब्रह्म संपूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणाभ्यर्चितं सम्यक्प्राप्यते। विभवार्चनाद्व्यूहं प्राप्य व्युहार्चनात्परं ब्रह्म वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदन्ति। विभवो हि नाम रामकृष्णादिप्रादुर्भावगणः। व्यूहो वासुदेव-संकर्षण-प्रद्युम्न-अनिरुद्धरूपश्चतुर्व्यूहः। सूक्ष्मं तु केवलषाड्गुण्यविग्रहं वासुदेवाख्यं परं ब्रह्म। *Śrī Bhāṣya* of Rāmānujācārya. Ed. Lalit Krishna Goswami. pp- 41

# षष्ठोऽध्यायः

## सिद्धान्तितः निर्णयः

*श्रीमद्भागवते* शुकदेवगोस्वामी प्रोक्तवान्—सेवायाः कृष्णसुखैकतात्पर्यमयी वासनारूपा भक्तिः एव[1] स्वरूपशक्तेः वृत्तिः भवति, रासलीलावर्णनस्य उपसंहारे—

विक्रिडितं व्रजवधूभिरिदञ्च विष्णोः श्रद्धान्वितोऽनुशृणुयादथ वर्णयेद् यः।
भक्तिं परां भगवति प्रतिलभ्य कामं हृदरोगमाश्वपहिनोत्याचिरेण धीरः।।
(श्री.भाग.१०.३३.३९)

*श्रीमद्भगवद्गीतायाम्* अपि भक्तियोगः प्राप्यते, व्रजेन्द्रनाथशीलाचार्येण *The Gita: A Synthetic Interpretation* प्रवन्धेऽस्मिन् स्पष्टीक्रियते—

Each commentator accepts those passages of Gītā which support his own preconceived dogma and distorts the meaning of the conflicting passages to harmonize them with his dogma.

*श्रीमद्भगवद्गीताया* मूलसुरः समन्वयः, अयं समन्वयः नीतिसमुच्चयात् स्वतन्त्रः। कारणं समुच्चयस्य अर्थः केनापि बाह्यनिदानाद् भिन्नभिन्नोपादानसंयोगेन एकत्रीकरणम्। परंतु समन्वयनये उपादानं न निरपेक्षं वरं च अङ्गाङ्गीभावेन समृद्धं प्रत्येकं प्रत्येकेन संपृक्तम् अपि वा विद्यते। कर्म ज्ञानस्य अङ्गः भक्तिस्तु कर्मणः अङ्गो भवति। ज्ञानात् कर्म न पृथक् क्रियते, कर्मणो ज्ञानम् अपि न छिद्यते भक्तिरपि तथैव च। श्रद्धापुरःसरं धर्मभावना आयाति। अतो भक्त्या भगवतो वास्तविकं स्वरूपं विज्ञाय परमपुरुषार्थं निर्वाणपदं प्राप्तुं शक्यते। वस्तुतः पुष्टिसिद्धान्तं *श्रीमद्भागवतपुराणस्य* उपरि आधारितम् अस्ति, भक्तिसूत्रयोः *श्रीमद्भागवतपुराणस्य* प्रभावः गोचरीभूयते कारणं वासुदेवः श्रीकृष्णः एव सर्वकारणकारणम्। आचार्यप्रतिपादितेषु रामानुज-मध्व-निम्बार्क-वल्लभसंप्रदायेषु दार्शनिकतायाः आधिक्ये अपि भक्तिसिद्धान्तस्य मूलं भक्तिसूत्रप्रतिपादिते सिद्धान्ते एव अस्ति। पुष्टिमार्गस्य लक्ष्यं अभेदज्ञानम् भगवतः कृपा एव। *नारदभक्तिसूत्रे*ऽपि लभ्यते 'तत्कृपयैव' इत्यत्र ईश्वरकृपा परामृश्यते। निम्बार्कमते युगलोपासनया प्रेमशक्तिरूपायाः राधाया उपासना परिलक्ष्यते। *श्रीराधाष्टकस्तोत्रे*—

मुकुन्दस्त्वया प्रेमडोरेण बद्धः पतङ्गो यथा त्वामनुभ्राम्यमाणः। ४

देवर्षिणा नारदेन उक्तः— प्रेम्णि महती शक्ति अस्ति, अतः प्रेमैव कार्यम्। वैष्णवमते ताप-पुण्ड-माला-मन्त्र-यागाः पञ्च संस्काराः मुख्याः, येषु यागे भक्तिः अन्तर्भवति।[2] *शाण्डिल्यभक्तिसूत्रे* जन्मकर्मविदश्च आजन्मशब्दाद् अवतारस्य जन्मकर्मविषयेषु लीलार्थं पराभक्तिः अवतारेषु अपि वर्णिता अस्ति। मध्वाचार्यस्य *ब्रह्मसूत्रभाष्ये*—

भगवान् वासुदेवेति परमात्मेति वै हरिः।
विष्णुः नारायणश्चेति ब्रह्मेतिश्रुतयो जगुः॥ इति।

श्रवणकीर्तनादिकं बहिरङ्गसाधनम् आत्मनिवेदनं च अन्तरङ्गसाधनम् भवति। वल्लभाचार्यः नवधाभक्तिसु श्रवणकीर्तनादिभ्यः आत्मनिवेदनं अधिकं महत्त्वं दत्तवान्—

दैवादुपासनोद्भूता पुष्पाभूमेरिवोद्गताः।
साधनादिप्रकारेण नवधाभक्तिमार्गता॥ (*जलभेदः*१०)

*शाण्डिल्यभक्तिसूत्रे* शाण्डिल्येन मिश्रा भक्तिः निरूप्यते न तु शुद्धा भक्तिः। वैराग्यवतः ज्ञानं तथा रागिनः कर्म एव फलप्रदं भवति। अस्माकं धर्मः तथा संस्कृतिः प्राचीनः अस्ति, ऋषीणां तपस्यायाः फलम्। तेषु ऋषिषु महर्षिः शाण्डिल्यः काश्यपवंशीयो गोत्रकार आसीत्, *छान्दोग्योपनिषदि* महर्षिः शाण्डिल्यः तत्त्वज्ञानी आसीत्। अपि च देवर्षिः नारदः परमविष्णुभक्तः आसीत्। ब्रह्मणो मानसपुत्रः तथा चाक्षुषमन्वन्तरेषु ऋषिषु अन्यतमः आसीत् नारदः। भारतीयसंस्कृतेः मूलभूता आदर्शाः— अव्यक्तशक्तिं प्रति विश्वासः, अध्यात्मभावना, त्यागभावः, प्रकृतिपूजा, समुदायभावः, गोमातृरक्षणम्, सहिष्णुता, कर्मवादः, शिक्षापद्धतिः, आदर्शपरिवारश्च बहुलं सन्ति। संस्कृतिशब्दस्य सर्वप्रथमः प्रयोगः *यजुर्वेदे* उपलभ्यते, यस्य अभिप्रायः संस्कारस्य वरणीयता। *ऐतरेयब्राह्मणे* मनुष्याणाम् अन्तःकरणशुद्धिः संस्कृतिः इति कथ्यते। *शाण्डिल्यभक्तिसूत्रे*—

निर्मायोच्चावचं श्रुतीश्च निर्मितीते पितृवत्। (शा.भ.सू. ३.१.५)

हिताहितपरिज्ञानार्थं नैतिकमूल्यादीनि वेदेषु सन्ति, श्रद्धा तथा भक्तिः समपर्यायः। परमसमृद्ध-सनातनधर्मस्य प्राणान् भक्तिः स्थापितवती। *श्रीमद्भागवतस्य* अग्रिमं सोपानं महाकाव्यम् अस्ति। महाकाव्ययुगस्य अन्ते *हरिवंशम्* विरच्यते, अस्मात् *हरिवंशात्* रासनृत्यस्य उद्भावनम् अभवत्। ईश्वरावतारेण श्रीकृष्णेन सह नृत्यरतानां गोपीनां वर्णनं *हरिवंशे* वर्णितम् अस्ति, नृत्यभक्त्योः नैकट्यस्य भित्तिभूमिः सर्वप्रथमतः *हरिवंशे* एव प्राप्यते। *शाण्डिल्यभक्तिसूत्रे* 'परानुरक्तिरीश्वरे' इति लक्षणे अपि अनुरक्तिशब्दस्य संज्ञाप्रसङ्गेन श्रीकृष्णस्य कमनीयाकृतिदर्शनेन अनुरक्तानां

गोपतरुणीनाम् अपि भक्तिफलं मुक्तिमेव दर्शयति, *नारदभक्तिसूत्रे* अपि तथैव प्राप्यते। राजपुतचित्रकला-भारतीयनृत्य-विविधशिल्पकलासु स्वतन्त्ररूपेण यां कलां निर्मितवान् तन्मूले मूलतः धर्मीयभावः, आध्यात्मिकता, प्रतीकवादः, नान्दनिकदृष्टिः, धर्मनिरपेक्षता च वर्तन्ते। भक्त्या तथा प्रेम्णा नृत्यगीतसंयोजनं संभवपरमस्ति[3]। परमात्मना एकात्मोपलब्धिः अपि संभवपरा भवति। हरिभक्तिव्यतीतं संसाराद् उत्तीर्णं न संभवेत्। भक्तिस्तु मुक्तेः साक्षात्साधनम् अस्ति[4]।

*उपनिषदि* ज्ञानं तपः त्यागश्च एतानि भक्तिसाधनानि परंतु वैष्णवैः एतानि भक्त्याः अङ्गरूपेण स्वीकार्यते। ध्यानेन साधको भक्तिमार्गम् अग्रसरति। *श्रीमद्भगवद्गीतायाम्* उच्यते अभ्यासात् ज्ञानार्थश्रवणाभ्यासात् शब्दयुक्तिभ्याम् आत्मनिश्चयरूपं ज्ञानं श्रेयम्, ज्ञानात् निदिध्यासनसंज्ञं ध्यानं विशिष्यते, तदेव सर्वश्रेष्ठं साधनं ध्यानम्, ध्यानात् कर्मफलत्यागः श्रेयः, त्यागाद् अनन्तरं शान्तिः लभ्यते। योगिषु भक्तयोगी श्रेष्ठः। सर्वकर्माणि भगवति समर्प्य अनन्ययोगेन भक्ताः ईश्वरं ध्यायन्ते पूजयन्ति च।

अक्षरब्रह्मोपासकानां बहुलम् आयासेन परमतत्त्वं लभते भक्तयोगिभिः तु अनायासेन संसारतरणं संभवेत्। ये देहाभिमानं त्यक्तुं न शक्नुवन्तः तेषां कृते अक्षरोपासना अतीव दूरूहा। सगुणोपासना एव सहजलभ्या। सर्वविधाभिलाषकलङ्कादिरहिताः आर्त-जिज्ञासु-अर्थार्थि-ज्ञानिनः शुद्धाः भक्ताः भवितुम् अर्हन्ति। 'चतुर्विधा भजन्ते माम्' इत्यत्र आर्त-जिज्ञासु-अर्थार्थि-ज्ञानिनः एवं पृथक्पदानां प्रयोगेण कर्मज्ञानादिविविधमार्गाश्रितानां जनानाम् आलोचना उल्लिख्यते। श्रीकृष्णभजनेन साधनायाः इष्टफलं सिद्ध्यति, भक्तिसाहचर्यं विना कर्मज्ञानादिकं किमपि साधनम् अभीष्टफललाभार्थं न युज्यते। निष्कामकर्मी ज्ञानी योगी वा, मोक्षकामिनः, सर्वे मायायाः मोहात् मुक्ताः भवितुम् इच्छन्ति परंतु भगवतः स्वरूपशक्तिं विना कोऽपि मायाम् अपसारयितुं न शक्नोति। अतः साधकानां चित्ते स्वरूपशक्तेः आविर्भावः आवश्यकः अस्ति मायायाः मोचनार्थम्। भक्तिः स्वरूपशक्तेः भित्तिः, तत्त्वतः स्वरूपशक्तिः एव। अतः कर्मि-योगि-ज्ञानिनां कृते भक्तिः आवश्यिकी अस्ति। *श्रीमद्भगवद्गीतायाम्*—

भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥[5]इति।

*नारदभक्तिसूत्रे* उच्यते- स एव मायाजलधिं तरति यः भगवन्तं सेवते—स तरति स तरति...श्रीशंकराचार्यः प्रोक्तवान् यत् भगवतः चरणकमलरूपी नौका हि संसारसागरात् त्रायते—

अपारसंसारसमुद्रमध्ये सम्मज्जतो मे शरणं किमस्ति।

गुरो कृपालो कृपया वदैतद् विश्वेशापादाम्बुजदीर्घनौका।। इति।

भक्त्या अङ्गैः मानवो जडत्वात् प्राणमयः, प्राणमयात् मनोमयः, मनोमयात् विज्ञानमयः, अतःपरं विज्ञानमयात् आनन्दमयो भवति। माता पिता आचार्याः च – एतेषां त्रयाणां श्रद्धापूर्वकं सेवा भक्त्याः प्रथमाङ्गरूपेण गण्यते। भोग्यवस्तूनां त्यागभावेन भोक्तव्यम्, त्यागः अन्तर्मुखी प्रवृत्तिः, त्यागे तपसंयमयोः प्राधान्यं वर्तते, भक्त्याः द्वितीयः अङ्गः त्यागः। भोगोत्पादकसाधनेभ्यः यज्ञस्य[6] प्राधान्यात् भक्त्याः तृतीयः अङ्गः यज्ञः। जीवनधारणार्थं प्राय: सामाजिकसंबन्धः अनिवार्यः अस्ति—मैत्र्या द्वेषपरित्यागः, सम्मानेन नम्रताप्रदर्शनम्, सहानुभूत्या च करुणाप्रदर्शनम् इत्यादिकम् आयाति। अहिंसा-अस्तेय-सत्य-ब्रह्मचर्य-अपरिग्रहाः सामाजिकजीवनस्य प्राणाः सन्ति, यः व्यवहारो भक्त्याः चतुर्थः अङ्गः अस्ति। जीवनयात्रायां सुकृतस्य पुण्यकर्माणि, पवित्रता, शौच-सन्तोष-तपो-ब्रह्मज्ञान-ईश्वरप्रणिधानानि— विकासस्य मूलस्तम्भरूपेण एतानि आसन्। अतः दैवीसंपत्त्या अर्जनं भक्त्याः पञ्चमः अङ्गः। इन्द्रियाणां विचारपूर्वकं विषयाद् अपसार्य मनसि बुद्धिं विवेकं च नियन्त्र्य दैव्यध्यात्ममार्गं गमनं भक्तानां कृते पवित्रतासंपादनाय सोपानम् अस्ति।

*शाण्डिल्यभक्तिसूत्रे* तथा *नारदभक्तिसूत्रे* महर्षिः शाण्डिल्यः यां भक्तिं ऐश्वर्यपरां तथा आत्मैकपराम् उक्तवान्, अपि च नारदः यां भक्तिं स्वत:प्रमाणरूपां शान्तिरूपां परमानन्दरूपां च कथितवान्, तस्यां साधनं साध्यं च समाविष्टौ स्तः। स्वत:प्रमाण-शान्तिरूप-ईश्वरभावपरायण-साधनाभ्यां कृत्वा एव एकः भक्तः शुद्धभक्तो भवितुमर्हति। स्वत:सिद्धेः अवस्था शान्तिरूपा। भक्तः विविधसाधनाभ्यासेन एतां स्थितिं प्राप्नोति। चित्तवृत्तीनां निरोधः यत्र विद्यते तत्र शान्तिः विराजते, सा शान्तिः सत्-चित् – इत्यनयोः ऊर्ध्वावस्था। ततःपरम् आत्मैकपरा तथा परमानन्दरूपा अवस्था। परमात्मतत्त्वं हि आनन्दरूपं भवति। ईश्वरविषये आत्मतत्वविषये च भारतीयदर्शने भेदो वर्तते। बादरायणमते— सत्त्वगुणस्य सर्वोच्चस्थितिः ईश्वरतत्त्वम्, आत्मतत्त्वं तु अस्माद् भिद्यते। आत्मतत्त्वं त्रिगुणातीतं सत्त्वगुणात्परम्। एतेन जीवाः निरावरणं सर्वविकाररहितं शान्तं भवितुम् अर्हन्ति। भगवता श्रीकृष्णेन प्रोक्तम्— यः साधकः भक्त्या मां तत्त्वतो ज्ञात्वा ज्ञानाय प्रवर्तते स मां साधु जानाति। अत एव भक्तिः साध्या। भक्त्या प्रत्येकावस्था परस्परापेक्षा अस्ति। नारदाचार्यः भक्ताचार्याणां भक्त्याः साध्यसाधनरूपतायाः विवेचनं कृतवान्। भक्तानां सर्वस्वं भक्तिरेव। अतः नारदेन भक्तिः फलरूपा प्रोक्ता। *नारदभक्तिसूत्रस्य* अनुसारेण सनकादयः मुक्तेः फलं भक्तिरेव मन्यन्ते—भक्तिः स्वयमेव फलम्— स्वयं फलरूपा इति ब्रह्मकुमारैः उक्तत्वात्। भगवत्कृपया भक्तो गुणत्रयम् अतिक्रम्य भगवद्भावम् उपैति। अतः भक्ताः एकान्तिनः मुख्याः इति कथ्यते। एतदेव शाण्डिल्य-नारदयोः

पराभक्तिस्वरूपं भक्तिसूत्रयोः वर्णितम् अस्ति। आत्मसाक्षात्काराय भक्त्याः महत्त्वस्य उपरि सर्वे संप्रदायाः सहमताः सन्ति।

*श्रीमद्भगवद्गीतायाः* अष्टादशे अध्याये श्रीकृष्ण: भक्तम् अर्जुनं प्रोक्तवान्—स्वाभाविक-अपारसौन्दर्य-सौशील्य-सौहार्द-वात्सल्य-कारुण्य-माधुर्य-गाम्भीर्य-शौर्य-वीर्य-पराक्रम-सर्वज्ञत्व-सत्यकामत्व-सत्यसंकल्पत्व-सर्वेश्वरत्व-सकल-कारणत्वाद् असंख्य-कल्याणमय--गुणसागरे निखिलावगुण-प्रत्यनीके मयि निरतिशय-प्रेमगर्भ-स्मृत्याभ्यासयोगेन स्थिरं चित्तसमाधानं लब्ध्वा मां प्राप्तुम् इच्छ, अतः तात्पर्यम् इदं यत्—मयि भक्तियोगं कुरु! इह भक्तियोगेन श्रीकृष्णे चित्तसमायोजनमेव मुख्यत्वेन गण्यते, तदर्थं *शाण्डिल्यभक्तिसूत्रे* तथा *नारदभक्तिसूत्रे* भक्तियोगस्य माहात्म्यं भक्तिप्रक्रिया भक्तिफलं कथं प्रतिपाद्यते तदेव अस्माभिः अवश्यं ज्ञातव्यम्।

भगवत्साक्षात्कारस्वरूपमेव आत्यन्तिकम् अनन्तं सुखं जीवस्य वास्तविकं लक्ष्यम् उद्देश्यं मानवशरीरलाभस्य फलम् अस्ति। यतो भक्तिशास्त्रस्य सन्देशः अस्ति यत्— शास्त्रेषु अनुभवः एव प्रमाणत्वेन स्वीक्रियते। भक्तिः अमृतं ददाति, भक्तिः यदि निष्कामकर्मणः आधारशीला न भवेत् तर्हि तत्कर्म अस्माकं भोगवादं प्रति नयति, यस्य परिणामो विनाश एव। भक्त्या अभावाद् ज्ञानी एव अहंकारी भवेत्, न ज्ञानवान्। व्यक्तिः भक्त्या इन्द्रियेभ्यः लोककल्याणार्थं यत् कर्म करोति तत् परस्मै भवति, परार्थपरता एव भक्त्या आधारशीला। भक्तिः अतीव वैज्ञानिका अस्ति न तु अन्धविश्वासः। देशभक्तितो यथा— स्वदेशं प्रति भक्तये वन्दुकगुलिबद्धा आहतवन्तः शरीरेषु ते देशप्रेमिकाः स्मितं कृत्वा प्राणान् त्यक्तवन्तः ते शहीदा अभवन्। शिक्षको गुरुः भवेत्, श्रद्धां विना कोऽपि पूर्णतया मानवः न भवितुं शक्यते। *श्रीमद्भग्वद्गीतायां* उच्यते 'श्रद्धावान लभते ज्ञानम्'। अपि च यदि केवलं प्रेम एव उच्यते तर्हि तस्मिन् प्रेम्णि अहंकार आगच्छति, तदर्थं देवर्षिः नारदः *नारदभक्तिसूत्रे* 'परमप्रेम' इति उक्तवान्। अतः आत्मनः स्थाने 'परमात्मा' इति शब्दः प्रयुज्यते। श्रीकृष्णः साक्षात्परब्रह्म, अतः श्रीकृष्णम् अवगन्तुं ब्रह्म ज्ञात्वा प्रथमतः वेदान्तः ज्ञातव्यः, अत एव *शाण्डिल्यभक्तिसूत्रे* आध्यात्मिकतायाः प्रभावः भक्तिविषये अतीव सहायकः अस्ति। तथैव श्रीकृष्णप्राप्तये सहृदयानुभवेन प्रेम एव कर्तव्यम्, तदर्थं *नारदभक्तिसूत्रे* प्रेमभक्त्याः प्राबल्यं दर्शितम् अस्ति।

अपि च, यतः वयम् सांसारिकजनाः ग्रहनक्षत्रप्रभावेन दुःखाकुलिताः तत्मोचनार्थं चेष्टामहे, तदर्थं ज्योतिषशास्त्रेषु विविधा प्रतिकाराः वर्तन्ते। तत्र ग्रहदोषनिवारणार्थं ग्रहशान्तये वा यज्ञ-मन्त्रपाठ-बीजमन्त्र-गायत्रीमन्त्रपाठ-स्तोत्रपाठ-दानादिधार्मिक-प्रायश्चित्तकर्माणाम् आलोचना शास्त्रेषु प्राप्यते, तत्र सर्वत्रैव भक्तिः आवश्यिकी कारणं भक्तिं व्यतिरिच्य कदापि ग्रहः न शाम्यति। अतः कलियुगे

करोनामहामार्याः परवर्तिनि काले भक्तिदर्शनविषये गवेषणाकार्यम् अतीव तात्पर्यपूर्णं फलदायकं चेति मम मतिः।

उल्लेखपञ्जिः

---

[1] मद्रूपमद्वयं ब्रह्म मध्याद्यन्तविवर्जितम्।
स्वप्रभं सच्चिदानन्दं भक्त्या जानाति चाव्ययम्।। *प्रीतिसन्दर्भः*

तत्रैव *श्रीविष्णुपुराणे* लक्ष्मीस्तवे स्पष्टीकृते।
यज्ञविद्या महाविद्या गुह्यविद्या च शोभने।
आत्मविद्या च देवी त्वं विमुक्तिफलदायिनीति।। वि.पु.
(यज्ञविद्या कर्मविद्या महाविद्या अष्टाङ्गयोगश्चेति यत्र
गुह्यविद्या भक्तिः, आत्मविद्या ज्ञानम्)

[2] ताप: पुण्डस्तथा नाम मन्त्रो यागश्च पञ्चम:।
अमी ते पञ्चसंस्कारा: परमैकान्तिहैतव:।। इति।

[3] नृत्यसंस्कारसङ्गीतसहितं काव्यं समाजस्य सहजशक्तेः सहकारि भवति। *ऐतरेयोपनिषदि* प्रोच्यते— आत्मसंस्कृतिर्वाव शिल्पानि। छन्दोमयं ऐतेर्यमान आत्मानं संस्कुरुते। यः भक्तिस्पर्शः चित्रकलायां विशेषपदवीं धारयति तेषु अग्रणी अस्ति। अस्यां कलायां रामायण-महाभारतयोः यथा स्थानं लभ्यते तथैव भागवतपूराण-गीतगोविन्दयोः चित्राणि समाविष्टानि सन्ति। विविधरागाधारितचित्रेषु भक्तिः उभयोः चित्रयोः मुख्यविषयः अस्ति। Barnali Roy. *Bhakti āndolaner prekṣāpaṭe nṛityera avasthāna.* pp—53,65

[4] *स्कण्डपुराणस्य* वैष्णवखण्डे—
जगच्चेदं जगन्नाथो नान्यच्चापि च कारणम्।
हानं बहिरूपाधीनां प्रेमोत्कर्षेण भावनम्।
दुर्लभा भक्तिरेषा हि मुक्तयेऽद्वैतसंज्ञिता।। (२.१०.८६-८८)

[5] मत्प्रीणनार्थं कर्म मत्कर्म श्रवणकीर्तनादिभागवतधर्मस्तत्परमस्तदेकनिष्ठो भव। अभ्यासासामर्थ्ये मदर्थं भागवतधर्मसंज्ञकानि कर्माण्यणि कुर्वन् सिद्धिं ब्रह्मभावलक्षणां सत्त्वशुद्धिज्ञानोत्पत्तिद्वारेण अवाप्स्यसि। अथ बहिर्विषयाकृष्टचेतस्त्वादेतन्मत्कर्मर्मपरत्वमपि कर्तुं न शक्नोषि ततो मद्योगं मदेकशरणत्वमाश्रित: मयि सर्वकर्मसमर्पणं मद्योगस्तं वाश्रित: सन् यतात्मवान् यत: संयत: संयतसर्वेन्द्रिय: आत्मवान् विवेकी च सन् सर्वकर्मफलत्यागं कुरु फलामिसन्धिं त्यज। *Śrīmadbhagavadgītā.* With Sans. Comm. *Gūḍhārthadīpikā* of Madhusūdana Sarasvatī. Chapter XII (Verse-10,11)

[6] द्रव्यात्मकयज्ञः तथा भावनात्मकयज्ञो वैधीभक्तिः, केवलात्मकयज्ञश्च पराभक्तिः इत्यभिधीयते। अत्र अस्माकं हृदयं काम-वासना-सङ्ग-हित-स्वार्थ-दम्भ-प्रतिष्ठा-मोह-संस्कार-जल्पना-कल्पनारहितं कृत्वा चित्तं शून्यमिव परिणमयितुं सुन्दर उपायो भावनात्मकयज्ञे अस्ति। सर्वत्र भगवत्दर्शनं भागवद्ध्यानं भगवत्सेवा च, ध्यान-मनन-निदिध्यासनेभ्यः इष्टभावेन परिभावितः तत्सारूप्यं प्राप्यते भावनात्मकयज्ञे, ईशावास्यमिदं सर्वम्—जगति सर्वम् ईश्वरेण प्रभावितं भवति एतत् तस्य अनुसरणम् अस्ति। *Yajñatattva..* Ed. Compiled by Premananda Swamiji and Sadhu Aghornath Gupta. pp. 73-86

## Bibliography


Anantadeva & Āśrama swāmī. *Bhaktinirṇaya & Nāmamātmya*. Ed. Mangal Deva Shastri. Varanasi: Ananta Shastri Phadaka Vyakaranacharya.

Angirā *Ṛṣi*. *Daivī Mīmāṁsā Darśana: Rasapada & Utpattipada*. Varanasi: Sri Bharat Dharam Mahamandal, 2000.

Annaṃ Bhaṭṭa. *Tarkasaṅgraha (Dipikā tīkā)*. Anamika Raychowdhury, Kolkata: Sanskrit Pustak Bhandar, 1998.

Basu, Jogiraj. *Veder Porichay*. Calcutta (now Kolkata): Firma KLM Pvt. Ltd, 2009 (3rd Ed.).

*Bhāgavata Darśan* (Volume 2). Swami Akhandanand Saraswati. Mumbai: Sat Sahitya Prakashan Trust, 2006.

*Bhaktadhin Bhagaban*. Ed. Somnath Nandi. Kolkata: Ananda Publisher, 2020.

*Bhaktirasavimarśa*. Ed. Kapiladeva Brahmacharya. Varanasi: Bharatiya Vidya Prakasan, 1969.

*Bhaktisudhā.* Swami Sri Hariharananda Saraswati. Delhi: Sri Radhakrishna Dhanuka Prakashan Sansthanam, 2010.

Bharatamuni. *The Nāṭyaśāstra*. Ed. Jagannath Sastri Tailang. Varanasi: Bharatiya Vidya Prakashan.

*Bṛahmasaṁhitā*. Sri Bhaktivinoda Thakur and Sidhanta Sarasvati Goswami Thakur and Srimad Bhaktivedanta Narayana Goswami Maharaj. Mathura: Sri Keshavji Gaudiya Math, 2005 (2nd ed.)

*Bṛhadāraṇyaka Upaniṣad*. (Chapter 4, Brāhmaṇa 4th and 5th). Ed. With Bengali translation Jharna Bhattacharya and Sanskrit Commentary by Śaṃkarācāya. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1999 (2nd ed.) (1st ed. 1976).

*Brhannāradīyapurāṇam*. Ed. Pandit Hrishikesh Shastri. Varanasi: Chowkhamba Amarabharati Prakashan.

Cakravarti, Visvanatha. *Bhaktirasāmṛtasindhubindu*. Ed. Srimad Bhaktivedanta Narayana Goswami Maharaj. Gaudiya Vedanta Prakashan, 2006.

Chattopadhyay, Debiprasad. *Lokāyata Darśana*. Kolkata: New age publishers private limited, 1956.

Chattopadhyay, Sachinath. *Brahmarūpinī Gāyatrī & Trīvedīya Sandhyā Vidhi*. Kolkata: Sanskrit Pustak Bhandar, 2012 (1st ed.).

Dey, Manoranjan. *Vaiṣṇava Sampradāya.* Sri Madhwa Gaudiya Math.

Dharm P.S. Bhawuk. *Spirituality and Indian Philosophy*: Lessons from the Bhagavad-Gita. USA: Springer new York Dordrecht Heidelberg London, 2011.

Dwivedi, Kapildeva. *Vaidik Sahitya avam Sanskriti*. Varanasi: Vishwavidyalaya Prakashan, 2000.

*Gauḍīya Vaiṣṅava sādhānā.* Harekrishna Mukhopadhyay. Calcutta (now Kolkata): West Bengal State Book Board, 2011.

*Gopī Prem*. Hanuman Prasad Podder. Gitapress, Gorakhapur.

Gopinath Kabiraj. *Bhaktirahasya*. Ed. Hanuman Prasad Poddar. Varanasi, 1970.

Goswami, Sitanath. *Kaṭhopaniṣad*. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 2002.

H.N. Katwe. *Adhyam Jyotish Vichar*. Nagpur Prakashan, 2014 (5th ed.).

Harrison J. *Ancient art and ritual*. London, 1935.

*Indian Philosophy:Volume 1*. Ed. Sarvepalli Radhakrishnan with on introduction by J.N. Mohanty. New Delhi: Oxford University Press, 2009 (2nd Ed).

*Kaivalya Upaniṣad Śrīsadāśivācāryaviracit* .Ed. Pt. Jagannath Sastri Tailang. Varanasi: Shaiva Bharati Shodha Pratishthanam, 2006.

*Karma and Reincarnation: Transcending your past, transcending your future.* Ed. Elizabeth Clare Prophet and Patricia king. United States: Summit University Press, 2001.

Kennedy V. *Hindu mythology*. London, 1831.

Kṛṣṇadasa Kavirāja. *Śrī Caitaṇyacaritāmṛita*. Ed. Harekrishna Mukhapadhyay O Subodhchandra Majumder. Kolkata: Deb Kutir, 2021.

*Līlāpuruṣottam Śrī Kṛṣṇa*. A.C. Bhaktivedanta Swami Prabhupāda. Mumbai : The Bhaktivedanta Book Trust, 1972.

Madhusūdana Sarasvatī. *Bhaktirasāyana*. Ed. With the translation and commentary by Janardan Shastri Pandey. Varanasi: The Chowkhamba Vidya Bhawan, 2015.

Madhvācārya. *Pūrṇapṛjñadarśan*. Lokenath Chokraborty. Kolkata: Sanskrit Pustak Bhandar, 2008.

Maharṣi Garga*. Śrī Garga Samhitā.* Gitapress, Gorakhapur.

*Mañjarī Svarūpa Nirūpṇa*. Kunjabihari Dasji. Published by Ananata Das.

Mitra, Priti. *Indian Culture and Society in the Vedas*. Kolkata: Sanskrit Pustak Bhandar, 1965.

Mukhapadhaya, Dhrubakumar. *Sāktapadābalī*: Ramprasad Sen O Kamalakanta Bhattacharya. Kolkata: Pragya Bikash, 1426 BY.

*Nām-samkīјtana-mahimā*. Sri Prabhudatta Brahmachari. Samkirtan Bhavan Prayag.

*Nārada Bhakti Sūtra*. Varanasi: Chawkhamba Surbharati Prakasan, 2014

Nārada Muni. *Haribhaktisudhodaya*. Ramnarayana Vidyaratna. Murshidabad: Beharampur,1894.

Nārada. *Nāradasmṛti*. Ed. Brajakishore Swain. Varanasi: Chawkhamba Sanskrit Bhavan, 1996.

*Nāradabhaktidarśana*. Swāmī Akhandānanda Saraswatī. Mumbai: Satsahitya Prakashan Trust, 1969.

*Nāradiya Bhakti Sūtra,* Talks delivered by Swami Samarpanananda and edited by Amit Ray Chaudhuri. Belur Math: Ramakrishna Vivekananda University.

___________. A.C. Bhaktivedanta Swami Prabhupāda and his Disciples.

___________. Swami Sivananda. Rishikesh: The Yoga-Vedanta Forest University, 1957.

*Nāradīyapurāṇa*. Ed. Khemarāja Śrīkr̥ṣṇadāsa. Bombay: Sri Venkateshwara Press, 1863. Rpt.

Nārāyana Tīrtha. *Bhakti Candrikā* (Commentary on Śāṇḍilya Sūtra). Ed. With Introduction etc. by Pt. Anant Shastri Phadke. Allahabad: Government Press, 1938.

Naresh Chandra Jana. *Brindāboner Chay Goswamī*. Kolkata: Sanskrit Book Depot, 2015.

Nath, Radhagovinda. *Gauḍīya Vaiṣṅava Darśan* (3rd 4th and 5th Volume). Kolkata: Prachyavani Mandir, 1958.

*Navadhā Bhakti*. Jaidayal Goyandka. Gitapress, Gorakhapur.

_________. Sri Ramkinkar ji Maharaj. Kolkata: Art and Culture.

Panditaraja Jagannatha. *Rasagangāghara*. Ed. Bidyut Baran Ghosh. Calcutta (now Kolkata): West Bengal State Book Board, 2019.

Prajnanananda Sarasvati. *Karmatattva*. Calcutta (now Kolkata): Sanskrit Book Depot, 1377. (BY)

Pravrajika Amalaprana. *Sri Sri Maa O Dashamahavidya*. Kolkata: Sri Sarada Math, 2017 (3rd Rpt).

*Prem Darśan Debaṛṣi Nāradaviracita (Bhaktisūtra).* Hanuman Prasad Podder. Gitapress, Gorakhapur.

Rabindranath Tagore. *The Religion of Man*. Translated by Sankar Sengupta. Kolkata: Progressive Publishers, 2014 (1st Ed.).

Raghunath Prasad Tiwari. *Maharṣi Pārāśara*. Jaipur: Archana Prakashan, 2003.

Rāmānujācārya. *Śrīmadbhagavadgītābhāṣym.* Trans. by Harikrishna Das Goyandaka. Gitapress, Gorakhapur.

Ravi M. Gupta. *The Caitanya Vaiṣṇava of Jiva Goswami*.London and New York*:*Routledg*e*, 2017.

Roy, Barnali. *Bhakti āndolaner prekṣāpate nṛityera avasthāna.* Kolkata: Sanskrit Pustak Bhandar, 2017.

*Śāṇḍilya Bhakti Darśanam. Śāṇḍilya Bhakti Sūtra (*With Bhaktichandrikā by Nārāyana Tīrtha). Hindi commentary by Yogeswar. Varanasi: Chaukhamba Surbharati Prakashan, 2018.

*Śāṇḍilya Bhakti Sūtra. (*With Bhaktichandrikā by Nārāyana Tīrtha). *Śrī Baladeva Upādhyāya.* Varanasi: Vararanaseya Sanskrit Vishvavidyalaya, 1967.

__________. Ed. Swami Abhayanand Saraswati. Uttar Pradesh: Arsha Vidya Gurukulam, 2011.

__________. With Svapneśvara Bhāṣya Edited by Swami Harshananda. Mysore: Manasagangotri, Prasaranga, 1976 (1st Ed.), 1984 (2nd Ed).

*Śāṇḍilya Ṛṣi. Śāṇḍilya Bhakti Sūtra*. Sri Bhakti Prajnan Yati. Madras: Sree Gaudiya Math, 1991.

________.________. With the Commentary named Śatasūtrīyabhāṣya of Śrīmat Svapneśvara Ācārya and Edited with a hindi Commentary by Srikrishna Mani Tripathi. Varanasi: Bharata Manisha, 1973.

Śaṅkarācārya. *Bhaja Govindam.* Ed. Swami Chinmayananda. Mumbai: Central Chinmaya Mission Trust.

*Śaṅkarācārya's Vivekacūḍāmaṇi*. Ed. Swami Lokeswarananda. Kolkata: Ramkrishna Mission Institute of Culture, 2003.

*Śaṅkarer Darśan*. Ed. Prabhat Mishra. Kolkata: West Bengal State Book Board, 2019.

Seal, B.N. *Positive science of the Ancient Hindus*. London, 1915.

Sengupta, Promodbandhhu. Psychology and Social Philosophy. Kolkata: Banerjee Publishers, 1959.

Sharma, Munsiram. *Bhakti ka Vikāsa.* Varanasi: Chowkhamba Vidyabhawan, 1958.

*Shrimad Vallabhacharya And his Teaching*. Originally written by Dr. Chiman Lal M. Vaidya and Translated by Bhailabhai N. Shastri. Delhi: Shri Vallabha Publications, 1984.

Singh, Dr. Gopeshwar. *Bhakti Aandolan ke Samajik Aadhar*. New Delhi: Jagat Ram and Sons, 2018 (2nd ed.).

Sri Bhaktivinoda Thakur. *Bhaktitattvaviveka*. Ed. Srimad Bhaktivedanta Narayana Goswami Maharaj. Gaudiya Vedanta Prakashan, 2005.

*Śrībhāṣya* of Rāmānujācārya. Ed. Lalit Krishna Goswami. Prayag: Sri Nimbarka Peetha, 1973.

Śrīla Jīva Goswāmī. *Śrī Bhakti Sandarbha*. Ed. Prangopal Goswami. Kolkata: Sanskrit Pustak Bhandar, 1424 (BY) (2nd ed.).

Śrīla Rūpa Gosvāmī. *Bhaktirasāmṛtasindhu*. Ed. With the translation and commentary by A.C. Bhaktivedanta Swami Prabhupāda. Mumbai (Maharashtra): The Bhaktivedanta Book Trust, 1979.

Srimad Bhaktivedanta Narayana Goswami Maharaj. *Four Vaiṣṅava Ācārya avam Gauḍīya Darśan*. The Gaudiya Vedanta Book Trust.

*Śrīmadbhagavadgītā*. Ed. commentary by A.C. Bhaktivedanta Swami Prabhupāda. Mumbai (Maharashtra): The Bhaktivedanta Book Trust, 2020.

__________. Edited by Dr. Nalinikanta Brahma. With Sans. Comm. *Gūḍhārthadīpikā* of Madhusūdana Sarasvatī & Beng. Trans. by Sri Bhutnath Saptatirtha. Calcutta(Now Kolkata): Navabharat Publishers.

*Śrīmadbhāgavatam.* published by Sītārāmadāsa Oṃkāranātha, Kolkata: Sanskrit Śikṣā Saṃsad, Southern Avenue, Vaikuṇṭhadhāma, 1392 (BS).

___________. Sanskrit text. Gitapress, Gorakhapur, 2005.

*Svāmī Vivekānander vanī o racanā* (4th Volume). Kolkata: Udbodhan karyalaya, 1963.

Swami Vivekananda. *Bhakti Yoga*. Belur Math: Advaita Ashrama, 2017.

Swami Yatiswarananda. *Dhyan aur Adhyatmik jivan*. Nagpur: Ramakrisna Math, 2000.

Swami, Sardeshananda. *Śrī Caitanyadeva*. Salem: Ramkrishna Mission Ashrama, 1366 BY.

*The Bhagavadgītā*. With an Introductory Essay Sanskrit text English translation and notes by S. Radhakrishnan. New Delhi: Blackie & Son(India) LTD, 1977(6th edition).

*Vaiṣṇava Tantra Siddhānta aur Sādhanā.* Shyama Kanta Dwivedi. Varanasi: Chaukhamba Publishers, 2013.

*Vedānta Pārijāta Saurabha of* Nimvāṛka & *Vedānta Kaustubha of Śrīnivāsa* . Roma Bose. Kolkata: The Baptist Mission Press, 1940.

Vishnu Purī. *Bhakti Ratnāvalī*, With Kantimala Commentary edited and translated by Krishnamani Tripathi. Varanasi: Varanaseya Sanskrit Vishvavidyalaya.

*Viṣṇupurāṇa*. Trans. Śrījiva Nyāyatīrtha. Kolkata: Āryaśāstra Saṃskaraṇa, 1372 (rpt.).

*Yajñatattva.* Ed. Compiled by Premananda Swamiji and Sadhu Aghornath Gupta. Kolkata: Tathagata.

**Weblinks**—

https://samskritabharati.in
https://advaitasharada.sringeri.net

http://saintofindia.blogspot.com

https://www.chaitanyamuseum.org/

https://en.wikipedia.org/wiki/Shandilya_(Rishi)

https://en.wikipedia.org/wiki/Bhakti_movement

********